No. 52.] [Price Rupee One.

THE

CHOWKHAMBA SÂNSKRIT SERIES

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

न्यायसुधा ।

तन्त्रवार्तिक टीका भट्टसोमेश्वरविरचिता

NYÂYASUDHÂ,

COMMENTARY ON TANTRAVÂRTIKA.

BY

PANDIT SÔMESHWARA BHATTA,

EDITED BY

PANDIT MUKUNDA SHÂSTRI,

of the Government Sanskrit-College, Benares.

FASCICULUS VI

PUBLISHED AND SOLD BY THE SECRETARY

CHOWKHAMBÂ SANSKRIT BOOK-DEPOT:

BENARES.

AGENT:—OTTO HARRASSOWITZ, LEIPZIG:

Printed By Hari Das Gupta Proprietor

AT THE VIDYA VILASA PRESS.

BENARES.

1902.

श्रीः

-*-

आनन्दवनविद्योतिसुमनोभिः सुसंस्कृता ।
सुवर्णाऽङ्कितभव्याभशतपत्रपरिष्कृता ॥ १ ॥
चौखम्बा-संस्कृतग्रन्थमाला मञ्जुलदर्शना ।
रसिकालिकुलं कुर्यादमन्दामोदमोहितम् ॥ २ ॥

स्तवकः—५२

कल्पयितुमशक्यत्वात् नाभिधानसिद्ध्यर्थमध्यारोपो युक्त इत्यर्थः ।
वैलक्षण्ये ऽप्यूषरादौ तोयाध्यारोपदर्शनाद् * भ्रान्तिवर्जितैः *
इत्युक्तम्। नचैवं सति योषा वा गौतमाग्निरिति योषायामग्नित्वारोप-
विधिर्न स्यादितिवाच्यम्। तद्रेतःप्रक्षेपस्य मध्यायत्कर्त्वमभवद्भीक
इति द्वाभ्यामृग्भ्यां स्वाहाकारान्ताभ्यां रेतः सिञ्चेदिति स्वाहाकार-
साध्यत्वस्मृतेस्तथाविधस्य च होमत्वप्रसिद्धेर्यूपशकला होतव्या इ-
ति च देवतोद्देशद्रव्यत्यागानिरपेक्षप्रक्षेपमात्रे ऽपि जुहोतेर्वेदे दर्शना-
त्तत्कर्मीभूतस्य रेतसो ऽग्निशुचिहूस्रूपिच्छदिच्छविभ्य इसिरिति जुहो-
तेरिसिप्रत्ययान्वाख्यानाद्धविःशब्दव्यपदेश्यत्वेन योषाया रेतोरू-
पहविराधारतयाग्निसादृश्यसम्भवाच्छ्येनचितं चिन्वीतेति च यो-
षायामाग्निसादृश्यारोपस्य विधेयत्वादित्याशयः । ननु भ्रान्तिवर्जि-
तानां विसदृशे वस्तुनि वस्त्वन्तरारोपाशक्तावपि भ्रान्त्यवसितसा-
दृश्ये ऽपि तत्त्वारोपेण शब्दः प्रयोक्ष्यतइत्याशङ्क्याह * यदेति * ३२१।२
रश्मितप्तोषरे भ्रान्त्या शौक्ल्यचञ्चलत्वादितोयगुणदर्शनेन तोयसा-
दृश्याध्यवसानात्तोयमुत्प्रेक्ष्य तोयशब्दप्रयोगे तत्त्वतो भ्रान्तावपि भ्रा-
न्त्यध्यवसितस्यैव कारणत्वोपपत्तेरुत्प्रेक्षामात्रत्वाभावेनारोपाभावाद्
दूरमपि गत्वा भ्रान्तित्वस्य परिहर्त्तुमशक्यत्वे प्रथममेव सादृश्यज्ञा-
नानपेक्षस्य भ्रात्यङ्गीकरणस्य च युक्तत्वात् मुख्यतैवावसीयते न
गौणतेत्याशयः । परानभिमतमपि वा भ्रान्तेरारोपत्वं लोकप्रसिद्ध्यनु-
सारेणापाद्यारोप्येत्युक्तम्। तोयस्य तत्राविद्यमानत्वात् मुख्यत्वानुप-
पत्तिमाशङ्क्य *भ्रान्तीत्युक्तम्*भ्रान्त्यध्यवसितस्यापि प्रथमं शब्दात्प्र-
तीतेर्मुख्यत्वाविरोध इत्याशयः । भ्रान्त्यध्यवसितो मुख्यो भ्रान्तिमुख्य
इति शाकपार्थिववन्मध्यमपदलोपी समासः। ननूभयोर्भ्रान्तावर्थान्त-
राभिधाननैरपेक्ष्येण प्रथमवृत्तेर्मुख्यत्वाद् गौणत्वासम्भवे ऽपि वक्तु-
र्भ्रान्त्यभावेऽपि श्रोतृप्रतारणायोषरे तोयशब्दप्रयोगे भ्रान्तिमुख्यत्वस्या-
प्यसम्भवाद् गौणत्वं भविष्यतीत्याशङ्क्याह*अथापीति*श्रोतृवञ्चना-
र्थैनैव परशब्दस्य परत्र प्रयोगोपपत्तेर्नासम्भाविनो ऽध्यारोपस्य कल्प-
ना युक्तेत्याशयः । ननु द्वयोः श्रोतुरेव वा भ्रान्त्या वारोपाभावे ऽपि
भ्रान्त्या प्रतारणार्थेन वा परशब्दस्य परत्र प्रयोगोपपत्तेर्माभूदारोपक-
ल्पना द्वयोरपि तु भ्रान्त्यभावे सिंहो देवदत्त इत्यादावारोपं विना
शब्दप्रयोगानुपपत्तेस्तत्कल्पनैवोचितेत्याशङ्क्याह * यदा त्विति *
सादृश्यमादिशब्दोपात्तो वा सादृश्यहेतुर्गुणयोगो निमित्तं यस्य व-
स्त्वर्थस्य तस्य परत्र परशब्दप्रवृत्तौ निमित्तत्वेनाध्यवसानान्नारोपक-
ल्पना युक्तेत्यर्थः । वत्यप्रयोगात्तदर्थाध्यवसानासम्भवाशङ्कानि-

रासायान्तर्णीतशब्देनाभिप्रेतत्वमुक्तम् । ननु वक्त्र्यर्थाभिप्रायस्यैव तत्र निमित्तत्वं नारोपस्येति नियमे को हेतुरित्याशङ्कां पूर्वश्लोकव्याख्यानेन निरस्यति * तथा हीति * ननु सत्यपि विवेके प्रसह्यकारित्वादिसादृश्यादारोपः सम्भवतीत्याशङ्क्याह * यथेति * विवेकज्ञानाम् पुंसाम् आरोपानुपपत्तौ हेतुमाह*न हीति * ज्ञानस्य व्यवहाराङ्गत्वात् अर्थनिरपेक्षेण च ज्ञानरूपेण व्यवहाराभावात् अर्थाध्यवसानात्मकमेव सर्वं ज्ञानं न ततो ऽन्यादृशं न च विवेकेनार्थे ऽध्यवसिते तत्त्वारोपः सम्भवतीत्याशयः । यद्वा विवेकज्ञानाङ्ग तत्त्वभ्रान्त्यसम्भवे ऽप्युत्प्रेक्षामात्रप्रभवा कल्पनारूपा बुद्धिरारोपशब्दवाच्योपपत्स्यतइत्याशङ्क्य * न हीत्युक्तम् * अयमाशयः कल्पनारूपापि बुद्धिरर्थान्तरात्मना यद्यर्थान्तरमवभासयेत्ततो मानान्तरेण भ्रान्तिरेव स्यात् सा च विवेकिनां न सम्भवतीत्यर्थानवभासिकासावभ्युपगन्तव्या न चार्थानवभासिका बुद्धिः सम्भवतीति व्यवहारानङ्गत्वापत्तेस्तावन्निरालम्बना बुद्धिर्नसम्भवतीत्युक्तं बुद्धिस्वाभाव्यादप्येवमित्याह * किं चेति * पुरुषप्रयोज्यत्वात्तदधीनो ऽपि शब्दः प्रवृत्तिनिमित्तं विषयं विना न प्रवर्त्तते घटे वैयात्यात्पटशब्दोच्चारणे ऽपि बुद्ध्यनुपपत्तेः । बुद्धिस्तु स्वच्छन्दत्वाद्विषयं विनोत्पत्तुमेव नार्हतीत्यर्थः । ननु स्वांशएव विषयो भविष्यतीत्याशङ्क्याह * न चेति * आरोपसम्भवात्कल्पना न युक्तेत्युक्त्वा कल्पकाभावादपि तत्कल्पना न युक्तेत्याह * अपि चेति*अयमाशयः । स्वप्रत्ययानुसारेण श्रोत्रा वक्त्रभिप्रायानुसारात् श्रोतुरारोपितार्थप्रत्यये सति वक्तर्यारोपकल्पना युज्येत तस्यैव देवदत्तपदसामानाधिकरण्यात्पूर्वं सिंहपदात्सम्बन्धग्रहणकालावगतानारोपितासिंहत्वरूपार्थप्रतीतेस्तत्सामानाधिकरण्योत्तरकालमपि सिंहसादृश्यमात्रप्रतीतेरारोपितार्थप्रत्ययाभावान्न वक्तर्यारोपकल्पना युक्तेति पदजन्यस्य पदार्थज्ञानस्य केवलसंस्कारजन्यत्वाभावात् स्मृतित्वाभावे ऽपि अधिकार्थत्वाभावसूचनार्थः स्मृतित्वोपचारः ततश्चानारोपितमुख्यार्थग्रहणान्न श्रोतरि नापि वक्तर्यारोप इत्यर्थः । श्लोकं व्याचष्टे * सर्वथेति * यदि द्रुतमध्यादिविभागवदर्थविशेषनिरपेक्षो गौणमुख्यविभागः स्यात् ततः श्रोतृप्रत्ययानपेक्षत्वात् परत्र परशब्दप्रयोगान्यथानुपपत्त्याध्यारोपः कल्प्येतापि स त्वर्थप्रत्ययापेक्षत्वात् तस्य श्रोतृगामित्वात् श्रोतुरारोपितार्थप्रत्ययान्यथानुपपत्त्या कल्पनीयः। न च तस्यारोपितार्थप्रत्ययः सम्भवतीति दर्शयितुम् *श्रोतृणामित्युक्तम् * सादृश्यादीत्यादिशब्देन तद्धेतुगुणयोगोपा-

दानम्। नन्वेवं सति सादृश्यस्यैव वाच्यत्वापत्तेः स्वार्थत्यागः स्यादित्याशङ्क्य * सा चेत्युक्तम् *तमेवन्यायं प्रश्नपूर्वकं वक्तुम्* कथमित्युक्तम्* अस्यैव श्लोकस्योत्तरार्द्धं व्याख्यातुम् *यदा चेत्युक्तम् * कीदृशी तर्हि परत्र परशब्दप्रयोगोपपत्त्यर्थं वक्तरि कल्पनेत्यपेक्षायां प्रश्नपूर्वकम् *कथं तर्हीत्युक्तम्* प्रसह्यकारित्वादेः सिंहत्वेनाविनाभावे देवदत्ते ऽनुपपत्तिप्रसङ्गात् बहुव्रीह्यभ्युपगमे चाविनाभूतशब्दस्य विशेषणत्वात्पूर्वनिपातापत्तिः बाधिते च सिंहे व्यभिचारात् प्रसह्यकारिता तत्र प्रायेणेति भाष्ये प्रायशब्देनाविनाभावानादरसूचनात्सम्बन्धमात्रविवक्षया ऽविनाभूतशब्दः अनेन च कथं तु स्वार्थाभिधानेन प्रत्यय इत्यादिभाष्यमनागतावेक्षणन्यायेन व्याख्यातं भवति। स्वोत्प्रेक्षितगौणवृत्तिलक्षणाभ्युपगमे ऽनवस्थितवेदप्रामाण्यापह्नवस्यानुचितत्वान्नारोपितार्थवृत्तित्वं गौण्या वृत्तेर्लक्षणमित्याह* किं चेति * आरोपस्य पुरुषधर्मप्रदर्शनार्थं वक्तृणामित्युक्तम् किं तर्हि गौणवृत्तिनिमित्तलक्षणमित्याशङ्क्येति गुणाश्रया इतीतिकरणेन प्रकारवाचिना तत्सिद्ध्यादिगुणयोगस्य गौणवृत्तिनिमित्तत्वाभिधानात्सूचितम्। गुणयोगवृत्तित्वं गौणवृत्तिलक्षणमाह*तस्मादिति* उपपदाधीनवृत्तित्वादीनां गौणवृत्तिलक्षणानां वेदाप्रामाण्यापादकत्वादिहानिराकरणे ऽपि गौणमुख्याधिकरणे निराकरिष्यमाणत्वात् परिशेषसिद्धिप्रदर्शनार्थम् * तस्मादित्युक्तम् * गुणयोगनिमित्तायाः शब्दप्रवृत्तेर्गौणत्वेनेष्टत्वाद्वाच्यगुणानां प्रभूतानामर्थान्तरे वृत्तिर्योगः प्रयोजनं प्रवृत्तौ निमित्तं यस्य स गौण इत्येवं व्याख्येयम्। गुणानामशब्दत्वाच्छब्देनार्थान्तरेणान्वयानुपपत्तिः प्रसह्यकारित्वादिवच्च दंष्ट्रित्वादेरपि प्रत्यापत्तिरित्याशङ्कानिरासार्थं यो हि मन्यते प्रसह्यकारिणं प्रत्याययेयमिति भाष्यावयवव्याख्यानार्थेन सिंहत्वाविनाभूतानेकक्रियागुणसमुदायो ऽनेन विवक्षित इति ग्रन्थेन प्रसह्यकारित्वादीनां तात्पर्यवृत्त्या व्यवस्थितं शाब्दत्वं यत्सूचितं तद्विवरणार्थेन प्रयोजनशब्देन प्रयुज्यते ऽनेनेति व्युत्पत्त्या निमित्तमुक्तम्। भेदनादेर्निमित्तस्य होमादिप्रयोजकत्वाभ्युपगमान्नाशेषिणो ऽपि तावन्निमित्तस्याप्रयोजकत्वासम्भवोपालम्भः । इह तु यथा रामस्य वेतनदाने निमित्तस्य शेषित्वरूपमपि प्रयोजनत्वं तथा देवदत्ते सिंहगुणयोगस्य सिंहशब्दप्रवृत्तौ निमित्तत्ववत् प्रतिपाद्यत्वेन प्रयोजनत्वमप्यस्तीतिसूचयितुं प्रयोजनशब्देनाभिधानं युक्तमेव । आरोपवादस्य लक्षणस्याव्यापकत्वमाशङ्कते * नन्वेवमिति * खपुष्पादेरसद्रूपत्वेन गु-

३२२।१

१ व्याप्नुवति इति २ पु० पा०।

णाभावादात्मादौ तद्गुणयोगानुपपत्तेः खपुष्पादीनां शब्दानां खपुष्पमात्मेत्यादिगौणप्रयोगोऽस्मिन् लक्षणे न युज्येतेत्यर्थः । नन्वसद्रूपस्याध्यारोपयितुमशक्यत्वादारोपितार्थवृत्तित्वमपि खपुष्पमात्मेत्यादिगौणप्रयोगेष्वसम्भवादव्यापकं स्यादित्याशङ्क्याह * सांख्यादीति * असद्रूपस्यारोपासम्भवे प्रधानादेरसद्रूपत्वेनाप्रतीतिप्रसङ्गादप्रसक्तस्य प्रधानं नास्तीत्यादिनिषेधायोगात् प्रसक्त्यर्थं सद्रूपत्वाभ्युपगमे निषेधविरोधापत्तेरारोपस्यैव प्रसक्तिसिद्ध्येऽवश्याङ्गीकार्यत्वादसतोऽप्यारोपापत्तेरात्मनि खपुष्पत्वारोपेण खपुष्पमात्मेति गौणप्रयोगसम्भवान्नास्मत्पक्षे लक्षणस्याव्यापकतेत्याशयः । सिद्धान्ते तु त्वदीयस्यैव लक्षणस्याव्यापकत्वाख्यो दोषो नास्मदीयस्येति प्रतिजानाति तावत्* अत्रेति * परपक्षे तावत्प्रश्नपूर्वकं दोषमुपपादयति * कुत इति * किं चिद्रूपमुपादायातद्रूपे तद्रूपकल्पनारोपः खपुष्पस्य त्वेवं विधमिति निरूपणासम्भवान्न शक्या कल्पना गौणप्रयोगसिद्ध्यर्थं चार्थान्तरेऽन्वयारोपो वाच्यः अर्थान्तरस्य चात्मनो सद्रूपतयात्मा खपुष्पमात्मेति गौणशब्दप्रयोक्तुर्बौद्धादेरभिप्रेतत्वान्न तस्मिन्नारोपोपत्तिरित्यर्थः । एतदेव व्यतिरेकमुखेनोत्तरार्द्धेन विवृतं गुणे रूपं सत्ता च प्रज्ञाते यस्येति विग्रहः । एतदेवोपपादयति * यस्तावदिति * असद्रूपस्यारोपाभावे प्रसक्त्यभावात् खपुष्पं नास्तीति प्रयोगानुपपत्तेरसद्रूपस्यापि खपुष्पादेरारोपोऽङ्गीकार्य इति याशङ्का प्रधानादिनिषेधोपन्यासेन कृता सा येऽपि प्रधानात्मादीनां निषेधा इत्युपन्यासपूर्वकं पश्चात्परिहरिष्यते खपुष्पमात्मेत्यादिगौणप्रयोगे तावत् खपुष्पस्यारोपासम्भवोऽधुनोच्यतइति तावच्छब्दार्थः । खपुष्पशब्दस्य गौणत्वद्योतनार्थः स्थानीयशब्दः । अनिर्द्धारितरूपस्यारोपासम्भवद्योतनार्थं निर्द्धारणार्थतरप्प्रत्ययप्रयोगः । अन्यस्य चान्यत्रारोपो भवति खपुष्पस्यारोप्यत्वेनाभिमतस्यारोप्याश्रयादात्मनोऽन्यत्वेनानवधारणान्नात्मन्यारोपः सम्भवतीत्यन्यशब्देनोक्तम् । नन्वात्मनः सद्रूपादसद्रूपस्यान्यता प्रसिद्धैवेत्याशङ्क्य*त्वयेत्युक्तम् * नैरात्म्यवादिनो बौद्धादेः खपुष्पमात्मेति प्रयोगः तन्मते चासत्त्वाविशेषान्नान्यत्वं सम्भवतीत्याशयः । यद्यपि खपुष्पशब्दस्य खाधारपुष्पावच्छिन्नाभाववाचित्वं गम्यते तयोश्चाभाववाचित्वं पूर्वेणैवाभावेऽवगते इत्यादिना वक्ष्यते तेनैव न्यायेनात्मशब्दस्यापि नैरात्म्यपक्षे शरीराद्याधाराहम्प्रत्ययग्राह्याद्यवच्छिन्नाभाववाचित्वं गम्यते तयोश्चाभावयोर्द्धर्मिप्रतियोगिभेदेन भेदादात्मनोऽन्यत् खपुष्पं नैरा-

३२३।१

त्म्यवादिनापि वक्तुं शक्यते तथापि खपुष्पत्वरूपस्य शरीराद्याधाराहम्प्रत्ययग्राह्यरूपे ऽध्यारोपाभावात् स्वरूपेण चाऽभावयोर्वैलक्षण्याच्चारोप्यरूपस्यान्यत्वावधारणं सम्भवतीति दर्शयितुं*यदध्यारोप्येतेत्युक्तम् * तस्मादात्मनि खपुष्पारोपासम्भवेनारोपितार्थवृत्तित्वस्यास्मिन्प्रयोगे ऽनुपपत्तेस्तवैवाऽव्यापकत्वलक्षणो दोषः सिद्ध इति तात्पर्यार्थः। ननु खस्य पुष्पस्य च कथं चित् संसर्गकल्पनमारोपात्मकं खपुष्पमभ्युपगम्यात्मन्यारोपयिष्यते इत्याशङ्क्याह * तेनेति* एवं खपुष्पशब्दस्य खपुष्पसंसर्गात्मकारोपितार्थत्वेन खपुष्पएव गौणत्वोपपत्तेर्गौणशब्दवृत्तिविषयतया खपुष्पस्यैवारोप्यस्य गौणत्वमापद्येत न चैतस्यारोप्यस्य लोके गौणत्वं प्रसिद्धं सिंहत्वादेरारोप्यस्य गौणत्वप्रसिद्धेः। ततश्चैतद्गौणत्वलक्षणमतिव्यापकं स्यादित्याशयः। येन कारणेन स्वरूपेणानवधारितस्यान्यत्रारोपो न सम्भवति तेन पूर्वं तावत्स्वरूपमेवारोपात्मकमभ्युपगन्तव्यं ततश्च गौणतापि तस्यैवापद्येत सा च लोकाननुसारित्वादयुक्तेत्यर्थः। गौणमुख्यविभागस्यार्थविषयत्वे ऽर्थस्यारोपितार्थवृत्तिशब्दविषयत्वं गौणत्वलक्षणमभिप्रेत्यैतदुक्तम्। शब्दविषयत्वेन चैतस्मिन्नारोप्ये खपुष्पशब्दस्य सिंहादिशब्दस्येव लोके गौणत्वप्रतीतिरिति व्याख्येयम्। ननु नारोपितार्थशब्दवृत्तिविषयत्वं गौणत्वलक्षणं येन सिंहत्वादेरपि गौणत्वं प्रसज्येत किं त्वारोपितार्थाश्रयत्वं ततश्च सिंहत्वादेस्तावन्न गौणत्वापत्तिः खपुष्पस्य तु गौणत्वं युक्तमेव तथा हि खपुष्पशब्दस्याभावे ऽवृत्तिर्वक्ष्यते न चाभावस्तस्य वाच्यः तथा सति खपुष्पं नास्तीति प्रयोगानुपपत्तिप्रसङ्गादतो स्ववाच्यखपुष्पसंसर्गारोपेणाभावे वर्त्तमानः खपुष्पशब्दो गौणो भविष्यति आरोपितखपुष्पसंसर्गाश्रयत्वाभावाच्चाभावो गौण इत्याशङ्क्याह* मुख्य इति *अयमाशयः समासं विना खपुष्पशब्दात्संसर्गाप्रतीतेः समासवाच्यत्वं खपुष्पसंसर्गस्याभ्युपगन्तव्यं विग्रहवाक्यार्थश्च समासवाच्यः प्रमाणान्तरेण च खस्य पुष्पस्य खसंसर्गाप्रतीतेः खस्य पुष्पमस्तीति विग्रहायोगात्खस्य पुष्पं नास्तीति वाक्यार्थे समासप्रतीतेः खपुष्पाभाव एव खपुष्पशब्दस्य वाच्यत्वान्मुख्यो ऽर्थ इति संसर्गस्यैव वाच्यत्वं पराभिमतमभ्युपेत्य लोके गौणस्य मुख्यपूर्वकत्वप्रसिद्धेर्मुख्यार्थान्तराभावेन गौणतानेन निरस्यते। नन्वारोपितस्य मृगतोयादेर्लोके मुख्यत्वप्रसिद्ध्यभावात्पारिशेष्याद्गौणतैव स्यात् इत्याशङ्क्याह * प्रथमेति * गौणमुख्यव्यवहारे मुखवत् प्रथमं प्रतीय-

१ एवं प्रतीति २ पु० पा०।

मानं मुख्यत्वेन प्रसिद्धमित्याशयः । ऊहितां शङ्कामुद्घाटयति * कथमिति * आरोपिते मुख्यत्ववत् गौणत्वस्याप्यप्रसिद्धेस्तुल्यत्वमाह * तुल्यमिति * नन्वसतो गुणयोगासम्भवान्माभूत्तन्निमित्तं गौणत्वमारोपनिमित्तं तु भविष्यतीत्याशङ्क्याह * यत्र हीति * आरोप्याश्रयस्य देवदत्तादेर्गौणत्वं प्रसिद्धं नारोप्यस्य सिंहत्वादेरित्यर्थः । नन्विहाप्यारोप्यस्य खपुष्पस्य गौणत्वासम्भवे ऽप्यारोप्याश्रयस्यात्मनो गौणत्वं भविष्यतीत्याशङ्क्याह * खपुष्पं चेति * खपुष्पमात्मेति गौणप्रयोगवादिमते आरोप्यखपुष्पाश्रयत्वेनाभिमतस्यात्मनो ऽप्यसत्त्वाद्भेदाधिष्ठानत्वेन चाश्रयाश्रयिभावस्य खपुष्प एव खपुष्पारोपस्यानाशङ्कनीयत्वात् आश्रयानपेक्षकेवलारोप्यमात्ररूपतया खपुष्पस्यारोपितार्थाश्रयस्वरूपलोकप्रसिद्ध्यनुसारिलक्षणायोगात् आरोपितार्थवृत्तिशब्दविषयत्वमेवारोपवादिना लक्षणं वाच्यं तच्च मुख्ये ऽपि सिंहत्वादावारोपवादिमते ऽस्तीति अतिव्यापकं लक्षणं स्यादारोपितार्थाश्रयत्वं तु खपुष्पमात्मेति प्रयोगे ऽनुपपत्तेरव्यापकमिति तात्पर्यार्थः । एवमविद्यमानमेव खस्य पुष्पस्य च संसर्गमारोप्य खपुष्पाभावे खपुष्पशब्दप्रवृत्तेरारोपितार्थवृत्तित्वं शब्दस्य गौणत्वलक्षणमारोपितार्थवृत्तिशब्दविषयत्वं चार्थारोपवाद्यभिमतमित्यङ्गीकृत्य सिंहत्वे ऽपि सिंहशब्दस्य गौणत्वापत्तेर्दूषणे ऽभिहिते ऽप्यारोपवादी स्वाभिमतमारोपिताश्रयत्वमर्थस्य गौणत्वलक्षणं मनसिकृत्वा खपुष्पस्याप्यारोपितघटादिसत्ताश्रयत्वाद् गौणत्वमस्त्येवेति नाव्यापकत्वं लक्षणस्येति शङ्कते * तत्रैतत्स्यादिति * आत्मन्यारोपितसत्ताकत्वरूपखपुष्पगुणदर्शनेन देवदत्ते सिंहत्ववत् खपुष्पत्वारोपोपपत्तेः । खपुष्पमात्मेति अत्रापि गौणप्रयोगलक्षणसद्भावादव्यापकत्वमनाशङ्क्यमेवेति भावः । विद्यमानस्य घटादेर्यत्सद्रूपं तत्तत्र खपुष्पाद[illegible]ते प्रातिपदिकार्थः सत्तेति सर्वप्रातिपदिकानां सत्तावाचित्वस्मृतेः । ततश्चारोपितसत्तारूपार्थाश्रयत्वात् खपुष्पादेर्गौणतास्त्येवेत्यर्थः । सर्वप्रातिपदिकानां सत्तावाचित्वस्याकृत्यधिकरणे निरस्तत्वात् स्मृतेश्च लिङ्गसंख्यान्वययोग्यसिद्धरूपार्थप्रतिपादनमात्रपरत्वात् यदि परं प्रतीतिबलेन खपुष्पशब्दस्य सत्तावाचित्वं वक्तव्यं न च खपुष्पादिशब्दात् सद्रूपप्रतीतिरस्तीति निराकरोति * तदिति * नन्वेवं सति पदात्सदसत्साधारणरूपार्थप्रतीतेरभावस्यापि खपुष्पशब्दवाच्यत्वं न स्यात् । अथ सदसत्साधारणपदार्थस्वरूपमात्रवाचिनो ऽपि पदस्य व्यवहारयोग्यार्थाभिधाने तात्पर्यात् साधारणस्वरूपस्य च व्यवहारायोग्यत्वात् अभाववाचितेष्यते । तथा सति

खपुष्पं नास्तीति असद्रूपस्य खपुष्पस्य निषेधे सद्रूपत्वापत्तेर्नि-
षेधान्वयसिद्ध्यर्थं खपुष्पशब्दस्य सद्रूपताभिधायितैवेष्टेत्याशङ्क्याह
अवश्यं हीति यदि कश्चिदाकाशस्यानन्तदेशगतत्वान्न क्व चिद्दे-
शे पुष्पमस्तीत्यवधारणाऽशक्तेः । खपुष्पशब्दस्याभावेन सम्बन्धग्रहणा-
ऽयोगाद्भावा ऽभावसन्देहे ष्वाभावज्ञानस्य भावज्ञानसापेक्षत्वात् स-
द्रूपेणैव खपुष्पस्यानुभवमाशङ्केत तं प्रत्युदाहरणान्तरं निषेधान्वय-
स्तु समासार्थकथनार्थो भविष्यतीत्याशयः । ननु घटादेः सद्रूपस्यैव
वाच्यत्वदर्शनात् शशविषाणादेरपि वाच्यत्वसिद्ध्यर्थं प्रमाणानवगत-
मपि सद्रूपत्वं घटादिगतमारोपयिष्यते इत्याशङ्क्याह * न चेति *
सम्बन्धिग्रहणपूर्वकसम्बन्धग्रहणापेक्षत्वात् वाच्यत्वस्य यो ऽर्थो येन
रूपेण सम्बन्धिग्रहणकाले गृहीतस्तेनैव रूपेण तस्य सम्बन्धग्रहणा-
त्तद्वाच्यत्वं न्याय्यं न चार्थान्तरस्य सद्रूपत्वग्रहणामात्रेण खपुष्पादौ स-
द्रूपेण सम्बन्धग्रहणं सम्भवतीत्यर्थः । नन्वभ्रद्वारा खपुष्पशब्दस्या-
र्थप्रतिपादकत्वात्तयोश्च सद्रूपेण खेन पुष्पेण च सम्बन्धानुभवात्तद्रू-
पप्रत्ययोपपत्तिरित्याशङ्क्याह *ययोरिति* सामासार्थो ऽत्र चिन्त्यते न
चासौ सद्रूपतया सम्बन्धग्रहणं विना सद्रूपतयाभिधातुं शक्यतइति
भावः । ननु सद्रूपत्वेनाप्रतीतस्य शशविषाणादेरप्रसक्तत्वान्निषेधो न
युज्येतेत्याशङ्कते * कथं तर्हीति* सद्रूपप्रतीतावपि निषेधानुपपत्ति-
साम्यमाह * सादिति * सद्रूपत्वेनापि प्रतीतस्य घटादेर्देशान्त-
रादौ निषेधदर्शनादात्यन्तिकेत्युक्तम् एतदेव विवृणोति * पश्येति*
शशविषाणादौ देशकालाद्यवच्छेदाप्रतीतेरविशेषेण सर्वत्र भावा-
भावप्रसङ्गादेकत्रैवेत्युक्तम् । ननु वस्तुवृत्त्यैकत्र सदसद्रूपत्वासम्भवे
ऽप्यारोपेण सद्रूपतया प्रतीतस्यैकत्र शुक्तिरजतवदविरुद्धो निषेध
इत्याशङ्कते * तेनेति* येन कारणेनैकत्र वस्तुवृत्त्या सदसत्त्वे विरु-
ध्येते तेनैव कारणेन सद्रूपत्वमारोप्यतइत्युक्तमिति शेषः । खपु-
ष्पे वान्यदारोप्येत खपुष्पं वान्यत्र तस्य त्वसिद्धसद्भावत्वान्नारो-
प्याश्रयत्वेनारोप्यारोपविषयत्वं युक्तमित्याह * नेति * यथापवरके
घटो नास्तीति निषेधो ऽपवरकाख्यस्य निषेधाश्रयस्य निषेध्यघटप्रदे-
शात् प्रदेशान्तरस्य सद्भावं निषेध्यस्य च घटस्य प्रदेशान्तरे सद्भा-
वमपेक्षते तथारोप्ये ऽप्यारोप्याश्रयस्योषरादेरारोप्य तोयादिप्रदेशा-
न्नद्यादेः प्रदेशान्तरस्य सद्भावमारोप्यस्य च तोयादेः प्रदेशान्तरे
नद्यादौ सद्भावमपेक्षते इति प्रदेशान्तरसद्भावशब्दस्यावृत्त्या षष्ठीसमा-
सं सप्तमीसमासं चाङ्गीकृत्य योज्यम् । ननु यद्यपि खपुष्पस्यात्यन्ता-
सत्त्वान्न घटादिसत्तायास्तस्मिन्नारोपस्तस्य वा घटादावारोपः सम्भ-

वति तथापि वृक्षादौ ज्ञातसद्भावस्य पुष्पस्याकाशे ऽध्यारोपो भविष्यतीत्याशङ्क्याह *न चेति* खपुष्पशब्दस्य केसरादिमद्रूपाकाशावयवपरिमाणवाचित्वाद्वृक्षादिपुष्पस्य च ताद्रूप्याभावेन ततो ऽन्यत्वाद्नान्यस्य वृक्षादिपुष्पस्य सद्भावेनान्यस्याकाशावयवसन्निवेशविशेषरूपपरिमाणात्मकस्यात्यन्तासत्ताकस्यारोपः सम्भवतीत्यर्थः । ननु यथा केशों ऽड्कादौ मनुष्यमस्तकादिगतकेशेभ्यो ऽन्यत्वे ऽप्याकाशावयवसंनिवेशविशेषरूपपरिमाणात्मकानामत्यन्तासतां केशानामारोपो दृष्टस्तथेहापि भविष्यतीत्याशङ्क्य * असम्बन्धादित्युक्तम् * तिमिरादिविरलीकृता लोकाविच्छिन्नास्तमो ऽवयवास्तत्रात्यन्तसौक्ष्म्यकार्ष्ण्यादिदैर्घ्यादिगुणसम्बन्धेन सादृश्यात् केशरूपतया ऽऽरोप्यन्ते खपुष्पवृक्षपुष्पयोस्तु सदसद्रूपताया कथं चिदवयवसामान्यसम्बन्धाभावेनासादृश्यान्न केशों ऽड्कादितुल्यतेत्याशयः । यद्वान्यस्यारोपाश्रयभूतस्यावाकाशस्य सद्भावेनान्यस्यात्यन्तासतः खपुष्पस्यारोपो न सिध्यति सदसतोरेकधर्मसम्बन्धाभावेनासादृश्यादित्यर्थः । अथ वा प्रदेशान्तरस्यारोप्याश्रयस्य खपुष्पस्यासत्त्वात् न घटादिसत्तायास्तस्मिन्नारोपः सम्भवतीति पूर्वग्रन्थेनोक्ते खपुष्पस्यैव तर्हि घटादावारोपो ऽस्त्वित्याशङ्क्यान्यस्य प्रदेशान्तरस्य घटादेः सद्भावमात्रेणान्यस्यारोपविषयस्य खपुष्पस्यारोपो न सिध्यति खपुष्पस्य घटादिनैकधर्मसम्बन्धाभावेनासादृश्यादित्यनेन ग्रन्थेनोच्यते यद्यपि ध्वनिधर्माणामसदृशेष्वपि वर्णेष्वभिव्यङ्ग्याभिव्यञ्जकत्वसम्बन्धनिमित्तारोपदर्शनात् पित्तधर्मस्य च पीतत्वस्य चाक्षुषरश्मीनां शङ्खप्राप्तौ रश्मिसंयुक्तानां पित्तावयवानामपि शङ्खप्राप्तेः शङ्खसंयुक्तसमवायनिमित्तारोपदर्शनात् सादृश्यादिना केन चित्सम्बन्धेनारोपो भवति न सम्बन्धं विनेति दर्शयितुम् *असम्बन्धादित्युक्तम् * तथापि द्रव्यस्य द्रव्यान्तरे सादृश्यं विनारोपादर्शनात् सादृश्याभावार्थत्वेन व्याख्यातम् । ननूषरेण तोयस्य सादृश्यादिना केन चित्सम्बन्धाभावात् कथं तत्र तोयादेरारोप इत्याशङ्कते * कथमिति * तोयस्य सद्रूपत्वे सादृश्यादिसम्बन्धसद्भावात् शौक्ल्यचञ्चलत्वादिधर्मकरश्मिसंयुक्तेनोषरेण सह साक्षात् सादृश्याभावे ऽप्यूषरसंयुक्तरश्मिसादृश्यादारोपोपपत्तिरित्याशयेन परिहरति * प्रदेशान्तरेति * खपुष्पस्यासम्भवादारोपासम्भवे ऽभिहिते तोयस्याप्यसम्बन्धादारोपो न स्यादित्याशङ्कार्थप्रतीतेरत्यन्तासत्त्वाभिप्रायस्य च प्रत्यक्षविरोधेनानुपपत्तेस्तन्निरासार्थं तोयस्य सद्भावादूषरसम्बन्धप्रतीतेरिति

१ असंबन्धादिति २ पु० पा० ।

व्याख्येयम् । सम्बन्धानपेक्षणे च तत्रासतो ऽत्यन्तासतश्च विशेषा-
भावात्तत्रासदपि भ्रान्तौ प्रकाशते ऽत्यन्तासत्तु न प्रकाशते इति व्य-
वस्थाहेत्वभावात्परिभाषामात्रापत्तेरत्यन्तासतो ऽपि शुक्तिरजतता-
दात्म्यस्य प्रकाशनदर्शनात् प्रदेशान्तरसत्ताया न कश्चिदुपयोगः।अत
एव च अज्ञातगुणसत्ताकमित्यत्र गुणग्रहणं कृतम् । ननु शशविषा-
णस्य निषेधानुपपत्तौ शशविषाणं नास्तीति नास्तिशब्दप्रयोगः कथं घ-
टतेत्याशङ्कते * कथमिति * नायं नास्तिशब्दो निषेधार्थः किं त्व-
नुवादमात्रमिति परिहरति * पूर्वेणेति * अप्राप्तस्यानुवादानुपप-
त्तिमाशङ्क्य * पूर्वेणैवेत्युक्तम् * प्रमाणान्तरेण कदा चिच्छशशृङ्गा-
नुपलब्धेः । शशे विषाणमस्तीति विग्रहवाक्यार्थे समासायोगाद-
भावाख्यप्रमाणावगतस्यात्यन्ताभावस्यैव सम्बन्धग्रहणसम्भवात्समा-
सार्थत्वोपपत्तेः। शशे विषाणं नास्तीति विग्रहवाक्यार्थे ऽन्तर्णीतनि-
षेधो ऽयं समासश्चन्द्राननमित्यन्तर्णीतवत्यर्थो यथेति अवधारणाच्छ-
शविषाणशब्दस्यात्यन्ताभाववाचित्वप्रतीतेः । शशविषाणशब्देनैव
भावावगमान्नास्तिशब्दस्यानुवादत्वोपपत्तिरित्यर्थः। अनुवादमात्रानर्थ-
क्यापत्तेरपरितोषादभावसामान्यस्य नास्तिशब्दोक्तस्य विशेषणार्थो
ऽत्यन्ताभावाख्यविशेषवाचिशशविषाणप्रयोग इति परिहारान्तरमा-
ह * अथ वेति * नन्वीदृशएव विशेषणविशेष्यभावो न तु वि-
परीत इति कथं निश्चयमत आह * नेति * अर्थद्वारशब्दयोर्विशे-
षणविशेष्यभावः । न चाभावसामान्येनात्यन्ताभावाख्याविशेषरूपं श-
शविषाणं विशेष्यते गोत्वादिसामान्यं हि बाहुलेयादिविशेषान्तरे
व्यभिचाराच्छाबलेयादिविशेषेण विशेष्यमाणं दृष्टं विशेषस्य व्यभि-
चारात् सामान्येन विशेषणं न युक्तमित्यर्थः । एवमपि शशविषाणा-
दिशब्दादेव कर्कादिवद्व्यभिचाराभावेन विशेषान्तर्गतसामान्यप्र-
तीतेरपि सिद्धेर्नास्तिशब्दानर्थक्यमपरिहार्यमित्यपरितोषात्प्रमाणा-
न्तरेण शशे शृङ्गाप्रतीतावपि शशविषाणशब्दादेव वस्तुतो ऽत्यन्त-
भाववचनादपि भ्रान्तस्य संसर्गप्रतीतिं वारयितुम् अयं निषेध इति
परिहारान्तरमाह * अथ वेति * नन्ववयवार्थग्रहणे षष्ठ्यर्थ- ३२४।१
स्मृतिप्रसङ्गे ऽपि योग्यानुपलब्ध्या शशस्य शृङ्गराहित्यावगमात्
कथं संसर्गभ्रान्तिरित्याशङ्क्य * न चेत्युक्तम् * एवं त्वाभाव-
वाचित्ववादिनं प्रति प्रयोगानुपपत्तेरपरिहारेणापरितोषात् स्वमतेन
समासार्थकथनार्थत्वं नास्तिशब्दस्य द्योतयितुमाह * अथ वेति *
शशे विषाणं नास्तीति विग्रहवाक्यसूचनार्थम् * विनैवेत्युक्तम् *
शृङ्गोत्पत्त्याश्रयत्वे निषेधविवक्षासूचनाय *अधिकरणत्वेनेत्युक्तम्*

विषाणस्याधेयत्वाविवक्षायामपि प्रथमाया एव प्रयोज्यत्वात्तस्याश्च निर्देशार्थत्वेनैव प्राप्तेर्विषाणं च निर्दिश्येतेत्येतावदुक्तम्। नन्वसतो ऽध्यारोपं विनाधेयत्वनिर्देशायोगात् परपक्षापत्तिरित्याशङ्क्य * गवादीत्युक्तम् * शशगतस्य शृङ्गस्य निर्देशो नारोपं विना युज्येत गवादिगतस्य तु प्रमाणसिद्धत्वान्नारोपापेक्षेति भावः । गवादिगतस्य निषेधानुपपत्तिमाशङ्क्य निषेधभूतस्य शशसम्बन्धविषयत्वं वक्तुम् *तयोरित्युक्तम्* शशविषाणयोः सम्बन्धस्याप्रसक्तेर्निषेधानर्थक्यमाशङ्क्य शशविषाणस्यात्यन्ताभावेन सह वाच्यवाचकसम्बन्धकथनार्थत्वसूचनार्थं तेनैवेत्युक्तम्। चन्द्राननेन समासार्थकथनार्थं चन्द्र इवाननमिति विग्रहवाक्यवच्छशविषाणसमासार्थकथनार्थेन शशे विषाणं नास्तीति विग्रहवाक्येनानुभूतस्य सम्बन्धस्य श्रोतुः शशविषाणशब्दः तद्वाक्यप्रतिपाद्यमेवात्यन्ताभावं गमयिष्यतीत्येतदर्थं नास्तिशब्दप्रयोग इति व्यवहितेनान्वयः । क्रियायां च क्रियार्थायामिति लृङः क्रियार्थक्रियोपपदनिमित्तत्वात् गमयिष्यतीत्येतदर्थमित्यर्थो लभ्यते शशविषाणं नाम किमित्यपेक्षायामेकदेशेन विग्रहवाक्यसूचनार्थं नास्तीति शब्दप्रयोग इति तात्पर्यार्थः । शशे विषाणं नास्तीति विग्रहवाक्यस्य निषेधपरत्वमभ्युपगम्य समासार्थकथनप्रयोजनं तेनैवानुभूतसम्बन्धस्येत्यनेन सूचितम्। वस्तुतस्तु भावान्तरमभावो ऽन्यो न कश्चिदनिरूपणादित्यनेन न्यायेन भावनिरपेक्षस्याभावस्य वक्तुमशक्यत्वात् शृङ्गाकारेण परिणतः शशमूर्द्धैव भावरूपो विग्रहवाक्यार्थ इति निषेधार्थत्वाभावान्नारोपापेक्षेत्याह * अथ वेति * ततश्च शशविषाणं नास्तीत्यत्राप्येकदेशेन समासार्थकथनार्थविग्रहवाक्यसूचनार्थस्य नास्तिशब्दस्याप्यसावेव विषय इति निषेधार्थत्वाभावादारोपाभावे ऽपि प्रयोगाविरोध इति निषेधार्थत्वाभावादारोपाभावे ऽपि प्रयोगाविरोध इति कथं तर्हि शशविषाणं नास्तीति प्रयोग इत्याशङ्कानिरासमुपसंहरति * इतीति * भावस्यापि नास्तिबुद्धिविषयत्वं दृष्टान्तेनोपपादयितुं वृद्धसम्मतिमाह * तथा चेति * तिष्ठतेर्गतिनिवृत्तौ स्मरणे ऽपि पूर्वां सन्ध्यां जपंस्तिष्ठेदित्यादावूर्ध्वावस्थाने प्रयोगाद्वस्तुवाचितोक्ता । स्वातन्त्र्यमात्रं चाभावस्य नास्तीति अभिप्रेतं न सर्वात्मना निरूपणाभावः सदसद्विवेकाभावप्रसङ्गादिति । एवं तवैवायं दोष इत्यनेनारोपितार्थवृत्तित्वस्य गौणत्वलक्षणस्याव्यापकत्वं दोषं प्रतिज्ञातम् । खपुष्पस्यात्मन्यारोपायोगात्तदारोपेण खपुष्पस्यात्मनि वृत्त्यनुपपत्तेः खपुष्पमात्मेति गौणप्रयोगे लक्षणासम्भवेनोपपाद्यम् । नन्वेवं सति खपुष्पादीनां स्वार्थाविनाभू-

तद्गुणाभावात् गौणप्रयोगाभावप्रसङ्ग इत्यनेनाशङ्कितं गुणायोगनिमित्तवृत्तित्वस्य गौणलक्षणस्याव्यापकत्वं परिहरति * तेनेति * आरोपितस्य खपुष्पादेर्गुणायोगाद्वास्तवत्वप्रतिपादनार्थो लब्धशब्दः मुख्यार्थान्तराभावादित्यादिनोपपादितस्य मुख्यत्वस्य गौणप्रयोगोपपादनोपयोगसूचनार्थो मुख्यशब्दः । येन कारणेन लब्धो वास्तवो ऽत्यन्ताभावाख्यो वाच्यो ऽर्थः शशविषाणादिशब्दानां तेनान्यत्राप्यात्मादौ शशविषाणमात्मेति गौणः प्रयोगः सिद्ध इत्यर्थः । तन्निमित्तगुणाभिधानार्थम् । प्रसिद्धीत्युक्तम् । वस्तुतः सद्रूपत्वेन या प्रसिद्धिः ततो ऽन्येन प्रकारेणाद्रूपत्वेनावस्थानं नाम खपुष्पादेर्गुण इति भावः । मुख्यशब्दसूचितम् मुख्यत्वस्य गौणत्वोपयोगं प्रकटयितुमाह * तव त्विति * आरोपवादिनो ह्याकाशस्य पुष्पस्य च संसर्गः खपुष्पशब्दस्य मुख्यो ऽर्थो ऽभिमतः । तस्य च वस्तुतो ऽसत्त्वात्तत्पूर्वको गौणो न सिध्येदिति भावः । लब्धमुख्यार्थानामिति मुख्यशब्देनैव न चैतस्य लोके गौणत्वप्रतीतेरिति खपुष्पगौणत्वप्रतीतेरिति खपुष्पगौणत्वनिरासस्यार्थाद् गौणप्रयोगोपपादनोपयोगं सूचितं प्रकटयितुमाह * यदि चेति * पुष्पाकाशयोः संसर्गारोपेण स्वार्थे ऽत्यन्ताभावे खपुष्पशब्दस्य गौणतारोपवादिनो ऽभिमता तथा च सत्यात्मनि गौणत्वं न स्यादित्यर्थः । एतदेवोपपादयति * न हीति * नन्वग्निशब्दस्यापि गौणमाणवकद्वारान्यत्र गौणत्वं कस्मान्न भवतीत्याशङ्क्य षाष्ठं न्यायमाह * तथा चेति * प्रतिनिधावुपात्ते ऽपचरिते प्रतिनिधिसदृशमुपादेयं मुख्यसदृशं वेति सन्देहे प्रतिनिधेरुपात्तत्वेन शास्त्रपरिगृहीतत्वात्तादृशोपादाने प्राप्ते वचनात्त्वन्याय्यमभावे तत्सामान्येन प्रतिनिधेरभावात् इतरस्येति सूत्रादभावे तत्सामान्येन प्रतिनिधिरिति पदत्रयानुषङ्गेण प्रतिनिधावुपात्ते तदभावेन तत्सामान्येन प्रतिनिधिर्नोपादेयः मुख्याचयवोपादित्सयोपात्तस्यापि प्रतिनिधेरचोदितत्वेनेतरसाम्यादिति षष्ठे वक्ष्यते तेनैव न्यायेन माणवकस्याप्यवाच्यत्वसामान्यान्नाग्निशब्दस्य तद्द्वारा ऽन्यत्र गौणतेत्याशयः । यदप्यसद्रूपस्यारोपाभावे सांख्यादिकल्पितप्रधानादिनिषेधो न * सम्भवतीत्युक्तम् * तदप्यनुभाषणपूर्वकं परिहरति * ये ऽपीति * परमाणुकारणवादिभिर्वैशेषिकैः परमाणुभ्यो ऽन्यदेव प्रधानरूपं शरीरात्मवादिभिश्चार्वाकैः शरीरादन्यादृगात्मरूपं शरीराद्वीत्यादिशब्दोपात्तज्ञानसन्तानात्मवादिभिर्बौद्धैर्ज्ञानसन्तानादन्यादृगात्मादी-

१ पूर्वपक्षमूतादात २ पु॰ पा॰ ।

त्यादिशब्दोपात्तपृथिव्यप्तेजोवाय्वाख्यचतुष्टयतत्त्ववाचिभिश्चार्वाकै-स्तेभ्यो ऽन्यादृक्रूपशब्दोपलक्षितमाकाशादितत्त्वं नास्तीति वर्ण्यत-इति योज्यम् । श्लोकं व्याचष्टे * प्रधानादीति * एवं स्वार्थाभिधा-नेनेति भाष्यमुपसंहारार्थत्वेन व्याख्यातुमाह * तस्मादिति * ए-वमिति गुणाश्रया इति सूत्रावयवसूचितं गौणवृत्तिलक्षणाभिधाना-र्थं कथमगुणवचनो गुणं ब्रूयादिति भाष्यं व्याख्याय प्रकृतोदाहरणे कीदृशो गुणसम्बन्ध इति प्रश्नोत्तरत्वेन तत्सिद्धिशब्दव्याख्यानार्थं

३२५।२ इह त्विति भाष्यं व्याचष्टे * अतश्चेति * प्राप्नोति परमां सिद्धिमि-त्यादावीप्सिते कार्ये सिद्धिशब्दप्रयोगात्तस्य मुख्यस्यार्थस्य सिद्धिः कार्यमस्येति व्यधिकरणबहुव्रीहिणा तत्सिद्धिशब्देन तत्कार्यकारिता उक्तेति दर्शयितुं स्वार्थस्य यजमानस्य या सिद्धिः कार्यं * तत्कर-त्वमित्युक्तम् * भाष्यं तु कीदृशः प्रस्तरादेर्यजमानगुणसम्बन्ध इति पृष्टे यजमानसिद्धिकरः प्रस्तरादिरिति योज्यम् सर्वो हीत्यादिभा-ष्यं संक्षिप्य व्याचष्टे * प्रस्तरेति * तस्मादित्युपसंहारभाष्योपे-क्षया विध्यर्थवादविचारानादरः सूचितः । जात्यादिविषयभूतेष्व-प्याग्नेयाद्युदाहरणेषु विध्यर्थवादविचारोपक्रमस्य गुणवादनिमित्ता-भिधानावसरकरणार्थत्वान्न विध्यर्थवादविचारे ऽभिनिवेष्टव्यम् । इति सूचयितुमाह * एतेनेति * तत्सिद्धेर्गुणवादनिमित्तत्वाभिधानेन जात्यादीन्यपि तन्निमित्तत्वेन व्याख्यातानीत्यर्थः ।

॥ आग्नेयादिशब्दानां ब्राह्मणस्तुत्यर्थत्वाधिकरणम् ॥ १३ ॥

जातिः ॥ २२ ॥

भाष्योक्तोदाहरणं दूषयति * तत्रेति * अर्थवादान्तरोक्तप्रजापति-मुखाद्येकप्रकृतिप्रभवत्वेन ब्राह्मणादीनामग्न्यादिभिर्भ्रातृवत्[1] सम्बन्ध-सद्भावादर्थवादोक्तस्यापि च सम्बन्धस्यान्यैः स्तुवतइत्यादिषु मुख्य-शब्दप्रवृत्तिनिमित्तत्वदर्शनात् ब्राह्मणादिष्वाग्नेयादिशब्दानां मुख्यते-त्याशयः । ननु देवतातद्धितस्येह मुख्यत्वं न सम्भवतीत्याह * ये-नेति * सर्वत्राग्निकलिभ्यां ढगिति सम्बन्धमात्रे ऽग्निशब्दात् ढक्-स्मृतेस्तस्येदमिति चाण्प्रत्ययस्यापि तन्मात्रे स्मृतेर्नायं देवतातद्धित इति भावः । त्रैवर्णिकानां वा यागाधिकारित्वाद्यागदेवताभिराग्ने-यादिभिर्देवतासम्बन्ध एव वक्तुं शक्यतइत्याह * देवतेति * ननु देवताशब्दस्य सम्बन्धिशब्दत्वात् प्रतिसम्बन्धित्यज्यमानं हविरेवापे-क्ष्य प्रवृत्तेः शिष्यस्यैव गुरुसम्बन्धवत्तत्[2] विषयएवं देवतासम्बन्धो

१ भ्रातृत्वेति २ पु० पा० ।

२ विषयस्थाने हविषइति २ पु० पा० ।

नान्यस्येत्याशङ्क्याह * न हीति * त्यक्तारमपेक्ष्य देवताशब्दस्याप्रवृत्तावपि देवतोद्देशपूर्वकद्रव्यत्यागाख्यैकक्रियाविषयनियमलक्षणत्वात् द्रव्यदेवतयोः सम्बन्धस्यैतस्य च त्यक्त्रपेक्षत्वात् येन देवतोद्देशपूर्वकद्रव्यत्यागाख्यैकक्रियासम्बन्धेन द्रव्यस्य सम्बन्धिनी देवता तेनैव त्यक्तुरपीत्यर्थः । त्यक्तुरपि देवतासम्बन्धे भाष्यकृतः संमतिमाह * यथेति * आग्नेयो ब्राह्मणः स सोमेनेष्ट्वा ऽग्नीषोमीयो भवति यदेवादः पौर्णमासं हविस्तत्तर्ह्यनुनिर्वपेत्तर्हि स उभयदेवतो भवतीत्यनेन सोमयागादूर्ध्वं ब्राह्मणो ऽग्नीषोमदेवतो भवतीत्यभिधानादग्नीषोमीयहविर्मात्रमुत्कृष्यते न दर्शपौर्णमासौ नापि नापि कृत्स्ना पौर्णमासीत्युक्तेः कथं पुरुषस्य देवतान्वय इत्याशङ्क्यैतत्पश्चमे भाष्यकृतोक्तं दूषणमुपसंहरति * तस्मादिति * स्वयमुदाहरणान्तरमाह * अत इति * नन्वग्न्यादिगुणस्य ब्राह्मणादिष्वदर्शनात् कथमत्र गौणप्रयोगोपपत्तिरित्याशङ्क्याह * अग्निरिति * भाष्यकृता गुणवादनिमित्ताभिधानावसरार्थे को गुणवाद इत्यनेन वादशब्दमुद्यतइति कर्मव्युत्पत्त्या ऽभिधेयवाचिनमङ्गीकृत्य कर्मधारये को गुणो विवक्षित इति पृष्ट्वाग्निसम्बन्ध इत्यनेनाग्नेयशब्दवाच्यस्याग्निदेवत्यस्य हविषो ऽग्निसम्बन्धो गुणो ब्राह्मणे विवक्षित इत्युत्तरे दत्ते कथं ब्राह्मणस्याग्निसम्बन्ध इति पृष्ट्वा तदुत्तरत्वेन जातिशब्दव्याख्यानाय * एकजातीयत्वादित्युक्तम् * तत्सामान्यवाचितया जातिशब्दव्याख्यानार्थमिति शङ्कां निवर्त्तयितुमाह * जातिरिति * जातिशब्दस्याद्यभावविकारवाचित्वज्ञापनार्थं जन्मेत्युक्तं जायते ऽस्मादिति व्युत्पत्त्या प्रकृतिवाचित्वज्ञापनायोपादानशब्देनोत्पत्तिहेतुः प्रकृतिरुक्ता । तच्छब्दानुषङ्गेण तस्य मुख्यस्याग्नेर्या जातिः प्रकृतिः सैव यस्य ब्राह्मणस्य जातिरिति पूर्ववद्व्यधिकरणबहुव्रीहिणा तज्जातिशब्देन द्वयोरेकजातीयतोक्ता भवतीति कृत्वैकजातीयत्वं भाष्यकृतोक्तम् । ननु संसारानादित्वेनाग्निब्राह्मणादेः प्रजापतिमुख्यादिप्रकृतिकत्वं नास्तीति किमेकजातीयकत्वमिति भाष्येणाशङ्कार्थवादोपन्यासस्याशङ्कानिरासार्थत्वं सूचयितुमाह * यद्यपि चेति * अन्तरशब्देनाग्नेयो ब्राह्मण इत्यस्याग्नेयमष्टाकपालं निर्वपेत् ब्राह्मणो ब्रह्मवर्चसकाम इति विध्यन्तरशेषत्वेनार्थवादत्वसिद्धान्तानुसन्धानं सूचितम् । एकस्मिन्निति भाष्यतात्पर्यं वक्तुमिहेत्युक्तम् । इहोदाहरणे ऽग्न्यादिशब्दस्य ब्राह्मणादौ प्रवृत्तिनिमित्ततां प्रतिपत्स्यतइत्यर्थः । स्वरूपार्थस्त्वग्निर्हीत्यनेनैवानागतावेक्षणेनोक्तः ॥

॥ युपादिशब्दानां यजमानस्तुत्यर्थत्वाधिकरणम् ॥ १४ ॥

सारूप्यात् ॥ २२ ॥

लिङ्गसमवाया इति द्वन्द्वसमासे प्रथमाबहुवचनदर्शनात् तत्सिद्धिश्च जातिश्च सारूप्यं च प्रशंसा च भूमा च लिङ्गसमवायश्चेति प्रथमयैव सर्वत्र विगृहीतव्ये ऽपि प्रस्तरादेर्यजमानादिसारूप्यं तत्कार्यकरत्वादिधर्मसामान्यात् सम्भवदपिशब्दस्य तत्कार्यकरत्वादिमात्रे पर्यवसानेन शाब्दबुद्धिविषयत्वाभावात् अविषयस्य च प्रतिपादनात्मकशब्दप्रवृत्तिनिमित्तत्वायोगात् न शब्दप्रवृत्तिनिमित्तं यूपस्य त्वादित्ययजमानसारूप्यं शब्दप्रतीतिविषयत्वाच्छब्दप्रवृत्तिनिमित्तमिति वैषम्यं दर्शयितुं पञ्चम्यध्याहृता गुणाश्रयत्वेन सर्वेषां गौणत्वनिमित्तत्वे ऽभिहिते पुनः सारूप्यस्य निमित्तत्वाभिधानाच्छाब्दबुद्धिविषयत्वात्मकनिमित्तत्वविशेषप्रतीतमेवाशयं शङ्कापूर्वकं विवृणोति * नन्विति * सारूप्यं विना गौणत्वाभावात्तस्य गौणत्वनिमित्तत्वे ऽपि बोधकत्वातिरिक्तायाः शब्दस्य वृत्तेरभावान्निर्विषयायाश्च बुद्धेरसम्भवाच्छाब्दबुद्धिविषयस्यैव शब्दवृत्तिनिमित्तत्वं वाच्यम् । न शब्दतात्पर्यावधारणं विना शाब्दबुद्धिविषयत्वं युक्तम् । तत्कार्यकरत्वादिनिमित्ते च सारूप्ये तन्मात्रपर्यवसितस्य शब्दस्य तात्पर्यावधारणमशक्यम् । इह तु प्रत्यक्षत्वेन सारूप्यस्य प्रथमं प्रतीतेस्तत्रैव शब्दस्य तात्पर्यावधारणाच्छाब्दबुद्धिविषयत्वेन शब्दप्रवृत्तिनिमित्तत्वं युक्तमित्याशयः । चक्षुर्ग्राह्ये सादृश्ये तात्पर्याख्यविवक्षावधारणसम्भवात् शाब्दबुद्धिविषयत्वरूपशब्दप्रवृत्तिनिमित्तत्वविशेषाभिधानार्थं तत्कार्यकरत्वादिहेतुकेभ्यः सद्भावमात्रेण गौणत्वनिमित्तेभ्यः सादृश्येभ्यो ऽस्य पृथगसाधारण्येनेहोपादानमित्यर्थः । अशक्यत्वादिति सिद्धान्तभाष्यं यजमाने ऽपि पशोर्बन्धुं शक्यत्वात् अयुक्तमाशङ्क्याह * यजमानस्य हीति * खलेवालीवद्यूपस्यैव यूपकार्ये विधानात् यूपनिष्पत्तिमात्रापवर्गिणां धर्माणां निवृत्तावप्युत्तरवेदेः प्राग्देशे पशुधारणस्य निखननस्य च पशुनिरोधार्थत्वेन यूपकार्यान्तःपातात्तत्कार्यापन्ने यजमाने प्राप्ते दक्षिणोपविष्टस्य पदार्थकरणविरोधप्रसङ्गादशक्यतेति भावः । आदित्यस्य यूपकार्यार्थत्वनिरासः कस्मान्न कृत इत्याशङ्क्य स्पष्टत्वादिति सूचयितुमाह * सहस्ररश्मेस्त्विति * ननु दारुमय्यामादित्यप्रतिकृतौ शक्यं पशुबन्धनमित्याशङ्क्याह * यदि चेति * प्रतीयमानयूपोच्छ्रयणविध्येकवाक्यत्वत्यागापत्तिदोषसूचनार्थम् * नालिङ्ग्यादित्युक्तम् *
ननु श्येनचितं चिन्वीतेत्यादौ सादृश्यसम्पत्तेरपि विधिविषयता

दृष्टेत्याशङ्क्याह * तदिति * स्तुतौ गौणत्वसम्भवे विधौ तदाश्रयणं ३२६।१
न युक्तमित्याशयः ॥

॥ अपश्वादिशब्दानां गवादिस्तुत्यर्थत्वाधिकरणम् ॥ १५ ॥

प्रशंसा ॥ २२ ॥

गोअश्वान् प्रशंसितुमित्यादिभाष्यात् प्रशंसायाः प्रयोजनत्वेन रामस्येव वेतनदाने निमित्ततोक्तेत्याभाति तस्याश्च सर्वत्र प्रयोजनत्वाविशेषादिहोपादानमनर्थकमित्याशङ्कते * नन्विति * नात्र प्रयोजनत्वेन निमित्तत्वं विवक्षितं किं तु प्रसह्यकारित्वादिवदभिधेयलक्ष्यमाणगुणत्वेनेत्याशयेन परिहरति * फलमिति * ननु गवाश्वव्यतिरेकेष्वजादिष्वपि पशुशब्दप्रवृत्तौ प्रशंसाया निमित्तत्वं न सम्भवति गवाश्वावुपादेयत्वेन विहितौ प्रशंसितुमन्यान्येषां निन्दाया विवक्षितत्वात् इत्याशयेन कथं प्रशंसाप्रवृत्तिनिमित्तत्वमिति पृच्छति * कथमिति * नञ्समासावयवभूतस्य पशुशब्दस्य समासान्तर्गतत्या ऽजादिषु प्रवृत्तौ प्रशंसानिमित्तमित्याशयेनोत्तरमाह * गवेति * नञ्समासावयवभूतेन पशुशब्देन प्रशस्ततां लक्षयित्वा नञ्समासेनान्यपशुषु तदभावः कथ्यतइत्यर्थः । ननु पशुशब्दस्य नञ्समासे कृते निषेधपर्यवसायित्वादकृते च परशब्दत्वाभावान्न प्राशस्त्यलक्षणार्थता युक्तेत्याशङ्क्य * पूर्वमित्युक्तम् * समासविध्यर्थं तद्योग्यार्थलक्षणा गङ्गावास्यादिशब्दवदविरुद्धेत्याशयः । नन्वजादेरपि पयोदानाद्युपकारित्वेन प्राशस्त्यसद्भावान्निषेधानुपपत्तिरित्याशङ्क्य * गवेत्युक्तम् * गवाश्वान्यत्वोक्त्या तद्गतप्राशस्त्यातिशयलक्षणार्थतावसीयतइत्याशयः । उदाहरणान्तरविषयावादिशब्दौ। ननु पशुत्वाभाव एव नञ्समासेन कस्मान्न कथ्यतइत्याशङ्क्याह * नेति * पशुत्वस्यायं निषेधस्तल्लक्षितस्य वा यागादिकार्यस्य पुत्रकार्यमकुर्वतीव पुत्रे न ममैष पुत्र इति । तत्राद्ये प्रत्यक्षविरोधो द्वितीये ऽग्नीषोमीय इत्यादिवचनविरोध इत्यर्थः । अनेन चोत्पत्तिरनर्थिकास्यादिति भाष्यावयवगतेनोत्पत्तिशब्देन प्राथम्यगुणयोगात्पशुयज्ञसत्रग्राहिप्रत्यक्षमुक्तम् तस्य च निर्विषयत्वापत्तिः स्वरूपनिषेधे ऽनर्थिकेत्यनेनोक्ताम् कार्यनिषेधे वचनविरोधो विध्यन्तरं चेत्यनेनोक्त इति व्याख्यातम् । ननु विकल्पाङ्गीकरणेन विरोधः परिहरिष्यते ऽत आह * न चेति * नन्वगत्या वैषम्ये ऽपि विकल्पः स्यादित्याह * स्तुत्या चेति * न च मुख्यार्थत्यागापत्तेस्तुत्यर्थत्वासम्भवः । कार्यलक्षणायामपि तुल्यत्वादित्याह * तुल्य-

श्चेति * गवाश्वव्यतिरिक्तस्य च पशुकार्यकरत्वनिषेधे पारिशेष्यात् गवाश्वस्य पशुकार्यकरत्वसिद्धेस्तदुपादानानर्थक्यम् । प्राशस्त्यनिषेधे तु गवाश्वगतं प्राशस्त्याविषयत्वं निषेधस्य ज्ञापयितुं पशुशब्दस्य गवाश्वशब्दसामानाधिकरण्योपादानमनर्थकमित्याशयेनाह * पशव इति * ननु पशुस्वरूपस्य तत्कार्यस्य वा निषेधासम्भवे ऽपि पशुगता क्रिया गुणो वा अजादौ निषेत्स्यतइत्याशङ्क्याह * न चेति * पशुमात्रवर्तिक्रिया गुणसामान्यं वा निषिध्येत गवाश्वगताः क्रिया गुणविशेषा वा आद्ये पूर्ववत्प्रत्यक्षविरोधः द्वितीये योग्यानुपलब्धितो ऽपि ज्ञातुं शक्यत्वान्मन्दफलत्वम् अन्यगतस्य विशेषस्यान्यत्रासम्भवादन्यशब्देनैव सिद्धेरत्यन्तानर्थक्यमित्यर्थः । ननूक्तेन प्रकारेण नञ्समासस्य निषेध्यान्तरासम्भवात्प्राशस्त्यस्य निषेधकत्वे प्रशंसालक्षणार्थत्वाभावान्न प्रशंसोदाहरणत्वं युक्तमित्याशङ्कानिरासाय श्लोकगतपूर्वशब्दोक्तम् निषेधान्वयात् प्राक् समासावयवभूतेन पशुशब्देन प्राशस्त्योपादानमुपपादयति * अवश्यं चेति * नन्वेवं सति केवलस्य पशुशब्दस्य मुख्यार्थत्वसम्भवात्प्राशस्त्यलक्षणा न युक्तेत्याशङ्क्याह * न चेति * निषेधान्वयायोग्यत्वान्न मुख्यो ऽर्थः सम्भवतीत्याशयः । ननु प्राशस्त्यस्यापि क्रियागुणवत् पशुमात्रवर्त्तिनो निषेधाशक्तेर्गवाश्वगतस्य च प्राशस्त्यस्याप्रतीतेर्निषेधो न सम्भवतीत्याशङ्क्याह * शक्नुवन्ति चेति * गवाश्वशब्दसमभिव्याहारात् गवाश्वगतप्राशस्त्यातिशयप्रतीतिरित्यर्थः । ननु पशुशब्दोदाहरणे पशवो गो अश्वा इति गवाश्वपदसामानाधिकरण्येन पशुशब्दोपादानात्तद्गतप्राशस्त्यातिशयप्रतीतिसम्भवे ऽप्ययज्ञाऽसत्रशब्दोदाहरणयोः सामवच्छन्दोमवच्छब्दसामानाधिकरण्येन यज्ञसत्रशब्दानुपादानात्कथं तद्गतप्राशस्त्यातिशयप्रतीतिरित्याशङ्कानिरासस्सूचनयादिशब्दः सामरहितस्य वा यज्ञत्वे ऽभिहिते छन्दोमरहितस्य वा सत्रत्वे ऽभिहिते ऽर्थात् सामवान् यज्ञः छन्दोमवत्सत्रमिति सामानाधिकरण्यप्रतीतेः । सामवच्छन्दोमवत्तद्गतप्राशस्त्यातिशयावगतिः सम्भवतीत्याशयः । ननु पशुषु हिताहितविवेकराहित्यादिदोषदुष्टत्वेनाप्राशस्त्यस्यापि भावात्तस्यापि च निषेध्यत्वोपपत्तेरेकान्ततः पशुत्वेन प्राशस्त्यस्य लक्षयितुमशक्यत्वात् नेह प्रशंसाया गुणवादनिमित्तत्वाभिधानं युक्तमित्याशङ्क्याह * यद्यपीति * पुरस्तात्प्रतीचीनमश्वस्योपदधाति पश्चात्प्राचीनमृषभस्येति गवाश्वविधिप्रक्रमेण तदप्राशस्त्यानपेक्षितत्वात् तदपेक्षितगवाश्वप्राशस्त्यासिद्ध्यर्थं पश्वन्तरप्राशस्त्यस्यैव निषे-

धार्हतेत्यर्थः। ननु पश्वन्तरप्राशस्त्यनिषेधस्य तन्निन्दार्थत्वात् निन्दायाश्च विधिनानपेक्षणात् न गवाश्वविधिना ऽन्वयः सम्भवतीत्याशङ्क्याह *तदिति * गवाश्वप्राशस्त्यख्यापनार्था पश्वन्तरानिन्देत्याशयः। पश्वन्तरप्राशस्त्यनिषेधेन गवाश्वप्राशस्त्यख्यापनात्तेषामपि च प्राशस्त्यसद्भावेन तन्निषेधायोगात् कथं तद्द्वारेण गवाश्वप्राशस्त्यख्यापनमित्याशङ्क्य गवाश्वगतप्राशस्त्यातिशयः पश्वन्तरे निषिध्यतइति सूचनार्थस्तरप्प्रत्ययः पश्वन्तरस्य हि प्राशस्त्यातिशये निषिद्धे तत्सद्भाव एव गवाश्वस्य ख्यापितो भवति अनेन च गोअश्वान् प्रशंसितुमित्यादिभाष्यं पश्वन्तरे प्राशस्त्यनिषेधस्य गवाश्वप्राशस्त्यख्यापनपर्यवसानाभिधानार्थत्वेन व्याख्यातं तरपा सूचितमर्थं विवृणोति * एतदिति * पश्वन्तरेष्वपशुशब्दप्रवृत्तेः प्रशंसाया निमित्तत्वमुपसंहरति * एवमिति * गवाश्वादिगता प्रशंसा यस्या प्रति- ३२७।२ षेधस्यापशुशब्दस्य पश्वन्तरेष्वपशुशब्दप्रवृत्तौ निमित्तं स तथोक्तः। ननु पश्वन्तरप्राशस्त्यनिषेधस्य गवाश्वप्रशंसार्थत्वात्कथं प्रशंसाया निषेधं प्रति निमित्ततेत्याशङ्क्याह *सा चेति * शब्देनार्थप्रतिपादने कृते तस्य कैमर्थ्याकाङ्क्षायां विध्येकवाक्यत्वेन प्रशंसार्थत्वं कल्पनीयम् परशब्दस्य परत्र प्रवृत्तेर्निमित्तमन्तरेणासम्भवात् प्रथममेव गवाश्वगता प्रशंसा प्रवृत्तिनिमित्तत्वेनाश्रितेति कृत्वा प्रशंसानिमित्तः प्रतिषेध इत्यन्तेनान्वयः[2] । प्रयोजनत्वाभिधानं तर्हि विरुध्येतेत्याशङ्क्याह * अनन्येति * प्रशंसां निमित्तीकृत्य पश्वन्तरेष्वपशुशब्दे प्रवृत्ते पश्वन्तरप्राशस्त्यनिषेधस्य कैमर्थ्यापेक्षायां प्रयोजनान्तरासम्भवान्निमित्तभूतैव प्रशंसाप्रयोजनतया शब्दप्रवृत्तेः पश्चादवगम्यतइत्यर्थः। ननु यजमानादिशब्दानामपि प्रस्तरादिषु प्रवृत्तौ प्रशंसानिमित्तं कस्मान्नेष्यत्याशङ्क्याह * अन्यत्र पुनरिति * शब्दप्रवृत्तेः प्रथममप्रतीतत्वात् प्रशंसाया निमित्तत्वं न सम्भवतीत्याशयः।

॥ अथ बाहुल्येन सृष्टिव्यपदेशाधिकरणम् ॥ १६ ॥

भूमा ॥ २२ ॥

सृष्टिमन्त्रका उपदधातीति भाष्यावयवात् पदद्वयस्यापि विधित्वाशङ्कानिरासः प्रतिभाति तच्च समस्तवाक्यार्थानर्थक्यापत्तेरयुक्तमित्याशङ्क्योपधानानुवादेन शब्दविधिः पूर्वपक्षिणो ऽपि मतो

१ तत्प्रतिषेधति २ पु० पा० ।

२ इत्यतीतेनेति २ पु० पा० ।

निरस्यते । सृष्टिशङ्कायास्तु सबीजत्वायाख्यातोपन्यास इति सूचयन् यदीति भाष्यं व्याचष्टे * यदीति * तत्रेत्याशङ्काभाष्यं व्याचष्टे * तत्रेति * तद्वानासामुपधानो मन्त्रइतीष्टकासु लुक् च मतोरिति स्मृतेः । सृष्ट्यभिधायिमन्त्रैरुपधेयानामिष्टकानां सृष्टिशब्दवाच्यत्वावगमे ऽपि कासामिष्टकानां सृष्टिमन्त्रैरुपधानमिति विशेषानवगमात् वाक्यान्तराद्वा विशेषावगमे सत्येतद्वाक्यानर्थक्यापत्तेर्नोपधानानुवादेन सृष्टिसंज्ञकेष्टकाविधिर्विशिष्टविधिर्वा सम्भवतीत्याशयः । ननूपधानानुवादेनेष्टकाविधेरिष्टकाविशिष्टोपधानविधेर्वानुपपत्तावप्युपधानानुवादेन सृष्टिलिङ्गमन्त्रविधिर्भविष्यतीत्याशङ्कानिरासार्थं तत्र सर्वासामितिभाष्यं व्याचष्टे * तत्रेति * पूर्वपक्षनिरासभाष्यं व्याख्याय तस्मादिति सिद्धान्तभाष्यं व्याचष्टे * तस्मादिति * भाष्योक्तं सिद्धान्तमाक्षिपति * अत्रेति * उपधानस्याविधेयत्वान्मन्त्रविधेश्च मन्त्राम्नानानुमेयत्वेन प्रदेशान्तरस्थत्वाद्विध्येकवाक्यकल्पत्वाच्चार्थवादत्वस्य तदभावान्नायमर्थवाद इत्यर्थः । विध्येकवाक्यत्वं च विनार्थवादत्वानुपपत्तिर्येन विधीयते तस्य शेषो ऽर्थवाद इति प्रथनार्थवादे ऽभिधानाद्भाष्यकृतो ऽप्यभिमतेत्याह * तथा चेति * भाष्योक्ते ऽर्थवादत्वे निरस्ते यदि कश्चित्प्रकरणप्राप्तमन्त्रेषु पुनःश्रुतेरभ्यादानमन्त्रवद् गुणार्थत्वं शङ्केत तदपि मन्त्रव्यतिरिक्तगुणाश्रवणादयुक्तमित्याह * न चेति *मन्त्रान्तरपरिसंख्यार्थता तु मन्त्रान्तरानर्थक्यापत्त्यैव निरस्तेत्याह * तत्रेति * तस्माद् ग्रहणादिकार्यान्तरपरिसंख्यार्थो ऽयमुपधाने मन्त्रविधिरिति पूर्वपक्ष एव ज्यायानित्युपसंहरति * तत्रेति * नन्वनुपधीयमानाभिरिष्टकाभिश्चयनस्य कर्त्तुमशक्यत्वादिष्टकाभिरग्निं चिनुतइति इष्टकासाध्यतया विहितेन चयनेनेष्टकोपधानस्यार्थादाक्षेपाद्विधानानर्थक्यमिति शङ्कामनुभाषणपूर्वकं निराकरोति * चयनेनेति * व्यूहविशेषेण च स्थापनमुपधानं तद्विधानाभावे यथाकथं चित्स्थापने ऽपि चयनं सम्भवति समुदितानामपि च स्थापनोपपत्तेर्न प्रत्येकं स्थापनसिद्धिरित्यर्थः । ननु समुदितोपधानस्यापि सम्भवात्तदपि कथं प्रत्येकं सिध्येदिति शङ्कते * नन्विति * विहितत्वेन तस्याङ्गत्वात् प्रतिप्रधानमावृत्तिन्यायात्सेत्स्यतीति परिहरति * नेति * उपादेयत्वेनाङ्गत्वं लक्षितम् अर्थाक्षेपस्य श्रुत्यनुमानेन विलम्बितत्वादप्राप्तावस्थस्योपधानस्य शीघ्रप्रवृत्तिना प्रत्यक्षविधिना विधानोपपत्तेर्निष्प्रयोजनत्वमात्रेणाविधानं वक्तव्यम् । अस्तित्वे काध्वर्युकर्तृकत्वसिद्धिर्विधेः प्रयोजनमित्याह * अपि चेति * आध्वर्यवसमाख्यातचयनविधिनापि कल्पितस्योपधा-

नविधेरसमानत्वात्तादृशे चाभियुक्तैराध्वर्यवादिशब्दाप्रयोगेणाध्व-
र्यवसमाख्यानालाभादध्वर्युकर्तृकत्वं न लभ्यतइत्युक्तम्। ननु चयन-
स्य समाख्ययाध्वर्युकर्तृकत्वात्तस्य चोपधानादृते ऽध्वर्युणा कर्त्तुम-
शक्यत्वात् उपधानस्याध्वर्युकर्तृकत्वं लभ्यतइत्याशङ्क्यैककर्तृकत्वं
चेत्युक्तम्। अन्यसहायेनापि सन्धुक्षणादाववान्तरव्यापारे कृते देव-
दत्तेन पाकः कृत इति लोके व्यपदेशादुपधाने ऽन्यसहायेनापि कृते
चयनस्याध्वर्युकर्तृकत्वप्रसिद्धेर्नैकाध्वर्युकर्तृकत्वं सेत्स्यतीत्याशयः।
एवं तु सर्ववाक्येपूपधानमात्रविधानात् अभ्यासन्यायेनोपधानभे-
दापत्तेः सकृद्विहितस्यापि चेष्टकाः प्रत्यङ्गत्वात्प्रतीष्टकमावृत्तिसिद्धे-
रसकृद्विधिप्रयोजनाभावेनापरितोषात्स्वमतेनार्थाक्षिप्तोपधानानुवादेन
मन्त्रविधिरिति पूर्वपक्षमेव न्याय्यं मत्वा प्रकरणप्राप्तमन्त्रेषु
पुनः श्रुतेर्मन्त्रान्तरपरिसंख्यार्थत्वासम्भवे ऽपि ग्रहणादिकार्यान्त-
रपरिसंख्याप्रयोजनत्वं दर्शयितुमाह * न चेति * ग्रहणादीना- ३२८।२
मपि चयनचोदनाक्षिप्तत्वाविशेषेणोपधानतुल्यत्वात् लिङ्गविशेषर-
हितानां मन्त्राणां प्रकरणादुपधाने ग्रहणादिषु च प्राप्नुवतामु-
पधानसम्बन्धः पुनःश्रवणमद्वाभिधान्यादानसम्बन्धपुनःश्रवणवत्
कार्यान्तरपरिसङ्ख्यार्थं न त्वाज्यभागपुनःश्रवणवदङ्गान्तरपरिस-
ङ्ख्यार्थं येन मन्त्रान्तरानर्थक्यमापद्यतेत्याशयः। पञ्चमे तु मध्य-
मायां तु वचनात् ब्राह्मणवतीत्यत्र यां वै काञ्चन ब्राह्मणवतीमिष्टका-
मभिजानीयात्तां मध्यमायां चितावुपदध्यादिति वचनवशेनाभिपूर्व-
स्य जानातेः प्रत्यक्षज्ञानवाचित्वात् प्रत्यक्षब्राह्मणविहितानाम् इष्टका-
नामध्यमचित्याश्रयत्वस्य वक्ष्यमाणत्वादिष्टकानां चोपधानकरणभू-
तमन्त्रान्वयं विना निरूपणाशक्तेस्तद्द्वारेणैव विधेयत्वान्मध्यमाचि-
त्याश्रयत्वसिद्धिरप्युपधानसम्बन्धितया मन्त्रविधेः प्रयोजनं भवि-
ष्यत्याह * अपि चेति * मन्त्राणामुपधानसम्बन्धो विधेय इत्य-
र्थः। अनारभ्याधीतानां च मन्त्राणां प्राकरणिकसामान्यसम्ब-
न्धासम्भवात्तदपेक्षलैङ्गिकविनियोगानुपपत्तेरप्राप्तविधिरेव भविष्य-
ति इत्याह * ये त्विति * ननु सृष्टिमन्त्राणां विधानाभ्युपगमे
ऽर्थवादत्वसिद्धान्तो भज्येतेत्याशङ्क्याह * न चेति * गुणाश्रया
इति सूत्रान्ते गुणवादनिमित्तत्वाभिधानदर्शनात्तादर्थ्यनिश्चयसूत्र-
नार्थः सूत्रावयवे सूत्रशब्दः सकलसूत्रविषयत्वे वा तल्लिङ्गे तत्सि-
द्ध्यादेरप्युपलक्षणार्थम्। ननु भूमेत्येतावदेव सूत्रं तत्सिद्ध्यादेरेकसू-
त्रत्वेनादौ पठितत्वाद् देवतावत्स्याच्छब्दत्वात् तिसृभिरस्तुवत
ब्रह्मासृज्यत ब्रह्मणस्पतिरधिपतिरासीदित्यादिष्वाद्यचतुर्दशान्यव्य-

तिरिक्तेषु चतुर्दशसु सृजधातुयोगात् सृष्टिलिङ्गेष्वेकया स्तुवतप्र-
जाधीयन्त प्रजापतिरधिपतिरासीत्सप्तविंशत्या स्तुवत द्यावापृथिव्यौ
तां वसवो रुद्रा आदित्या अनुव्यायंस्तेषामाधिपत्यमासीत् त्रयस्त्रिं-
शता स्तुवत भूतान्यशाम्यन् प्रजापतिः परमेष्ठ्यधिपतिरासीदित्या-
द्यचतुर्दशान्त्येषु त्रिष्वसृष्टिलिङ्गेषु भूयस्त्वनिमित्ता सृष्टिशब्दस्य
प्रवृत्तिरित्येतावन्मात्रस्यानेन सूत्रेण कथनात् नार्थवादत्वं प्रतिपाद्य-
तइत्यर्थः । ननु भाष्यकृतार्थवादत्वस्योक्तत्वात् सूत्रस्यापि ताद-
र्थ्यमवसीयतइत्याशङ्क्याह * अत इति * युक्त्यागमानुपेतत्वादुपे-
क्ष्यं तद्भाष्यमित्याशयः । किमर्थं तर्हि भाष्यकृतार्थवादतोक्तेत्यपेक्षा-
यामाह * भाष्यकारेण त्विति * एतमेव भाष्यकाराभिप्रायं प्रक-
टयितुमपि चेतिभाष्यं व्याचष्टे * एकयेति * प्रतीकेन सप्तदश-
मन्त्रसमुदायात्मकसर्वो ऽनुवाको गृहीत इति सूचनार्थो ऽनुवाक-
शब्दः । मुख्यलक्षणायाः क्व चिद्दृष्टत्वादत्यन्तानौचित्यसूचनायाद्य-
शब्दः आत्मत्यागान्यद्वारस्वीकारयोरिव स्वार्थस्यापि त्यागान्यद्वार-
स्वीकारयोरत्यन्तानौचित्यसूचनार्थं शब्दार्थयोरभेदोपचारेण स्वार्थ-
विषयावात्मशब्दौ सृष्टीरुपदधातीत्युपक्रम्यैकया स्तुवतेत्यादिसप्तद-
शमन्त्रोपधानसाधनिकानामिष्टकानां प्रत्येकं स्तुतिं कृत्वा यत्सप्त-
दशेष्टका उपदधातीत्युपसंहारात् सृष्टिशब्दस्य सप्तदशमन्त्रविषय-
त्वावगते स्ववाच्यसृष्टिलिङ्गमन्त्रमात्रपरत्वे तद्बाधप्रसङ्गात्स्वार्थ-
पर्यवसायित्वत्यागेनेतरा सृष्टिलिङ्गमन्त्रलक्षणार्थता वाच्यलक्षितस-
मुदायद्वारा स्यात् समुदायस्य चैकार्थ्याभावेनोपधानप्रकाशकत्वा-
नुपपत्तेस्तत्रापि पर्यवसानासम्भवात् तदितरमसृष्टिमन्त्रवाच्यसृष्टि-
मन्त्रलक्षितसमुदायद्वारेण लक्षयित्वा सृष्ट्यसृष्टिमन्त्रालिङ्गमन्त्रस-
मुदायसम्बन्धित्वाविशेषादसृष्टिमन्त्रवत् स्वार्थसृष्टिमन्त्रो ऽपि ता-
त्पर्यतः सृष्टिशब्देन प्रतिपादनीय इति षष्ठ्यन्तं तृतीयान्तं सृष्टिशब्द-
मध्याहृत्य योज्यम् । स्वरूपाभिधानस्य शून्यवादवार्त्तिकेन निरस्तत्वा-
दजहत्स्वार्थत्वस्य चान्नैवोक्ते वक्ष्यमाणत्वात्[1] वाच्येन च समुदाय-
लक्षणया मन्त्रगणं लक्षयेदिति भाष्ये वक्ष्यमाणत्वादेवं व्याख्यात-
म् । अनेन चैकया स्तुवतेत्यत्रानुवाके याः सृष्टयस्तन्मात्रपर्यवसा-
नरूपेण त्यक्त्वा तत्र[2] तत्सृष्ट्यसृष्टिसमुदायं लक्षयित्वा पश्चादितरा-
भिः सहितास्तात्पर्यतः सृष्टिशब्दो लक्षयेत्प्रतिपादयेदित्येवं भाष्यं
व्याख्यातम् । नन्वित्याशङ्कानिरासार्थं नानुवादेति भाष्यं व्याचष्टे

१ वक्ष्यमाणत्वादिति २ पु० ना० ।

२ ताभिरिति २ पु० ना० ।

* उपधानेति * कथं त्विति भाष्यं लिङ्गेति सूत्रावयवेनैव व्याख्यातत्वान्न व्याख्यातम्।

॥ अथ प्राणभृदादिशब्दानां स्तुत्यर्थताधिकरणम् ॥ १७ ॥

[1]लिङ्गसमवायात् ॥ २२ ॥

ननु सृष्टिशब्दस्योपधानविधिशेषतयार्थवादत्वं युक्तं प्राणभृदादिवाक्येषु तु सृष्टिवाक्यविहितत्वेनोपधानस्य विधातुमशक्यत्वात् विध्येकवाक्यत्वं च विनार्थवादत्वायोगाद् गुणाश्रवणाच्च प्रकरणप्राप्तमन्त्रपुनःश्रुतेस्तादर्थ्यस्यापि कल्पयितुमशक्यत्वात् परिसंख्यार्थत्वे च मन्त्रान्तरानर्थक्यापत्तेः प्राणभृदादिशब्दस्य न किञ्चित्प्रयोजनमित्याशङ्क्याह * सृष्टिवदिति * सृष्टौ यथास्माभिर्ग्रहणादिकार्यान्तरपरिसंख्यामध्यमचित्याश्रयत्वसिद्धिश्चोपधानसम्बन्धितया मन्त्रपुनःश्रुतेः परिहारो ऽस्य चोद्यस्योक्तस्तथात्रापि वक्तव्यः। भाष्यपक्षे त्विदं चोद्यं यथा प्राणभृदादिष्वपरिहार्यं तथा सृष्टावपि विशेषाभावेन प्राणभृद्वाक्यविहितत्वात् सृष्टिवाक्यमुपधानस्याविधायकम् इत्यपि वक्तुं शक्यत्वादिति द्वन्द्वनिर्देशेन सूचितम्। ननु वाच्यैकसमुदायिलक्षितसमुदायद्वारा समुदाय्यन्तरे शब्दवृत्तेरुभयत्र तुल्यत्वान्नोदाहरणभेदो युक्त इत्याशङ्क्याह * अल्पैरिति * अयमाशयः शब्दस्य प्रवृत्तिर्नाम बोधकत्वमेव निर्विषयायाश्च बुद्धेरसम्भवात् बुद्धिविषयस्यैव प्रवृत्तिनिमित्तत्वं वाच्यम्। अत एवाभिधेयगुणयोगेन सारूप्यं सर्वत्र सम्भवदपि आदित्यो यूप इत्यत्रैव बुद्धिविषयत्वादुक्तं नान्यत्र न हि यजमानः प्रस्तर इत्यत्र यजमानसदृशः प्रस्तर इति बुद्धिरुदेति तत्कार्यकारित्वमात्रबुद्धेर्ब्राह्मणस्याप्यर्थवादवशात् प्रजापतिमुखजातत्वमात्रबुद्धिरजादौ गवाश्वगतप्राशस्त्याभावमात्रबुद्धिः यूपे त्वादित्यसारूप्यमात्रबुद्धेः सारूप्यं प्रवृत्तिनिमित्तमुक्तम् तेनेहापि सृष्टिशब्दात् सृष्टिबाहुल्यबुद्धेस्तस्यैव प्रवृत्तिनिमित्तत्वं प्राणभृच्छब्दात्तु प्राणभृल्लिङ्गसमवायमात्रबुद्धेस्तस्यैव प्रवृत्तिनिमित्तत्वाद्भेदेनोपादानं युक्तमेवेति भूयस्त्वाप्रतीतिप्रदर्शनार्थो ऽल्पशब्दः भूयस्त्वानपेक्षस्य लिङ्गसमवायमात्रस्य निमित्तत्वसूचनायैव लिङ्गसमवायादिति पञ्चम्युदाहृता एकेनेति भाष्येण लिङ्गशब्दं चिन्हार्थत्वेन व्याख्याय ननु सम्बन्धं विना लिङ्गत्वायोगात् लिङ्गशब्देनैव समवायशब्दोक्तसम्बन्धसिद्धेः समवायशब्दो ऽनर्थक इत्याशङ्क्य न चायमित्यादिभाष्येण लिङ्गस्यापि स्वलक्षिते गणे ऽन्त-

---

१ द्वादशाधिकरणमारभ्य सप्तदशाधिकरणपर्यन्तमेकवर्णकमेव वार्तिके नाधिकरणभेदः।

भावप्रतिपादनार्थत्वं समवायशब्दस्योक्तं तद्व्याचष्टे * स्वार्थेति * उभयत्रेत्यनेन भूम्न्यपि समवायशब्दानुषङ्गः सूचितः। मन्त्रगणलक्षणायां व्यापृतः प्राणभृदादिशब्दः किमिति स्वार्थं न जहाति इत्याशङ्कानिरासार्थत्वेन समवायशब्दव्याख्यानार्थं तद्गुण इतिभाष्यावयवं व्याख्यातुम् * उपादीयमानत्वादित्युक्तम् * सर्वसमुदायिव्यासक्तेन समुदायेन स्वसमवायितयेतरसमुदायिवल्लक्षकस्यापि [1]समुदायिन उपादीयमानत्वात् स्वार्थापरित्याग इत्यर्थः । ननु सृष्टिशब्दस्याप्यभिधेयसृष्टिलक्षितसृष्ट्यसृष्टिसमुदायलक्षणागुणयोगेनासृष्टिषु प्रवृत्तेर्गौणत्वाद्गौण्यां च वृत्तावभिधेयसम्बन्धित्वरूपानादरात् सृष्टिलक्षितस्य समुदायस्य सृष्टिसमुदाय्यनादरेणासृष्टिष्वेव व्यासज्यवृत्त्युपपत्तेः कथं तेनाभिधेयानां सृष्टीनां लक्षणाभूतानामुपादानमित्याशङ्कानिरासार्थं वृद्धवाक्यं पठति * आह चेति * लक्ष्यमाणगुणयोगनिमित्तवृत्तिस्वरूपगौणत्वलक्षणसद्भावात्सृष्ट्यादिशब्दानां गौणत्वे ऽपि स्वार्थासम्बद्धस्य समुदायाख्यस्य गुणस्य लक्षयितुमशक्यत्वात् ।तस्य च व्यासज्यवृत्तित्वेनैकसमुदायित्यागे समुदायस्याप्यभावोपपत्तेः सर्वेषामपि समुदायिनामविशेषेणैवोपादानम् पैङ्गल्यादेस्तु सामान्यरूपेणाश्रितत्वादिना लक्षितस्य प्रत्येकं पैङ्गल्यादिगुणव्यक्तिषु वृत्तेरग्न्यादिगतायाश्च पैङ्गल्यादिगुणव्यक्तेर्माणवकादावभावाद्युक्तो ऽग्न्यादिसम्बन्धानादर इत्याशयः । अभिधेयसम्बन्धादरानादरलक्षणे तु गौणी लक्षणा वृत्तिविवेके सृष्ट्यादिशब्दानामपि लक्षणावृत्तिरेवास्तु गौणत्वाभ्युपगमे न तु जहत्स्वार्थवृत्तित्वादिलक्षणान्तरनिरासार्थमिहोदाहरणम् श्लोकस्त्वेवं योज्यः। यत्र यजमानादिशब्दे लक्षणं यजमानाद्युपलक्षणमात्रीकृत्य तल्लक्ष्ये यजमानकार्ययागापूर्वनिष्पत्त्यादौ प्रस्तरादेर्यजमानादिसम्बन्धिसाङ्गप्रधानानुष्ठानसाध्यापूर्वनिष्पत्त्याख्यकार्यकरत्वाभावाद्यजमानादिसम्बन्धिरूपनिरपेक्षशब्दकार्यमर्थप्रत्यायनं नियुज्यते वाच्यसम्बन्धित्वानादरेण वाच्यगुणस्वरूपमात्रलक्षणे यत्र शब्दस्य तात्पर्यमित्यर्थः । तस्मिन् शब्दे लक्ष्यस्वरूपमात्रस्य शाब्दप्रतीतिविषयत्वेन ग्रहणं न तूपायमात्रतयावस्थितस्य लक्षणस्यापि यत्र सृष्ट्यादिशब्दे लक्षणभूतसृष्ट्यादिलक्षितेन सृष्ट्यादिसम्बन्धिना समुदायेन सृष्ट्यादित्यागे व्यासज्यवृत्तित्वाभावादात्मानमलभमानेन सृष्ट्यादेर्लक्षणस्यापि स्वाश्रयत्वेनोपादानं तत्र लक्ष्यलक्षणयोः शाब्दप्रतीतिविषयत्वेन ग्रहणमिति ।

---

१ स्वार्थसमुदायिन इति २ पु० पा० ।

॥ अथ वाक्यशेषेण सन्दिग्धार्थनिरूपणाधिकरणम् ॥ १८ ॥

सन्दिग्धेषु वाक्यशेषात् ॥ २३ ॥

विध्युद्देशान्तर्गतानामप्युद्भिदादिपदानां विधानातिरेकेण नामधेयतयोपयोगे प्रतिपादिते ऽर्थवादानामपि स्तावकत्वातिरेकेण सन्दिग्धार्थनिर्णायकत्वेनोपयोगप्रतिपादनार्थं कल्पनैकदेशत्वादिति उत्तरसूत्रगतपदद्वयानुषङ्गेणैतत्सूत्रं प्रकरणान्तरत्वाच्चानन्तरसङ्गत्यभावे ऽपि न दोषः प्राणभृदादिशब्दानां वा लिङ्गसमवायात्तल्लिङ्गातल्लिङ्गेषु प्रवृत्तावुक्तायां घृतशब्दस्यापि घृताघृतोक्तेषु लिङ्गसमवायात् प्रवृत्तिः प्राप्तात्रापोद्यत इत्यनन्तरसङ्गतिरपि सम्भवति प्रतिपादितप्रामाण्योपयोगिद्वाराणामपि तद्विशेषोपयोगिद्वारान्तरप्रतिपादनात्पादाध्यायसङ्गतिरिति सूचयितुमाह * विधीति * निर्णयार्थत्वेन कल्पनाशब्दव्याख्यानाय *अवधार्यतइत्युक्तम् * अर्थवादस्य विधिगतसन्देहापनायकत्वेन साध्ये यद्दचा स्तुवते तदसुरा अन्ववायन् इत्याद्यर्थवादगतस्तुतिनिरर्थत्वसन्देहापनायकत्वं य एवं विद्वान् साम्ना स्तुवीतेत्यादिविधेरर्थवादाधिकरणोक्तं दृष्टान्तयितुमेकत्रेतरेणेत्युक्तम्। ननूपक्रमानुरोधेनोपसंहारव्याख्यानस्य तृतीये वेदो वा प्रायदर्शनादित्यत्र दर्शितत्वात्कथमुपसंहारस्थेनार्थवादेनोपक्रमस्थविध्यर्थनिर्णयो युक्त इत्याशङ्क्य * सन्दिग्धेष्वित्युक्तम् * तत्रोपक्रमस्य वेदविषयत्वेन निश्चितत्वादुपसंहारगतानामृगादिशब्दानां तदनुरोधवृत्तिता युक्तेत्याशयः । ननूपक्रमोपसंहारविप्रतिपत्त्यालोचनया सन्देहस्तत्राप्यस्तीत्याशङ्क्य * एकत्रेत्युक्तम् * सन्दिग्धशब्देनाव्यवस्थितार्थप्रतीतिरभिमता सा विध्युद्देशमात्रपरामर्शाद्भवन्तीति वाक्यशेषावधारितया व्यवस्थया वार्यतइत्याशयः। निर्णीयतइति वक्तव्ये ऽवधार्यते पदं प्रयुञ्जानेनैतदेव सूचितम्। सन्दिग्धावधारणरूपप्रामाण्यविशेषोपयोगिद्वारान्तरप्रतिपादनाच्च पादलक्षणसङ्गतिः सूचिता। अनन्तरसङ्गतेस्त्वभावो यथा सृष्टिष्वसृष्टिषु चेति भाष्यसूचितत्वाद्वा स्पष्टत्वमनभिधानेन सूचितम् ।एकदेशशब्दमेको ऽर्थो दिश्यते प्रतिपाद्यते याभ्यां विध्यर्थवादाभ्यां तावेकदेशौ तयोर्भावस्तत्त्वमिति व्युत्पत्त्यैकविषयत्वाभिधानार्थत्वेन व्याख्यातुं पूर्वार्द्धसंम्भवाय सदा शब्देन च स्तुतिनिरपेक्षस्य विधेरपर्यवसानमुक्तम् । प्रशंसानपेक्षस्य विधेः पर्यवसानसम्भवे ऽर्थवादान्वयासम्भवाद्यागेनार्थाक्षिप्तविशेषकल्पनया निर्णये कृते पश्चादर्थवादानर्थक्यपरिहाराय वैकृताङ्गवदन्यतराकाङ्क्षयार्थवादान्वये सत्यपि निर्णीता- ३२९।१

र्थत्यागायोगात्तदर्थवादस्यैवासामञ्जस्यमङ्गीकार्यमपर्यवसाने त्वर्थवादावगतस्यैव विशेषस्य ग्रहणमिति न्यायावताराङ्गभूतोपन्यस्तसन्देहकारणप्रश्नार्थं कथमिति भाष्यं वृत्त्यन्तरोक्तसन्देहकारणनिरासार्थमिति दर्शयितुं स्वरूपतस्तावद् व्याचष्टे * किमिति * तत्र विध्यर्थवादयोर्भिन्नवाक्यत्वेनार्थवादिकस्य विशेषस्य विधिवाक्यार्थावधारणवेलायामप्रतीतेः । सामान्यमात्रप्रत्ययाद्विशेषं प्रतिसन्देह इत्येकेषां मतमुपन्यासपूर्वकं दूषयति * विधाविति * विधिसामान्याक्षिप्ताञ्जनसमर्थद्रव्यमात्रनिर्णयान्नैतत्सन्देहकारणं युक्तमित्यर्थः । सामान्यमात्रनिर्णयादिति यावच्छ्रुतं मत्वा तेषामाशयं विवृणोति * स्यादिति * दूषयित्वा दृष्टान्ताभिधानेनोत्तरं विवृणोति * घृतवदिति * यथा घृतत्वसामान्यं स्वोपलक्षितयत्किंचिद्विशेषावधारणेनाङ्गमेवमञ्जनक्रियाक्षिप्तं स्नेहद्रव्यसामान्यमपीत्यर्थः । एतदेव घृते ऽपि सन्देहोपपादनपूर्वकं विवृणोति * तत्रेति * (विधौ सामान्यश्रवणादर्थवादे च विशेषश्रवणात् वाक्यद्वयविप्रतिपत्तिः । सन्देहकारणमित्यन्येषां मतमुपन्यस्यति[1]) *तस्मादिति* विधिगतसामान्यश्रवणमात्रस्य सन्देहकारणतोक्तेति भ्रान्त्या विधिनिरपेक्षस्य घृतप्रापकत्वायोगाद्विध्यर्थवादयोरेकवाक्यत्वमभिप्रत्यैतदुक्तमिति भ्रान्त्या दूषयति * तथापीति * एकवाक्यगतसामान्यविशेषश्रवणं न सन्देहकारणमिति दृष्टान्तेनोपपादयितुं * न हीत्युक्तम् * दृष्टान्तवैषम्याभिधानेनापरेषामाशयं विवृणोति * विषम इति * गौः शुक्ल इत्येकवाक्यगतयोः सामान्यविशेषयोः श्रवणादिह तु भिन्नवाक्यगताविति वैषम्यम् एतदेव प्रश्नपूर्वकं विवृणोति * कथमिति * सामान्यविषयविधिवाक्यगत एव यदि विशेषः स्यात्तो ऽत्रापि न सन्देहः शुक्लः प्रशस्त इति वाक्यान्तरगते तु विशेषे तत्रापि सन्देह इत्यर्थः । श्लोकं व्याचष्टे * यदि हीति * अन्वयमुखेनैतमेवाशयं विवृणोति * अत इति * चकारेण सामान्यश्रवणसहितस्य विशेषश्रवणस्य सहकारित्वाभिधानादाद्या भ्रान्तिर्निरस्ता विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनैतन्मतद्वयं तच्चैकवाक्यत्वावगतेरयुक्तमिति दर्शयिष्यन्सन्देहदर्शनमेवोभयेषां भिन्नवाक्यत्वभ्रान्तौ कारणमित्याह * केचिदिति * केचित्सामान्यमात्रश्रवणसन्देहकारणवादिनश्चकारादपरे ऽपि भिन्नवाक्यगतसामान्यविशेषश्रवणसन्देहकारणवादिन इत्यर्थः । एतदेवोपपादयति * यदि हीति * नन्वेवं सति सूत्रविरोधः स्यादित्याशङ्क्याह

१ षष्ठ पा० २ पु० ना० ।

* यत्विति * नन्वाकाङ्क्षानिबन्धनत्वात्सम्बन्धस्यावान्तरवाक्यार्थप्रतिपादनमात्रेणाकाङ्क्षापर्यवसाने वाक्यान्तरान्वयायोगात्कथं भिन्नयोः पश्चादेकवाक्यतेत्याशङ्क्याह * तथा हीति * पदार्थानां परस्परान्वयाकाङ्क्षापर्यवसाने ऽपि वाक्यार्थानां परस्परापेक्षया ऽन्वयो न विरुद्ध इत्याशयः । भावप्रत्ययेन सम्बन्धाभिधानादङ्गस्याङ्गिसम्बन्धापेक्षयाङ्गिनश्चाङ्गसम्बन्धापेक्षयादिशब्देनाग्नेयादिप्रधानानामेकफलसम्बन्धापेक्षयाङ्गानां चैककरणोपकारसम्बन्धापेक्षया स्वार्थपर्यवसितानामपि वाक्यानां संहत्यैकमहावाक्यार्थापादनेनैकवाक्यत्वं भवतीत्यर्थः । अङ्गप्रधानवाक्यैः सहार्थवादानां वैषम्याभिधानेनैतद् दूषयति * न त्विति * सिद्धार्थप्रतिपादकानामप्युपनिषद्वाक्यानां चतुस्त्रिंशदाश्वीनानि सरस्वत्याविशनात् प्लक्षप्रश्रवणमित्यादीनां च पुरुषार्थौपयिकस्य कर्मौपयिकस्य वा प्रयोजनस्य लाभात्स्वार्थपर्यवसानं युक्तम् अर्थवादार्थस्य तु निष्प्रयोजनत्वान्न तत्रार्थवादानां पर्यवसानमिति प्रयोजनशब्देनोक्तम् भिन्नवाक्यत्वे च व्रीहियववाक्यवत्सामान्यविशेषवाक्ययोरप्यन्योन्यानिरपेक्षवैकल्पिकसाधननिश्चायकत्वात्सन्देहो नतरां युज्येतेत्याह * दुर्लभेति * सामान्यविशेषयोर्मध्ये इतरत्र सामान्ये सामान्यवाक्यस्येतरत्रविशेषे विशेषवाक्यस्य पर्यवसानादित्यर्थः । ननु वाक्यद्वयस्यान्योन्यानिरपेक्षस्यार्थपर्यवसाने ऽपि विप्रतिपत्तेः सन्देहः स्यादित्याशङ्क्याह * यदिति * वैकल्पिकानुष्ठानेन विरोधपरिहार इत्याशयः । नन्वङ्गाङ्गिवत्सामान्यविशेषयोरप्यन्योन्यापेक्षितत्वात्सार्थपर्यवसितयोरपि तद्वाक्ययोरङ्गाङ्गिवाक्यवत्पश्चादेकवाक्यत्वकल्पनायामेकविषयत्वायैकानुरोधेनेतरवृत्तेरवश्यम्भाविनीत्वात्कस्यानुरोधेन किं वर्त्ततइति जिज्ञासायां विशेषानिर्द्धारणात्सन्देहः स्यादित्याशङ्क्याह * सामान्येति * एवं सति सामान्यमात्रे पर्यवसितस्य विधेरर्थवादविरोधाद्विषयसङ्कोचात्मकबाधाभ्युपगमेन सिद्धान्तः स्यान्न चार्थवादानुरोधेन विधिबाधो युक्त इत्याशयः । न विद्यते विशेषो ऽस्येत्यविशेषो विशेषरहितः स्यात् इत्यर्थः । ननु यथा पशुमालभेतेति सामान्यपर्यवसितस्यापि विधेः छागस्य वपाया मेदसो ऽनुब्रूहीति मन्त्रवर्णानुरोधेन सङ्कोचो विधिमन्त्रयोरेकविषयत्वात् सामान्यस्य च कृत्स्नस्य छागे ऽपि विभावेनाविरोधान्नियमसम्भवे चानियमानुपपत्तेः षष्ठान्त्ये वक्ष्यते तथात्रापि भविष्यतीति शङ्कते * मन्त्रेति * पौनरुक्त्यापत्त्या तं दूषयति * एवमिति * एकवाक्यत्वे रूपक्रमबलीयस्त्वेनात्र पूर्वपक्षसम्भवादपौनरुक्त्यामि-

३३०।२

तिभावः । स्वाभिमतन्यायावताराङ्कभूतसन्देहकारणाभिधानार्थम-ञ्जनसामान्येनेत्यादिभाष्यं व्याचष्टे * तस्मादिति * ननूपक्रमब-लीयस्त्वस्य वेदो वा प्रायदर्शनादित्यत्र वक्ष्यमाणत्वात्सिद्धान्तवच-नव्यक्त्यसम्भवेनैकवाक्ये सन्देहो न युक्त इत्याशङ्क्य * किमधी-नेत्युक्तम् * अर्थवादप्रवृत्तेर्विध्यधीनत्वे विप्रतिपत्त्यभावात्प्ररोचनां विना विध्यपर्यवसानेनार्थवादाधीना किं विधेः प्रवृत्तिः पर्यवसानेन वा तदधीनार्थवादस्येति सन्देहार्थः । अतो ऽनेन प्ररोचनापेक्षवि-धिपर्यवसानसम्भवासम्भवसन्देहः * सन्देहकारणमित्युक्तम् * भवति पर्यवसाने विध्युद्देशेन सामान्याक्षिप्तविशेषमात्रनिर्णयादर्थ-वादानर्थक्यपरिहारायान्यतराकाङ्क्षया वैकृताङ्गवदर्थवादः पश्चाद-न्वीयमानो ऽपि विध्यनुरोधेनैव व्याख्येयः । अपर्यवसाने त्वर्थवा-दोक्तविशेषसद्भावे विशेषाक्षेपकत्वायोगादर्थवादोक्तस्यैव ग्रहणमिति किं समञ्जसमिति भाष्यावयवमर्थतः पठित्वा व्याचष्टे * कस्येति * एवमिति पूर्वपक्षभाष्यं व्याचष्टे * तत्रेति * विध्यधीनत्वे ऽप्युप-क्रमस्थायाः स्तुतेः श्रौतत्वदर्शनादुपसंहारस्थत्वाभिधानायानुपश्चाद् * वादादित्युक्तम् * अनेन च विनिगमने त्विति भाष्यावयवो वि-धिना त्वेकवाक्यत्वादित्येतत्सूत्रसिद्धाविध्यधीनत्वाङ्गीकरणेन विधे-रपि प्ररोचनं विना प्रवृत्त्यशक्तत्वेन स्तुत्यधीनत्वान्नानेन हेतुनार्थवादे लक्षणावृत्तिर्निश्चेतुं शक्येत्याशङ्कानिरासार्थत्वेन व्याख्यातः । चका-रेण च लक्षणार्थं घृतवचनमिति भाष्यावयवो विशेषस्याव्यभिचारे-ण सामान्यलक्षणे सामर्थ्यात् घृताख्यविशेष्यवचनं स्नेहद्रव्यसा-मान्यलक्षणार्थमित्येव व्याख्यातः।मुख्यत्वादित्यनेनाविरोधाच्चेति च-कारसहितेनोपक्रमस्थत्वेन विरोधात्सामान्येन च व्यभिचारिणा विशेषस्य लक्षयितुमशक्यत्वात् उपक्रमस्थेन सामान्यवचनेन न वि-शेषः परिकल्पयितुं लक्षयितुं युक्तमित्येवमुपक्रमे सामान्यवचने सति न विशेषः कल्प्यतइति भाष्यावयवं व्याख्यायाविरोधाच्चेत्यनेन ननु सामान्यमात्रस्याननुष्ठेयत्वाद्विशेषस्य चाभिधानादुपक्रमो ऽपि सन्दिग्धार्थत्वादुपसंहारेण निर्णेतव्य इत्याशङ्कानिरासार्थत्वेन स-न्दिग्धेष्वविरोधादिति भाष्यावयवो ऽप्यापातप्रतिभानात्सन्देहे ऽपि सामान्याक्षिप्तस्नेहद्रव्यमात्रनिर्णयोपपत्तेरर्थवादाभावे ऽप्यननुष्ठेय-सामान्यमात्ररूपार्थाविधायकत्वलक्षणविरोधाभावादित्येवं व्याख्या-तः । प्ररोचनानपेक्षस्य विधेः प्रवृत्तावसामर्थ्यादर्थवादसन्निधाने च स्वयमप्ररोचकत्वादर्थवादसहितस्यैव विधायकत्वावगतेस्तत्समर्पि-तविशेषलाभे विशेषान्तरकल्पनायोगेनोपक्रमस्थस्यापि विधेर्निर्णाय-

कत्वाशक्तेरुपसंहारस्थेनापि अर्थवादेन निर्णयो युक्त इत्याशङ्कानिरा-
सार्थत्वेन प्ररोचनानपेक्षस्यैव विधेः स्वविषयेष्टसाधनत्वज्ञापनमात्रे-
ण प्रवर्त्तकत्वोपपत्तेरर्थवादाभावे ऽपि विधायकत्वाविरोधादिति
भाष्यावयवो व्याख्यातः । श्लोकं व्याचष्टे * विधीयमानं हीति *
स्तुतेर्विध्यधीनत्वोक्त्यार्थाद्विधेस्तुत्यनधीनता ऽनुवादत्वोक्त्या च प्रा-
प्तार्थतोक्तेति सूचनार्थम् *नन्वित्याद्युक्तम् * ननु विधेः स्तुत्यनधी-
नत्वे कथमुच्चैर्ऋचा क्रियतइत्यादि विध्युद्देशस्थानामृगादिशब्दाना-
मर्थवादानुरोधेन वेदलक्षणार्थं तृतीये वक्ष्यतइत्याशङ्कानिरासार्थत्वेन
मुख्यत्वादित्यवयवं व्याख्यातुम् * यद्यपि तावदित्युक्तम् * अ-
विरोधाच्चेत्यवयवं व्याख्यातुं विध्यपेक्षेत्युक्तम् विधेः स्तु-
त्यनधीनत्वं च पूर्वोक्तमनेनोपपादितम् । स्तुतिपदान्यनर्थका-
न्यभविष्यन् साकाङ्क्षास्सीत्यादेर्यो ऽसौ विध्युद्देशः स शक्नोति नि-
रपेक्षार्थं विधातुमित्यर्थवादाधिकरणभाष्यादर्थवादनिरपेक्षस्य वि-
धिमात्रस्य प्रवृत्तिशक्तावप्यर्थवादानर्थक्यपरिहारमात्रार्थमर्थवादा-
न्वयप्रतीतेरेतत्पूर्वपक्षिणोक्तम् । स्तुतेर्विध्यधीनत्वोपपादनायार्थ-
* वादस्त्वित्युक्तम् * आद्यचकारसूचितं द्वितीयभाष्यावयवार्थं
व्याचष्टे * विशेषश्चेति * द्वितीयचकारसूचितभाष्यावयवार्थं
व्याख्यातुमाह *न सामान्यमिति * वाक्यशेषस्यैव सन्दिग्धार्थनि-
र्णायकत्वादि न चेति ब्रह्मविषयत्वेनोदाहरणत्वे विध्युद्देशोपन्या-
सस्तु तद्विषयत्वमात्रेणेति सूचनार्थं व्युत्क्रमेण व्याख्यानमुपसंहर-
ति * तस्मादिति * एवं प्ररोचनानपेक्षस्यापि विधेः प्रवृत्तिसाम-
र्थ्येनार्थवादान्वयात्प्रागेव विध्युद्देशार्थनिर्णयान्नार्थवादोक्तविशेषग्र-
हणमित्युक्त्वा प्ररोचनानपेक्षस्यासामर्थ्ये ऽप्यर्थवादाभावे विधेरेव
प्ररोचनाशक्त्याविर्भावात्सामान्यविधेयस्य विशेषाकाङ्क्षायां घृते
सार्थवादकस्याभिधायकत्वमितरयोः केवलस्य भविष्यतीति घृतश-
ब्दस्य स्नेहमात्रलक्षणार्थतापि नास्तीत्याह * कामं चेति * ननु य-
थाग्निविद्यास्वाध्यायाधिकारोद्देशतदनुरोधेन त्रैवर्णिकाविषयतया स-
ङ्कोचो वक्ष्यते तथा विधानस्याप्यर्थवादसाध्यत्वात्तदनुरोधेन विष-
यसङ्कोचः कस्मान्न स्यादित्याशङ्क्याह * यथेति * अयमाशयः ३३१।२
येनाङ्गेन विना प्रधानं न सिध्यति स्वयं च नाक्षिप्यते तदनुरोधेन
प्रधानस्यापि सङ्कोचो भवति विनापि त्वर्थवादेन विधेरेव तु प्ररोच-
नाशक्तिकल्पनेन विधायकत्वोपपत्तेः यथेन्द्राय त्वा वसुमते गृह्णा-
मीत्यैन्द्रमन्त्रसाध्यस्यापि सोमग्रहणस्य मन्त्राभावे ध्यानादिनापि
स्मृतस्यानुष्ठानोपपत्तेर्नाङ्गभूतमन्त्रानुरोधेन प्रधानस्य सोमग्रहण-

स्येन्द्रप्रदानमात्रसङ्कोचो युक्त इति तृतीये लिङ्गविशेषनिर्देशा-त्समानविधाने ऽप्यैन्द्राग्याममन्त्रत्वमित्यत्र वक्ष्यते तथाङ्ग-भूतार्थवादानुरोधेन प्रधानभूतस्य विधेः सङ्कोचो न युक्त इति । नन्वत्राप्यर्थवादसद्भावेन विधेः प्ररोचनाशक्त्यभ्यु-पगमात्तैलादावर्थवादाभावेन विधायकत्वायोगात्तदनुरोधेन स-ङ्कोचो युक्त एवत्याशङ्क्याह * यत्रेति * अर्थवादसद्भावकृतत्वा-त्प्ररोचनाशक्त्यपगमस्य घृतमात्रे तत्सद्भावादपगमो युक्तो नेतरत्रे-त्याशयः । पूर्वपक्षमुपसंहरति * इतीति * सन्दिग्धेष्वित्यादिसि-द्धान्तभाष्यमक्तशर्करोपधानस्य अर्थवादसद्भावे वर्त्तमानापदेशानु-पपत्तेराख्यातस्य पञ्चमलकारत्वेन विधायकत्वावगमाद्विध्यभावे च विध्येकवाक्यत्वकल्पस्यार्थवादत्वस्याप्ययोगादिमां स्पृष्ट्वोद्गायेदित्ये-तदुदाहरणाव्यापकत्वाच्चायुक्तमाशङ्क्यार्थवादानपेक्षविधिपर्यवसा-नाभावाभिप्रायेण व्याचष्टे *उच्यतइति* प्रवृत्तिप्रतिबन्धकालस्या-दिभङ्गं विना चेतनस्य प्रवर्त्तयितुमशक्यत्वादालस्यादिभङ्गाख्यप्ररो-चनासापेक्षस्यैव विधेः प्रवर्त्तकत्वनिर्वाहादर्थवादसद्भावे च विधेः प्ररोचनशक्त्यभावादर्थवादस्य च घृतमात्रविषयत्वाद्विधेरपि तन्मा-त्रविषयतैव युक्तेत्याशयः । श्लोकं व्याचष्टे * यद्यपीति * प्रक्रमश-ब्देनापर्यवसानं सूचितम् । यद्यप्यञ्जनाक्रियासाधनत्वाविशेषात्तैल-वसयोरप्यर्थाक्षेपेणोपादानं तथाप्यनुष्ठानस्य विध्यधीनत्वाद्विधेश्च प्ररोचनापेक्षत्वे घृतमात्रविषयत्वात्तैलवसे नानुष्ठेये इत्यर्थः । वस्तुत-स्तु प्रत्यक्षश्रुतेर्घृते ऽर्थाक्षेपायोगान्नार्थाक्षेपात्मकमुपादानमपि तैल-वसयोरस्तीति क्रियामात्रमिवोदितमित्यादिना वक्ष्यतइति तावच्छ-ब्देन सूचितम् । यत्तु तैलवसयोरर्थवादाभावाद्विधेरेव प्ररोचनाशक्ति-कल्पनया पर्यवसानं कामं वेति श्लोकेनोक्तं तदाग्नेयाधिकरणव्यु-त्पादयिष्यमाणगौरवलक्षणवाक्यभेदापादनेन निराकरोति * क-ल्पयितव्येति * घृतप्ररोचनोपादानेन वा समाप्ते वाक्ये कालपनि-कतैलादिप्ररोचनया वाक्यान्तरारम्भापत्तेर्वाक्यभेदो ऽभिप्रेतः । वै-रूप्यलक्षणो ऽपि वाक्यभेदो ऽस्मिन् पक्षे स्यादित्याह * घृतइति* अतो ऽर्थवादस्य घृतमात्रविषयत्वात्तत्सद्भावे च विधेः प्ररोचना-कल्पनायोगात्तस्यापि तन्मात्रविषयतेति । श्लोकार्थमुपसंहरति * त-स्मादिति * एवं तात्पर्यतो भाष्यं व्याख्याय स्वरूपतो व्याचिख्या-सुः सामान्यवचनेनेति भाष्यावयवमञ्जनसमर्थद्रव्यसामान्यस्याश्र-वणादयुक्तमाशङ्क्याभ्युपेत्यवादत्वेन व्याचष्टे * यद्यपि चेति * अभ्युपेत्यवादस्य च वासः परिधत्तइत्यादौ निरासतुल्यत्वसिद्धिः

प्रयोजनम् कथं न तद्विशेष इत्याशङ्क्य भाष्यशेषव्याख्यानेन परिहरति * तत्रेति * अनेन च यो वाक्यस्य सामान्यवचनेनोपक्रमः स निगमनवशेन श्रुत एव विशेषे व्यवस्थाप्यते तस्योपक्रमापेक्षितविशेषसमर्पणेन तदानुकूल्यादिति व्यवस्थाप्यतइत्यध्याहारेण योजितम्। ननूपक्रमस्थसामान्याक्षिप्तस्य तैलादेर्नोपसंहारानुरोधेन त्यागो युक्त इतिभाष्येणाशङ्क्य श्रुतविशेषसद्भावे ऽर्थाक्षेपायोगान्न स्नेह सामान्यमर्थाद्विहितं येन निगमनस्योपक्रमविरोधः स्यादिति न हीत्यनेन परिहृतम् तद्व्याचष्टे * घृते चेति * ननु विध्युद्देशमात्रपरामर्शात्स्नेहमात्रप्रतीतिर्भवत्येवेति कथमुच्यते न सामान्यं विहितमित्याशङ्कानिरासार्थत्वेन सन्दिग्धेष्विति भाष्यावयवं व्याचष्टे * सन्देहमात्रं हीति * पूर्वमनिर्द्धारितविशेषाभिप्रायेण सामान्यशब्दं व्याख्याय द्रव्यसामान्यमपि न विहितमिति यथाश्रुतं व्याख्यातुमाह * क्रियामात्रमिति * विधानेत्यादिभाष्यस्यापर्यवसानाभिप्रायेण श्लोकेनैव व्याख्यातत्वान्नापीत्यस्य च घृतेः प्रत्यक्षस्तुतिसद्भावात्सामान्यस्नेहमात्रस्य तैलादेः साक्षात्स्वयमेव विधितः स्तुतिः कल्पयितुं न युक्तेत्येव विधेः प्ररोचनैकल्पनाशङ्कानिरासार्थत्वेन कल्पयितव्या चेत्यादिनैव व्याख्याततत्वाल्लक्षणयेति भाष्यं लक्षणात्रयोपलक्षणार्थत्वेन व्याख्यातुमाह * तैलादीति * तस्मादित्युपसंहारभाष्यं व्याचष्टे * तस्मादिति * वृत्त्यन्तरोदाहृतमन्त्रवर्णापेक्षणे भाष्यकृतो ऽभिप्रायमाह * वृत्त्यन्तरेष्विति * विध्यर्थवादयोर्भिन्नवाक्यत्वाभ्युपगमेनास्मिन्विचारे तुल्यन्यायत्वान्मन्त्रवर्णो[१] ऽप्युदाहरणं स्यात् भिन्नवाक्यगतस्य विशेषशब्दस्यात्रैव नियामकत्वे ऽभिहिते षष्ठान्त्यमनर्थकं स्यादित्यर्थः। ३।३।२।१२

॥ अथ सामर्थ्यानुसारेण अव्यवस्थितानां व्यवस्थाधिकरणम् ॥ १९ ॥

अर्थाद्वा कल्पनैकदेशत्वात् ॥ २४ ॥

वाक्यशेषस्य सन्दिग्धार्थनिर्णायकत्वे स्तावकत्वातिरिक्तधर्मप्रमोपयोगद्वाराभिधानार्थं व्युत्पादिते प्रसङ्गात्सामर्थ्यस्यापि सन्दिग्धार्थनिर्णायकत्वव्युत्पादनेनानन्तराधिकरणसङ्गतिं सूचयन् पूर्वसूत्रगतसन्दिग्धपदानुषङ्गेण सूत्रं व्याचष्टे * अथेति * नन्वर्थशब्दोक्तसामर्थ्यकल्प्यद्रवादिविषयविशेषस्याशाब्दत्वाच्छाब्देन विधिना ऽन्वयो न सम्भवतीत्याशङ्कानिरासार्थत्वेनैकदेशत्वादिति सूत्रावयवं व्याख्यातुं सामर्थ्यकल्पितेन शब्देन * विध्यंशेनेत्युक्तम् * व्यवस्था-

१ प्ररोचकत्वेति २ पु० पा०।

र्थत्वेन कल्पनाशब्दं व्याख्यातुं निर्णयशब्दः । ननु सामर्थ्यस्य लि-
ङ्गत्वात्तत्प्रामाण्यं व्युत्पादनस्य च तृतीयविषयत्वान्नास्मिल्लक्षणे
सङ्गतिरित्याशङ्क्य प्रासङ्गिकसङ्गतिसूचनाय * अथेत्युक्तम् * प्रस-
ङ्गकारणं[1] वक्तुं सन्दिग्धशब्दः इतिकरणोभ्रान्त्युत्पन्नतैलाद्याकाङ्क्षे-
ति वार्त्तिकसूचितविध्युद्देशमात्रपर्यालोचनोत्थविषयोपलक्षणभूता
व्यवस्थितार्थप्रतीतिरूपसन्देहप्रकारपरामर्शार्थः । न्यायावताराङ्गभूत-
स्तु सन्देहः किमव्यवस्थितविषयतया भासमानस्य विधेरव्यवस्थित-
विषयतैवोचिता सामर्थ्याद्वा विषयव्यवस्थाकल्पनायेत्येवं रूपो यथा
भाष्यमेव स्पष्टत्वान्नोक्तः । विधेर्वस्तुसामर्थ्यापेक्षासदसद्भावसन्दे-
हश्च तत्कारणमाख्यातशब्दानामर्थं ब्रुवतां शक्तिः सहकारिणीति
सिद्धान्तभाष्यपर्यालोचनयावगन्तुं शक्यत्वान्नोक्तम् । पूर्वपक्षो ऽपि
प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षणे वेदस्य सापेक्षत्वेनाप्रामाण्याप-
त्तेर्वस्तुसामर्थ्यानपेक्षत्वात्तीक्ष्णपुष्करधारस्य च स्रुवस्य संहतशब्दो-
क्तकठिनद्रव्यावदाने पि सामर्थ्यसम्भवादायसावष्टम्भेन स्रुवहस्त-
योर्मांसावदाने ऽपि शक्तिसम्भवात्कोटरवतश्च स्वधितेर्द्रवावदाने
ऽपि सामर्थ्योपपत्तेरनुग्राहकापेक्षायामपि निरपेक्षसाधनत्वाविघा-
तादव्यवस्थैव युक्तेत्येवंरूपो भाष्योक्तविशेषानभिधानेनैव स्पष्टत्वा-
न्नोक्तः वाक्यशेषप्रत्युदाहरणरूपेणात्र पूर्वपक्षिणः प्रत्यवस्थानादन-
न्तरसङ्गतिं वक्तुम् * यत्र वाक्यशेषो न विधीयतइत्युक्तम् * सापे-
क्षत्वेन वेदाप्रामाण्यापत्तेः प्रमाणान्तरगम्यवस्तुसामर्थ्यापेक्षा विधेर्न
युक्तेत्याशङ्कानिरासायैवकारः । असाक्ष्यार्थानुष्ठानायोगात्प्रवर्तकत्व-
व्याघातापत्तेः सर्वविधिभिः सामर्थ्यस्यावश्यापेक्षणीयत्वात्सामर्थ्य-
स्य च प्रमाणान्तरगम्यत्वे ऽपि विषयस्यान्यतो ऽनवगतेर्वेदस्य नै-
रपेक्ष्याविघातात्तीक्ष्णपुष्करधारिणापि स्रुवेण मांसावदानाशक्तेर्नि-
रपेक्षसाधनत्वविरोधाच्चायसावष्टम्भकल्पनानुपपत्तेः । केवले-
नापि च स्रुवेण द्रवावदानोपपत्तेरायसस्यानुग्राहकत्वकल्प-
नायोगात्स्वधितेश्च रूपं वा शेषभूतत्वाद्विल्वलेन न्यायेन वा-
सोवल्लोकसिद्धस्य चोपादेयत्वात्कोटरकरणेन सामर्थ्याधीनक-
ल्पनानुपपत्तेः सामर्थ्याद् व्यवस्थितविषयत्वकल्पना युक्तेत्याशयः ।
स्रुवाद्युदाहरणेषु सामर्थ्येनानुवाद्यगतसन्देहनिरासदर्शनाद्विधेय-
गतसन्देहनिरासासामर्थ्यशङ्कानिरासायोदाहरणान्तरस्य सिद्धान्त-
भाष्ये दत्तस्याकोशे ऽप्यञ्जलिशब्दवाच्यद्विहस्तसंयोगाविरोधात्स-
न्देहविषयत्वानुपपत्तिमाशङ्क्याकोशाख्यविशेषाविवक्षासदसद्भाववि-

१ प्रकारमिति २ पु० पा० ।

षयत्वेन सन्देहमुपपादयच्छ्लोकं व्याचष्टे * देवतेति * एकदेश-
संयोगे ऽपि संयोगप्रसिद्धेः सर्वावयवसंयोगप्रदर्शनार्थं संहतयोर्ह-
स्तयोः * संयोगइत्युक्तम् * आकोशशब्दवाच्यैषत्कोशाकार-
व्यावृत्त्यर्थो मात्रशब्दः । आकोशे तर्हि सर्वावयवसंयोगाभावान्नाञ्ज-
लित्वं स्यादित्याशङ्क्य नाञ्जलिनेति प्रयोगो दर्शितः संहतत्वाकोशत्व-
योर्विशेषयोः सामान्यवाचिनो ऽञ्जलिशब्दात्सन्देहः सक्तुहोमे ऽञ्ज-
लिचोदनायां भवतीत्यर्थः। चोदनाशब्देन विधेयगतत्वं दर्शितम्। अ-
सति चेत्यनेन उक्तवत्सन्देहव्यावर्त्तकाकोशविषयवाक्यशेषाश्रवणे
ऽपि होमान्यथानुपपत्तिकल्पितेन वाक्यशेषेणाकोशनिर्णयाभिधा-
नाच्छ्लोको व्याख्यातः । ननु सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यक-
ल्पितवाक्यशेषानुरोधेन विषयसङ्कोचाभ्युपगमे दर्शपूर्णमासविधेर-
पि सामान्यतः सर्वाङ्गविशिष्टकर्मविषयप्रवृत्तस्य सामर्थ्यकल्पितवा-
क्यशेषानुरोधेन शक्यमात्राङ्गविषयतया सङ्कोचापत्तेरन्धादीनामपि
कर्मण्यधिकारप्रसङ्गात्तिर्यगधिकरणविरोधः स्यादित्याशङ्कते * न-
न्विति * येन प्रकारेण कर्त्तुं शक्नुयात्तेन प्रकारेण कुर्यादिति वा-
क्यशेषेणान्धादीनामाज्यावेक्षणादिप्रकारव्यावृत्तेस्तद्रहितो ऽधिकारः
स्यादित्यर्थः । विधिस्त्वेकश्रुतित्वादित्येकादशाधिकरणन्यायेन स-
र्वाङ्गोपसंहारनिश्चयात्किमङ्ग प्रयोक्तव्यमिति सन्देहानुपपत्तेर्नात्र
सामर्थ्यानुरोधेन सङ्कोचापादको वाक्यशेष इति परिहरति *नेति*
एतदेव विवृणोति * सन्दिग्धेति * ननु प्रयोगविधिपर्यालोचनया
सर्वाङ्गोपसंहारावगमे ऽप्यधिकारस्य सामर्थ्यानपेक्षत्वादन्धादेश्चा-
ज्यावेक्षणादौ सामर्थ्याभावात्किं प्रयोगशास्त्रानुरोधेनाधिकारशास्त्रं
समस्ताङ्गोपसंहारसमर्थपुरुषविषयतया सङ्कोचनीयमधिकारशास्त्रा-
नुरोधेन वा प्रयोगशास्त्रं शक्यमात्राङ्गविषयतयेति सन्देहे ऽधिकार-
स्य फलपर्यवसायित्वेन प्राधान्यात्तदनुरोधेन यथा शक्नुयात्तथा
कुर्यादिति वाक्यशेषकल्पनया प्रयोगविधेः शक्यमात्राङ्गविषयतया
सङ्कोचोपपत्तेरन्धाद्यधिकारो दुर्वार इत्याह * न चेति * कार्ये
ज्ञाते ऽधिकारः स्यादित्यनेन न्यायेन प्रयोगविधिप्रयोज्यसमस्ताङ्गाव-
धारणपूर्वकत्वेनाधिकारविधेरेव प्रयोगविध्यनुरोधवृत्तित्वस्य न्या-
य्यत्वात् समस्तधर्मोपेतं यः शक्नुयादिति वाक्यशेषकल्पनेन सर्वा-
ङ्गोपसंहारसमर्थस्यैवाधिकारनिश्चयान्नाधिकारे ऽपि सन्देह इत्यपि
शब्दार्थे चशब्दमङ्गीकृत्य योज्यम् । यः शक्नुयात्स कुर्यादिति वक्तव्ये
प्रतिसमाधेयाङ्गवैकल्ये सति तिमिराद्यपनयनेनापादितस्याप्यधिका-
रसद्भावमङ्गहीनस्य तद्धर्मेत्यत्र षष्ठाद्यधिकरणएव वक्ष्यमाणं सूच-

यितुं यथा शक्नुयात् * तथा कुर्यादित्युक्तम् * द्रव्येन्द्रियवैकल्यादिना स्वतो ऽशक्तो ऽपि द्रव्यार्ज्जनादिना यथा शक्तो भवति तथा शक्तिमापाद्य सर्वधर्मोपेतं कुर्यादित्यर्थः । यदि तु न कश्चित्सर्वाङ्गोपसंहारसमर्थः स्यात्ततः कतिपयाङ्गोपसंहारेणाप्यधिकारः कल्प्यते नन्वेतदस्तीत्याह * सन्ति चेति * अतः प्रयोगविधेः सङ्कोचं विना ऽनुपपत्त्यभावान्न शक्यमात्राङ्गविषयतया सङ्कोचकल्पना युक्तेत्युपसंहरति * इतीति * नन्वेवं सति नित्याधिकारे ऽपि यः समस्तधर्मोपेतं कर्त्तुं शक्नुयात्सो ऽवश्यं कुर्यादिति वाक्यशेषकल्पनया सर्वाङ्गोपसंहारसमर्थस्यैवाधिकारोपपत्तेः सर्वशक्त्यधिकरणविरोधः स्यादित्याशङ्क्याह * यत्र त्विति * जीवने सत्यप्यकरणे जीवितस्य निमित्तत्वव्याघातापत्तेः पौर्णमास्यादिकालवद्याज्यावेक्षणादेरुपादेयत्वेनानुपादेयनिमित्ततावच्छेदकत्वायोगान्निमित्तपरतन्त्रत्वाच्च प्रयोगविधेस्तदनुरोधेन निमितश्रुतिबाधायोगान्निमित्तश्रुत्यवगतावश्यकर्त्तव्यतानुरोधेन यावज्जीवादिप्रयोगविधेः शक्यमात्राङ्गविषयतया सङ्कोचकल्पना युक्तेत्याशयः । प्रयोगचोदनान्यथानुपपत्तिरेव शब्देन परामृष्टा । अनुष्ठानमात्रादविषयश्चात्र सङ्कोचः कल्प्यते प्रयोगविधिस्तु नित्याधिकारे ऽपि सर्वाङ्गविशिष्टमेव प्रधानमनुष्ठापयतीति तत्रापि सामर्थ्यापादने यतितव्यमिति त्यागशब्देन सूचितम्। अशक्याङ्गत्यागस्य च विधिनानुज्ञातत्वान्न वैगुण्यापादकतेति विशेषेणोक्तम् चोदनयानुज्ञातत्वं चोदनाशब्देनोक्तम् अतः कामाधिकारे ऽन्धादीनामधिकारस्यानिर्दिष्टस्यानापत्तेर्नित्याधिकारे चापाद्यमानस्येष्टत्वात्सामान्यतः प्रवृत्तस्य विधेः सामर्थ्यानुरोधेन सङ्कोचकल्पने ऽपि नानिष्टापत्तिरित्युपसंहरति * इतीति * अन्धादीनामधिकारमिति विपरिणतेऽव्यवहितान्वयेन योज्यम् । ननु यदि सामर्थ्येनाश्रुतो ऽपि वाक्यशेषः कल्प्यते ततः कामाधिकारे सन्देहाभावे ऽपि यथा शक्नुयात्तथा कुर्यादिति वाक्यशेषस्य कल्पयितुं शक्यत्वादन्धाद्यधिकारो ऽनिवार एव स्यादित्याशङ्क्याह*तस्मादिति* अयमाशयः वैदिकस्यार्थस्य प्रमाणान्तरगोचरत्वाद्वैदिक एव वाक्यशेषः सामर्थ्येन कल्पनीयः कल्प्यस्य वाक्यशेषस्य वेदानुगतत्वेन व्यतिरिक्तं वैदिकत्वं न सम्भवति न च निर्णितार्थो वेदो वाक्यशेषमनुमन्यतइति तस्माच्छब्दस्य योग्यतया चोदितशब्दोक्तचोदनानुमितत्वपरामर्शित्वात् चोदनयानुमतत्वादित्यर्थः । अलब्धात्मकशब्देन सन्दिग्धार्थत्वात् * अपर्यवसितत्वमित्युक्तम्* सिद्धशब्देन पर्यवसितत्वं पौरुषेयत्वशब्देन पुरुषोत्प्रेक्षाप्रभवत्वम् । ननु

वैदिकशब्दसामर्थ्यस्यैव वेदानुमतत्वात् वैदिकत्वोपपत्तेः किं वाक्यशेषकल्पनयेत्याशङ्क्याह * सामर्थ्येति * वाक्यशेषसिद्धमात्रं सामर्थ्याधीनं न वैदिकार्थनिर्णयः शब्दैकसमाधिगम्यत्वात्तस्य सामर्थ्यस्य चाशाब्दत्वात्कल्पितस्य चार्थस्याशाब्दवैदिकार्थान्वयानुपपत्तेर्वेदानुमतत्वासम्भवादित्याशयः। ननु व्यवस्थितविषयस्य सामर्थ्यस्य व्यवस्थितविषयमङ्गत्वं विनानुपपत्तेः सामर्थ्यव्यवस्थयाङ्गत्वं व्यवस्थामात्रं कल्पयितुं युक्तम्। शब्देन तु विनानुपपत्त्यभावाच्छब्दकल्पना न युक्तेत्याशङ्क्य सामर्थ्यस्य शब्दकल्पकत्वे वृद्धसम्मतिमाह * आह चेति * विभज्यमानसाकाङ्क्षसंहत्यार्थविशिष्टैकार्थप्रतिपादकपदसमुदायस्य वाक्यत्वात्तस्य च वाक्यार्थप्रतिपत्त्युपायभूतकल्पपदार्थवाचिपदाभावे सकाङ्क्षत्वेनापरिपूर्णस्य विशिष्टार्थप्रतिपादकत्वायोगाद्विशिष्टाश्रुतिपादनार्थं[1] च विना व्यवहारासाधनत्वेनानर्थक्यापत्तेः परिपूर्णत्वाय श्रुतपदैकवाक्यभूतपदान्तरकल्पना युक्तेति भावः। प्रतिपत्तेर्नित्यं प्रतिपाद्यसापेक्षत्वात्प्रतिपत्तिशब्दस्य श्रुतिशब्दसापेक्षत्वे ऽपि उपायशब्देन सह समासाविघातः सामर्थ्यकल्पितायाः श्रुतेः स्मृतिकल्प्यश्रुतिवत् पृथक्वाक्यत्वाभावाच्छ्रुतवाक्यशेषभूतपदविषयः श्रुतिशब्दः। ननु कल्प्यानां श्रुतीनां कस्य चिच्छाखायामनाम्नानादभावावगतेः शशशृङ्गवत्कल्पना न युक्तेत्याशङ्क्य * तेनैव चेत्युक्तम् * सामर्थ्यलभ्यत्वेनाम्नानोपपत्तेर्नाभावकल्पना युक्तेति भावः। ननु सामर्थ्यलभ्यानामपि प्रतिपत्तिसौकर्यादाम्नानं युक्तमित्याशङ्क्य * सहस्रेत्युक्तम् * सहस्रशब्दो ऽयमनन्तवाची। सामर्थ्यलभ्यानामाम्नाने ऽनन्तावयवत्वेनाम्नानापत्तिरिति क्लेशः स्यादित्यर्थः। श्रोतृप्रोत्साहनाय सूत्रकृतः शास्त्रभयशङ्कानिरासाय यत्नपूर्वकमर्थचिन्तां कुर्वता राज्ञा सह रूपकालंकारद्वारेण श्लेषं दर्शयन् प्रमाणलक्षणसमाप्तिं तस्याश्च प्रमेयचिन्तार्थोत्तरैकादशलक्षणीं प्रति हेतुत्वात्तदारम्भसम्भवं सूचयति * इतीति* बहुमार्गं विस्तीर्णं च दुर्गं तद्रक्षिणां प्रवेशनिर्गमनविरोधाशक्तेः परिखाप्राकारोपेतं चतुरस्रं प्रवेष्टुमशक्तेः परैरभिभवितुमशक्यं प्रविश्यार्थस्य हिरण्यादेः कियानर्थः कश्च किमर्थः किमर्थं वोपादीयते केन च क्रमेण कश्च कस्मिन्स्वामीत्यादिविभागेन चिन्ता क्रियते तथा धर्मस्यापि दुरधिगमत्वात् दुर्गत्वेनोपचरितस्य मन्त्रादिभिः कृताः कर्मस्मृत्यादयः प्रकारभेदेन प्राप्तिहेतुत्वात् बहवो मार्गाः नामधेयसामर्थ्ययोर्विध्यन्तर्भावाद्वाक्यशेषस्य चार्थवादान्तर्भा-

१ विशिष्टार्थप्रतिपादनमिति २ पु॰ पा॰।

वात्पृथगुपन्यासः । स्मृतिशब्दोपलक्षितानि वेदातिरिक्तधर्मप्रमाणानि शिष्टाचारसहितानि विद्यास्थानानि प्रकारतयोपचरितवेदव्यवधानेन धर्मदुर्गरक्षाहेतुत्वात् वेदाच्चापकृष्टत्वात्परिखात्वेनोपचरितानि साक्षाद्धर्मदुर्गरक्षाहेतुत्वात् वेदानां प्रकारस्थानीयशालाशब्देन गृहवाचिना परिवेष्टनभित्तिरूपत्वगुणवशेन प्राकारत्वोपचारः । गृहतेः सम्वरणार्थत्वात् सम्वरणेन च सम्वेष्टनापरपर्यायेण शत्रुकृतपराभवात् दुर्गस्य रक्षणात् वेदाख्यशालया प्राकारेण गूढं रक्षितमित्यर्थः । साक्षाद्रक्षाहेतुत्वसूचनायोपशब्देन सामीप्यमाधिक्यं चोक्तम् प्रमाणस्य प्रमेयतद्भावपरिच्छेदकत्वाद्रक्षितत्वोपचारः । बहुदातर्युदारशब्दप्रसिद्धेर्विस्तीर्णबहूनामवकाशदानादुदारशब्देन विवक्षितम् पराक्रान्तेदुर्गे तान्सम्प्रविश्येत्यनेन साधितम् । दुर्गमिति व्यवहारात्साधने प्रवेशत्वेनोपचारः । वेदार्थस्याप्यर्थशब्दवाच्यत्वसामान्येन हिरण्यादिना श्लेशस्तस्यापि हिरण्यादिवत्परिमाणविनियोगप्रयुक्तिक्रमाधिकार्यादिप्रविभागेन द्वितीयादौ चिन्तां करोतीत्यर्थः । प्रथमपादे प्रमाणचिन्तापर्यवसानादर्थचिन्तैव त्रिपाद्यामपि कृतेत्याशङ्कानिरासाय * इदानीमित्युक्तम् * अर्थवादपादगतस्य विचारस्यार्थपरत्वाभावे ऽपि नामधेयपादगतस्यार्थपरत्वशङ्कानिवृत्त्यर्थं समस्तशब्दः ।

इतिकरणः समस्तोक्तप्रकारपरामर्शार्थः ।

इति श्रीमत्त्रिकाण्डमीमांसामण्डनप्रतिवसन्तसोमयाजिभट्टमाधवात्मजभट्टसोमेश्वरविरचितायां तन्त्रवार्त्तिकटीकायां सर्वानवद्यकारिण्यां न्यायसुधाख्यायां प्रथमाध्यायस्य चतुर्थः पादः अध्यायश्च समाप्तः ।

॥ न्यायसुधायाम् ॥

॥ द्वितीयाध्यायस्य प्रथमः पादः ॥

॥ अथापूर्वस्याख्यातप्रतिपाद्यत्वाधिकरणम् ॥ १ ॥

भावार्थाः कर्मशब्दास्तेभ्यः क्रिया प्रतीयेतैष ह्यर्थो विधीयते ॥ १ ॥ ३३४।८

प्रथमे ऽध्याये इत्यादिना प्रसक्तानुप्रसक्तं चेत्यनेन कृतस्य वृत्तवर्त्तिष्यमाणार्थकीर्त्तनस्य प्रयोजनमाह * सम्बन्धं तावदिति * पाठक्रमेणोपक्रमभाष्यविषयत्वज्ञानात् भाष्याननुभाषणं तावच्छब्दा-द्यपूर्वं तावत् सम्बन्धं करोति पश्चात् व्याख्यामिति प्रतीतेरुपक्रम-भाष्यविषयत्वज्ञानं सर्वेषां वा वृत्तवर्त्तिष्यमाणाध्यायार्थकीर्त्तनानां लिङ्गेन क्रमं बाधित्वा साधारणप्रयोजनाभिधानायेदमिति न भा-ष्यविशेषो ऽनुभाषणीयः। एकादशानामप्यध्यायानां प्रथमाध्यायो-क्तप्रामाण्यापेक्षत्वान्न द्वितीयाध्यायार्थमात्रकीर्त्तनमसाधारणसम्ब-न्धार्थमुक्तमित्याशङ्का लक्षणद्वयस्येत्यनेन निराकृता। भेदादिसापेक्षस्य प्रामाण्यस्य शेषादिहेतुत्वे ऽप्यन्यानिरपेक्षस्य भेदमेव प्रति हेतुत्वा-दसाधारण्यमन्यथा भेदादीनामप्युत्तराध्यायार्थान् प्रति आसाधा-रण्यानुपपत्तेरित्याशयः। यद्वा कर्मोत्पत्तिप्रतिपादनेनोत्पन्नस्योत्पत्ति-विध्यानर्थक्यप्रसङ्गात्तत्परिहाराय शब्दान्तरादिभिर्भेदः प्रतिपाद्यते सिद्धप्रामाण्यस्य ह्यानर्थक्यं परिहरणीयमिति प्रामाण्यापेक्षो भेदः अवघातादीनां त्वाज्याद्यर्थत्वे ऽप्यदृष्टार्थत्वेनार्थवत्त्वोपपत्तेः। सर्व-त्रापि चैवमेव वक्तुं शक्यत्वान्न प्रामाण्यबलेन शेषादिसिद्धिरिति असाधारण्यं स्पष्टम्। किं च को धर्मः कथं लक्षणः कान्यस्य सा-धनानि कान्यस्य साधनाभासानि किं परश्चेति चतुर्विधा धर्मजिज्ञा सा प्रथमसूत्रेणोपक्षिप्ता तत्राध्यायद्वयप्रतिपाद्यप्रमाणस्वरूपविषयं प्रतिज्ञाद्वयं श्रुत्यर्थाभ्यां द्वितीयसूत्रेण कृत्वा तस्य निमित्तपरीष्टिरि-त्यादिना प्रथमाध्यायेन वेदप्रामाण्ये साधिते तद्बलेन चैत्यवन्द-नादीनां धर्मत्वव्युदासेन ज्योतिष्टोमादीनामेव धर्मत्वमिति धर्म-

स्वरूपे ज्ञाते ऽपि इयन्त्येव धर्मस्वरूपाणीति कार्त्स्न्येन धर्मस्वरूपं भेदनिरूपणाधीनज्ञानमित्यध्यायद्वयस्य चोदनासूत्रपरिकरत्वात्स्पष्टतरासाधारणेह सङ्गतिरिति । यथोक्तम् ।

अथ वा द्वयमेवेदं सर्वशास्त्रमुखं मतम् ।
द्वयध्याय्याश्चोदनासूत्रं शेषाणां शेषलक्षणम् ॥
चोदनासूत्रनिर्दिष्टो यः प्रामाण्यपरिग्रहः ।
सप्रकारः स आद्येन लक्षणेन प्रपञ्चितः ॥

इति सम्प्रत्येतदेवभाष्यमवयवशो व्याख्यास्यन् वृत्तानुकीर्त्तनभाष्यावयवद्वयं प्रतीकेनानुभाष्याक्षिपति * तत्रेति* धर्मप्रमाणस्य विध्यात्मकस्य वेदस्य तत्र प्रामाण्यव्युत्पादनात्कथमयुक्तमिति मत्वा पृच्छति * कुत इति * अभिप्रायमाह * नैव हीति * सजातीयविजातीयार्थान्तरव्यावृत्तासाधारणधर्मप्रतिपादको रूढ्या लक्षणशब्दस्तार्किकाणां प्रसिद्धस्तदभ्युपगमेनाप्येतत्समर्थयितुं शक्यमित्येतत्प्रतिपादनार्थो ऽयमारम्भः परमार्थतस्तु नानाकर्मलक्षणमित्यादिवत् व्युत्पादनमात्रार्थः प्रमाणलक्षणशब्दो ऽपीति न चोद्यावकाशः विध्यादावपि परिहारदर्शनादादिशब्देन तद्ग्रहणं प्रत्यक्षाद्यभिप्राये प्रमाणशब्दे तल्लक्षणमुपसंह्रियेत तस्य त्वसौत्रत्वेनाध्यायार्थत्वाभावादनुपसंहार्यत्वे वक्तुम् सूत्रकारेणेत्युक्तम् * अभिप्रायं स्पष्टयति * तन्नामेति * नामशब्देन रूढ्यर्थत्वं दर्शितं सूत्रकारेणेत्येतद्व्याचष्टे * अनुमानादीनीति * प्रत्यक्षलक्षणमपि न सूत्रितं प्रत्यक्षसूत्रस्याप्यनिमित्तपरत्वादित्याह * प्रत्यक्षमपीति * ननु चोदनासूत्रेण चोदनाया धर्मप्रामाण्याभिधानाद्धर्मप्रमाणस्य चोदनात्वं लक्षणमुक्तं भवत्यत आह * न चेति * धर्मानुवादेन प्रमाणविशेषविधिपरं तन्न प्रमाणस्य चोदनात्वलक्षणविधिपरं न चार्थात्तत्परत्वमन्यतः सिद्धत्वादित्याह * अस्मिन्नेवेति * साध्यसाधनसम्बन्धरूपधर्मप्रमाणमूलस्याख्यातशब्दस्य येषां तूत्पत्ताविल्यत्र वक्ष्यमाणत्वादित्यर्थः । नन्वसूत्रितस्यापि प्रत्यक्षादिलक्षणस्य वृत्तिकारोक्तत्वादुपसंहारो भविष्यत्यत आह * यदपीति * हेतुमाह * सूत्रेति * अध्यायार्थो ह्युपसंहार्य्यः सूत्राश्रितत्वाच्चाध्यायव्यवस्थायाः सूत्रारूढस्यैवाध्यायार्थत्वमिति भावः । सूत्रारूढो ऽध्यायार्थ इति शाकपार्थिवादित्वान्मध्यमपदलोपेन समासः । न च तद्व्याख्यातएवार्थे सूत्रतात्पर्यं कल्प्यं प्रतिज्ञातचोदनाप्रामाण्यतत्सिद्ध्यर्थेतराप्रामाण्यतदुभयोपपत्तिप्रतिपादनरूपसमस्तलक्षणार्थव्यतिरिक्तरूपत्वादित्याह * कथं चेति * प्र-

त्यक्षसूत्रावयवमात्रस्य लक्षणपरत्वोक्तावपि औचित्यकथनार्थम् *सूत्राणीत्युक्तम् * न च तेनापि लक्षणपरत्वमुक्तम् उपक्रमोपसंहारपर्यालोचनेनापरीक्षापरत्वावसायादित्याह * अपि चेति * तद्विवृणोति * लोकेति * विध्याद्याक्षेपस्य विधेरिदं रूपमित्यादिना परिहारे विवरिष्यमाणत्वादिहाप्रपञ्चः समाधातुमुपक्रमते * तस्मादिति * आद्यावयवस्य तावत्समाधानप्रकारमाह * तत्रेति * प्रमाणलक्षणमिति यदुक्तं तच्चोदनालक्षणसूत्रोक्तार्थानुवादार्थमित्यर्थः । द्वितीयावयवसमाधानप्रकारमाह *विध्यादीति* विध्यादीनां प्रामाण्येन या निर्णीतिः स्थिता सैव तत्त्वनिर्णीतिरभिप्रेतेत्यर्थः । ३३५।२

नन्वध्यायसङ्गत्यै समस्ताध्यायार्थानुवादो युक्तो नैकसूत्रार्थानुवादः। अथ सर्वेण वृत्तानुकीर्त्तनभाष्येणावयवशः समस्तानुवादो नैतावतेत्युच्यते तथापि विध्यर्थवादेत्यादिना त्रिपाद्यर्थानुवादात्समस्तप्रथमपादार्थः पूर्वावयवत्वेनानुवाद्यो ऽत आह * समस्तो हीति * अध्यायद्वयस्यापि तत्परिकरत्वे त्रिपाद्यर्थस्योत्तरावयवैरनुवादात्प्रथमपादार्थमात्रानुभाषणार्थत्वमस्य दर्शयितुं तस्य तावत्परिकरत्वमस्तीत्यभिप्रेत्य प्रमाणान्तरनिरासेन वा सम्मुग्धवेदप्रामाण्यं तन्मात्रेण पर्यवस्यतीत्याभिप्रेत्य प्रथमपादोक्तिः कथं चोदनासूत्रेण प्रमाणलक्षणाभिधानमित्यभिप्रेत्य स्वरूपवचनव्यक्तिपक्षे तावदुपपादयति *तत्र चेति * यश्चोदनाप्रमाणकः स धर्म इत्युक्ते चोदितत्वं धर्मस्य लक्षणमुक्तं भवतीति भावः। चोदनाप्रमाणकत्वं वा धर्मस्य लक्षणत्वेनोक्तमित्यध्याहार्यं भाष्ये धर्मशब्दानुपादानात्कथमेतदर्थलाभ इत्याशङ्क्याह * अत इति * कर्मव्युत्पत्तावपि कथं विशेषलाभो ऽत आह * सत्यपि चेति * इदानीं प्रमाणवचनव्यक्तिपक्षे ऽप्युपपादयत्यथ वेति प्रत्यक्षादिविषयत्वाशङ्कां निराकर्तुमाह * यद्यपि चेति * प्रमाणविधिपरत्वात्तस्य कथं तदनुवादेन लक्षणविधिपरत्वमित्याशङ्क्यार्थादुक्तं भवतीति दर्शयितुम् * एतावतैवेत्युक्तम् * चोदनात्वस्य लोकवेदसाधारण्येनातिव्यापकत्वादलक्षणत्वमाशङ्क्याह * न चेति * विजातीयव्यावृत्त्या क्रियावत्त्वस्येवाद्रव्यव्यावृत्त्या कथं चिल्लक्षणत्वं सम्भवतीति भावः । औत्पत्तिकसूत्रेण वा नित्यत्वाद्यभिधाने वैदिकत्वलाभान्नातिव्याप्तिरित्याह * अपि चेति * एवं तार्किकाभिमतं लक्षणशब्दार्थमुपपाद्य स्वतन्त्रप्रक्रियया न्यायव्युत्पादनार्थत्वात्समञ्जसमेवानुभाषणमित्याह *अथ वेति * एवं त्रिप्रकाराद्यावयवव्याख्यानेन पूर्वार्द्धं प्रपञ्च्योत्तरार्द्धं व्याचष्टे * तथेति * विध्यादीनां प्रामाण्योपयोगीद्वारविशेषः प्रवर्त्तकत्वस्तावकत्वस्मार-

क्रत्वरूपस्तत्त्वशब्दार्थो ऽभिमतः। किमित्यसौ द्वारविशेषो न स्पष्टमनुक्रान्तो ऽत आह * अवसराभावादिति * भेदलक्षणासङ्गत्यैतद्धेतुमात्रानुभाषणस्योपयोगादिति भावः। स्मृतिप्रामाण्योपयोगिनं द्वारविशेषमाह * श्रुतिमूलत्वमिति * स्मृतिमूलस्येत्यध्याहारः एवमवयवद्वयमाक्षेपपूर्वकं व्याख्यायेदानीं तृतीयावयवे वाक्यार्थविचाराभावाद् गुणविधिग्रहणानुपपत्तिमाशङ्क्याह * नामधेयस्येति * सत्यं नामधेयप्रामाण्यमेव सप्रपञ्चमुक्तं तस्य तु चोदनान्तर्गतत्वादाग्नेयादौ तदसम्भवे ऽर्थवादत्वानुपपत्तेः परिशेषाद् गुणविधित्वमेव भवतीति दर्शयितुं तद्ग्रहणमित्यर्थः। चतुर्थावयवे सन्दिग्धे विशेषणस्य प्रयोजनमाह * सन्दिग्धार्थेति * प्रथमपादमात्रे चेत्प्रमाणलक्षणोक्तिः कथमध्यायस्य प्रमाणलक्षणाख्येत्याशङ्क्याह * एवमिति * उक्तेन प्रकारेण सामान्यविशेषाभ्यां समस्तस्य प्रामाण्यव्युत्पादनार्थत्वादिति भावः। तत्र प्रस्मर्त्तव्यामिति भाष्यमध्याययोर्हेतुहेतुमद्भावप्रतिपादनार्थतया व्याचष्टे * तत्रेति * वर्त्तिष्यमाणार्थकीर्त्तनभाष्यमनन्तरमित्यादि तत्र प्रधानाप्रधानानीत्यवयवं भेदलक्षणासङ्गतत्वेनाक्षिपति * ननु प्रधानेति * प्रधानाप्रधानचिन्तादिशेषशेषिरूपत्वात्साक्षात्तृतीये सङ्गच्छते। चतुर्थे ऽपि फलक्रतुप्रयुक्तत्वविवेकार्थं यथोक्तं पुनः श्रुत्यादिषट्केन क्रत्वर्थपुरुषार्थयोः प्रयोज्यत्वाप्रयोज्यत्वशेषधर्मविचारणा। फलविध्यर्थवादत्वकालार्थाङ्गप्रधानता फलक्रतुप्रयुक्तत्वविवेकार्थं विचारिता इति अत्र तु कथं सङ्गतिरिति भावः। अत्राज्ञाताक्षेपाभिप्रायास्तानि द्वैधमित्यादिगुणप्रधानविचारदर्शनेनोत्पन्नभ्रमाभेदस्यैव लक्षणार्थत्वं निर्द्धारयितुमशक्नुवन्तः शेषशेषिविचाररूपेण सामान्येन पौनरुक्त्यमनेनाशङ्कितमिति मन्यमानाः परिहारमाहुरित्याह * केचिदिति *
३३६।२ दूषयति * तदयुक्तमिति * यवावघातसम्मार्गादीनां गुणकर्मत्वं स्तोत्रशस्त्रयोश्च प्रधानकर्मत्वमधिकरणान्तरसिद्धं स्यात् ततः पौनरुक्त्यशङ्कासम्भवात् तत्परिहाराभिधानं युज्येत शेषशेषिरूपतासामान्येन तु पौनरुक्त्यमनेनाशङ्क्य परिहारं द्रव्यगुणसंस्कारेष्वित्यत्र संस्कारशब्देनावघातादेर्द्रव्यशेषत्वाभिधानात् द्रव्यशब्देन द्रव्यस्य शेषत्वाभिधानेन तत्प्रति कर्मणः प्राधान्याभिधानादित्यर्थः। तस्मादेवं समाधेयमित्याह * तेनेति * सत्यन्तत्वेन लक्षणार्थत्वेन लक्षणं प्रति प्राधान्येन भेद एव लक्षणप्रतिपाद्यो ऽपूर्वभेदो ऽपि तु प्रतिपाद्य एव। न चैवं लक्षणभेदापत्तिरनुनिष्पादित्वात्तस्येत्युक्तम् * तमन्विति * अतस्तत्प्रसिद्ध्या प्राधान्यं विचार्यमाणं नासङ्गतमिति भावः।

तदयं भाष्यार्थः । अनन्तरं भिन्नान्यभिन्नानि च कर्माणि परीक्षिष्यन्ते तदनुनिष्पाद्यपूर्वभेदाभेदसिद्ध्यर्थं च द्रव्यं प्रति प्रधानान्यप्रधानानीति। ननु अभेदस्यापि परीक्षणे लक्षणभेदः स्यादत आह *कर्मभेदस्तावदिति * उत्सर्गापवादाभ्यां तस्यैव परीक्षेत्यर्थः। उत्तरार्द्धं व्याचष्टे * तदनुनिष्पादिना त्विति * एतदेव प्रपञ्चयत्समस्ताध्यायाधिकरणान्यनुक्रामति * तत्रेति * तत्र शब्देनापूर्वनिष्पादनपर्यन्तेन भावार्थाधिकरणेन कर्मशब्देभ्यो ऽपूर्वं प्रतीयतइति व्युत्पादयता कर्मभेदानुनिष्पादित्वे ऽपूर्वस्य सिद्धे * सतीत्युक्तम *तृतीयाविषयत्वेन प्रसिद्ध इत्यर्थः । यत्पुनः तृतीयविषयः सन्नत्रारभ्यते तदपवादत्वेनेत्यसङ्गतिनिरासार्थम् * पुनरित्युक्तम् * अपवादं दर्शयति * सत्यपीति * ननु चतुर्थे संस्कारे च तत्प्रधानत्वादित्यत्रावहन्त्यादीनां दृष्टार्थत्वेन प्राप्तत्वादविधेयत्वमाशङ्क्य नियमादृष्टार्थत्वेन देशादिवद्विधानं भविष्यतीति वक्ष्यमाणत्वात् कथमपूर्वाभावाभिधानमत आह * यत्त्विति * पुरोडाशनिष्पत्त्यर्थस्य तण्डुलीभावस्यानेकानि स्वनिष्पत्तिसमर्थानि साधनान्यालोचयतो यो ऽवघातविधिना साधनविशेषसमर्पणेन तत्रोपसंहारः क्रियते स एव नियमनिबन्धादिशब्देनोच्यते अर्थाक्षेपेण हि प्राप्स्यन्नप्यवघातस्तण्डुलीभावजनकत्वेन नियम्यमानो जन्यजनकनियमस्यादृष्टं प्रयोजनमपेक्षते ततश्चावघातेन तण्डुलीभावे कृते तज्जन्यत्वात्तण्डुलेष्वतिशयो निष्पाद्यमानो नावघातक्रियाजन्यो वक्तुं शक्यते तण्डुलोत्पादनानिरपेक्षावघातस्वरूपजन्यत्वाभ्युपगमे कृष्णलेष्वप्यतिदेशप्राप्तो ऽवघातो न वारयितुं शक्यते तस्मान्नियमादृष्टस्य चतुर्थाधिकरणे क्रियाजन्यत्वानभ्युपगमान्न तद्विरोध इत्यर्थः । अन्ये त्वर्थाक्षेपस्य विधिकल्पननिरपेक्षस्याप्रापकत्वेन मन्थरत्वादप्राप्तावस्थस्य क्रियास्वरूपस्यैव विधेयत्वात्प्रयोजनकल्पनोचिता न फलमात्रत्वेनावस्थितस्य नियमस्येति मन्वाना नियमादृष्टस्यापि क्रियाजन्यत्वमिच्छन्तस्तादर्थ्यमात्रनिराकरणपरतयेदं वार्त्तिकमेवं व्याचक्षते क्रियाजन्यक्रियाकृतशब्दाभ्यामीप्सिततमत्वमुद्देश्यत्वाद्यपरनामधेयमभिप्रेतं नोत्पाद्यत्वमात्रं न तया व्यपदिश्यतइति च क्रियोत्पाद्यत्वे सत्येवानुषङ्गिकत्वात्तद्व्यपदेशमात्रं निराकरणपरमिति आनुषङ्गिकत्वादेव च कृष्णलेष्ववघाताप्रयोजकत्वमिति भावः। अपवादसिद्धिमुपसंहरति *तेनेति* गुणकर्मस्वप्यदृष्टार्थेषु अपूर्वाङ्गीकरणादैकान्तिकीति पूरणीयं प्रोक्षणादिजन्यस्य वा व्रीह्याद्याश्रितस्यातिशयस्य फलस्थानीयत्वेनात्माश्रितावान्तरद्वाररूपापूर्वशब्दवाच्यत्वाभावात्त-

स्य चानन्तरभावित्वेन तत्सिद्ध्यर्थापूर्वान्तरकल्पने प्रमाणाभावात्प्रोक्षणजन्ये ऽतिशये प्रमाणान्तरागोचरत्वसाम्येनौपचारिको ऽपूर्वशब्दप्रयोग इत्यविरोधः । अस्य चेत्यादिभेदलक्षणार्थ इत्येतदन्तं सुगमम् * तदपवादार्थमिति * गुणत्वलक्षणस्यापवादः प्रधानत्वलक्षणं तदपवादार्थं प्रधानत्वलक्षणस्यापवादो गुणत्वलक्षणं तदपवादार्थमुत्तरमित्यर्थः । प्रक्रियाशब्देन विरुद्धलक्षणया प्रकरणान्तरमुक्तं । कैश्चित्तु प्रथमाध्यायप्रतिपादितप्रामाण्यस्य शास्त्रस्य साध्यानुबन्धभेदाभ्यां भेदो ऽस्मिन्नध्याये प्रतिपाद्यतइत्युक्तं तत्र साध्यं संयवनस्य पिण्डोत्पत्तिः गोदोहनस्य पयःप्राप्तिः अवघातस्य व्रीहिविकारः प्रोक्षणस्य संस्कार इति चतुर्विधमन्योन्यनिरपेक्षं भिन्नं सत्सामवायिकाङ्गशास्त्राणां भेदकं द्वितीयाश्रुत्या एषां साध्यनिष्ठत्वावसायात् क्रियारूपानुबन्धनिष्ठत्वाभावेन तद्भेदनिमित्तभेदायोगात्तथारादुपकारकाङ्गसाध्यः करणोपकारः प्रधानसाध्यानि करणावान्तरकार्याणीति तद्भेदेनाङ्गप्रधानशास्त्रभेदः समस्ताङ्गप्रधानसाध्यश्चैश्वर्यलक्षणो ऽधिकारः कामजीवनाधिकाररूपेण भिन्न इति तच्छास्त्रभेदाध्यवसानमिति शब्दान्तरादिप्रमाणकविषयापरनामधेयानुबन्धभेदाच्च यागहोमादिशास्त्राणां भेद इति तन्निराकरणार्थमेष एवार्थो वर्णनीयो नान्य इति भाष्यं व्याचष्टे * एष एवेति * अयमाशयः अङ्गाङ्गित्वाद्यवधारणार्थत्वेनानुष्ठानोपयोगित्वाच्छास्त्रार्थरूपकर्मभेद एव विचार्यो नानुपयोगी शास्त्रभेदो ऽनुष्ठानपर्यवसायित्वान्मीमांसाशास्त्रस्येति । किं च साध्यानुबन्धभेदयोः शास्त्रार्थभेदद्वारा वा शास्त्रभेदकत्वं तन्निरपेक्षं वेति विकल्पनीयं न तावदाद्यः पक्षः । शास्त्रभेदावधारणात्प्रागेव शास्त्रार्थभेदे ऽवधारिते नुष्ठानसिद्धेरनुनिष्पादिशास्त्रभेदावधारणानर्थक्यान्नैरपेक्ष्यं तु न सम्भवत्येव साध्यानुबन्धभेदयोः शास्त्रार्थेन भावनया नियोगेन वा सम्बन्धं विना शास्त्रेणासम्बन्धाद्भेदकत्वानुपपत्तेः । अस्तु वा ऽनुबन्धभेदेनाधिकारलक्षणसाध्यभेदेन च शास्त्रार्थभेदाध्यवसायात्तद्द्वारेण शास्त्रभेदः साध्यान्तराणां तु शास्त्रार्थाभेदकत्वात्कथं शास्त्रभेदकत्वमिति वाच्यम् । उत्पत्त्यादीनामशाब्दत्वेन शास्त्रार्थनियोगानवच्छेदकत्वात्तद्भेदकत्वानुपपत्तिः । तदेवं भाष्यकारेणैव शास्त्रभेदस्य लक्षणार्थत्वनिराकरणात्प्राभाकराणां प्रधानप्रधानानीति भाष्यस्य शास्त्रभेदलक्षणार्थप्रतिपादनपरतया व्याख्यानमतिमूढतामापादयतीति अलमनेन कर्मभेदस्य लक्षणार्थत्वे कथं प्रमाणलक्षणानन्तरसङ्गतिरित्याशङ्क्य भाष्यकृतोक्तम् । एष एवाध्याय सम्बन्ध इति तत्र तत्र

प्रस्मर्त्तव्यमित्यनेन च हेतुहेतुमद्भावलक्षणसम्बन्धप्रतिपादनेन भेदलक्षणस्य चावसरप्रतिपादनाल्लक्षणान्तरावसरनिरासपरतया इदं भाष्यं व्याचष्टे * न चान्यस्येति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * उपदेशे ज्ञात इत्यनुषङ्गः सर्वेषामुत्तरोत्तराध्यायानां पूर्वपूर्वापेक्षत्वं दर्शयितुं श्लोकानुक्तमपि प्रमाणलक्षणापेक्षत्वं दर्शयति *प्राक् तावदिति * तत्रापीत्यादिना ऽपेक्षतइत्यन्तेन श्लोकव्याख्यानं तत्रावृत्तिप्रसङ्गानामुपदेशातिदेशसाधारण्ये ऽपि भूम्नोत्तरषट्कस्यातिदेशविषयत्वाभिधानं लक्षणान्तरावसरनिराकरणपरत्वे कथं प्रस्तुताशङ्कानिराकरणमत आह * ततश्चेति * तदिहेत्यादिभाष्ये भेदस्य स्वतो वैलक्षण्याभावात् षड्विधत्वानुपपत्तिमाशङ्क्य व्याचष्टे * षड्विधइति * नामधेयक्रमस्त्वविवक्षित इत्याह * वक्ष्यमाणेति * शब्दान्तरादीनां भेदत्वाभावात्सामानाधिकरण्यानुपपत्तिमाशङ्क्य वैयधिकरण्येन व्याचष्टे * इतिकरण इति * शङ्काद्वयमप्यन्यथा परिहरति * अथ वेति * संज्ञायाः शब्दान्तरवदभिधानान्तरत्वेनाभिधेयान्तरोपस्थापकत्वात्संख्यायाश्च गुणत्वाविशेषाद्भेदोपादानमर्थकमाशङ्क्याह * संज्ञाशब्दान्तरयोरिति * धात्वन्तररूपं शब्दान्तरं भविनानुरञ्जकव्यापाररूपेण स्वार्थं वदत्स्वार्थानुरक्ताया भावनायाः धात्वर्थान्तरानुरक्तभावनातः स्पष्टं भेदं बोधयति संज्ञा तु न स्वेन भावनानुञ्जकव्यापाररूपेण धात्वर्थं वदति नाम्नां निष्पन्नरूपाभिधानस्वभावत्वान्नासौ धात्वर्थमात्रभेदे व्याप्रियते तद्भेदात्तु शब्दान्तरन्यायेन भावनाभेदसिद्धिः। गुणश्च गुणान्तरावरुद्धे कर्मण्यसम्भवात्स्वविशिष्टकर्मोत्पत्तिमाक्षिपन्नुत्पन्नस्योत्पत्त्यसम्भवात्कर्मान्तरेभ्यो भेदं बोधयति संख्या तु व्यासज्यवृत्तित्वेनैकनिष्ठत्वाभावात्संख्यान्तरावरुद्धेष्वपि कर्मसु उपजनापायेनोपपत्तेः स्वविशिष्टकर्मोत्पत्तिमाक्षेप्तुमशक्नुवन्ती प्रमाणान्तरेण कर्मोत्पत्तावबधारितायामनेकत्वमात्रं बोधयतीति स्वरूपानभिधायित्वात्सञ्ज्ञाशब्दान्तरात्पृथक् व्यासज्यसमवायाच्च संख्या भिन्ना गुणान्तरादित्यस्मिन्वार्त्तिके वक्ष्यतइति भिन्नान्यभिन्नानि चेत्येतावतैव हेतुमत्तया वर्त्तिष्यमाणकथनसिद्धेः षड्विधकथनानर्थक्यमाशङ्क्य वक्ष्यमाणमित्यादिभाष्येण सङ्क्षेपप्रदर्शनपूर्वकस्य विस्तरवचनव्याख्यातुः प्रतिपादनसौकर्यं श्रोतुश्च प्रतिपत्तिसौकर्यं प्रयोजनमुक्तं तदिष्टं विदुषां लोके समासव्यासधारणमिति न्यायेन स्पष्टत्वात् तदेतदित्येतदध्ययनादिसमाख्याबलेन शास्त्रभेदलक्षणार्थत्वनिराकरणपरतया ऽतिस्पष्टत्वान्न व्याख्यातम्। यद्योप-

३३७।१

क्रमोपसंहारपर्यालोचनया सर्वमेवैतन्निराकरणपरं व्याख्येयं हेतुहेतुमल्लक्षणो ह्यध्यायानां सम्बन्धः प्रसिद्धो न प्रासङ्गिको प्राधान्यापत्तेः। षड्विधत्वेन साध्यानुबन्धभेदाभ्यां द्वैविध्यमवान्तरविवक्षया त्रयोदशविधत्वं निराकृतं कर्मशब्देन शास्त्रविषयत्वं शब्दान्तरादिग्रहणेन साध्यादीनि । परोक्ताध्यायार्थनिरासेन स्वाभिमतार्थकथनस्य व्याख्यानतो ज्ञास्यमानत्वादानर्थक्यमाशङ्क्योत्तरभाष्यमिति ।न चोक्रमोपसंहारभाष्ययोः सत्यमन्यमर्थं पश्यामः । एतत्तात्पर्येणेति भाष्ये काका भेदमात्रतात्पर्याभिधानं बलाबलस्यापि वक्तव्यत्वादयुक्तमाशङ्क्य व्याचष्टे * सर्वदा चेति * न यत्रैकेन भेदो बोध्यते तत्रैवेतरेणेति भिन्नविषयत्वम्। उपोद्घातादिशब्दार्थं व्याचष्टे * तत्रेति * यत्प्रस्तुतादुपजायते तत्प्रसक्तानुप्रसक्तादीति योज्यम्। किं पुनरुपोद्घाताधिकरणमत आह * यथेति * अनुसरतीति कर्त्तरि घञं व्युत्पाद्य प्रकृतौ यो ऽनुनिष्पाद्यपूर्वको भेदानुसारी कर्मभेदः तत्सिद्ध्यर्थमिति योज्यम्। धात्वर्थस्य हि फलभावनाकरणत्वे तद्भेदानुनिष्पादी फलापूर्वभेदः।सिध्यति कारणभेदानुनिष्पादित्वात्कार्यभेदस्य नामार्थस्य तु करणत्वे तद्भेद एवापूर्वभेदापादकः स्यादित्याशयः प्रकृतानुनिष्पाद्यान्यथादरदर्शनान्नानुनिष्पादित्वमात्रेणापूर्वभेदस्यानादरणीयत्वम् । धर्मापेक्षाज्ञानार्थं चेह कर्मभेदस्य प्रतिपाद्यत्वात्फलसाधनत्वेन कर्मणां धर्मत्वात्तस्य चापूर्वद्वारत्वादनुनिष्पादिनो ऽप्यपूर्वभेदस्य विवक्षोपपत्तेः। प्रकृतकर्मभेदविशेषणत्वाविरोधः किं भावशब्देभ्यो ऽपूर्वं किं द्रव्यगुणशब्देभ्य इति सन्देहभाष्यम्।अपूर्वस्य शब्दवाच्यत्वाभावादयुक्तमाशङ्क्य फलपदसम्बन्धद्वारा भावशब्दानां द्रव्यगुणशब्दानां चापूर्वगमकताभिप्रेतेति भावः । अनेन च नामार्थस्य फलभावनाकरणत्वं धात्वर्थस्य वेत्याधिकरणार्थः सूचितः । करणभेदाभेदयोरपूर्वभेदाभेदहेतुत्वसूचनायानुगन्तव्यावित्युक्तं सर्वेषां फलपदसम्बन्धे कतरस्य सम्बन्धे इति चिन्तानुपपत्तेस्तत्सिद्ध्यर्थं प्रथमं तावदित्यादिभाष्येणैकस्य फलसम्बन्धः सर्वेषां चेति चिन्तान्तरं कुर्वतो ऽर्थस्याप्यस्य चिन्तान्तरस्य धर्मभेदाभेदफलत्वाल्लक्षणसङ्गतिरप्यस्तीति दर्शयितुं किं पदेन पदेन धर्म उच्यते उत सर्वैरेक इति । प्रथमं चिन्त्यतइत्युक्तम्। भेदस्य च पदार्थस्वरूपत्वात् प्रमाणलक्षणवद्भेदलक्षणस्यापि चोदनासूत्रप्रतिज्ञातधर्मस्वरूपव्युत्पादनार्थत्वात्तयैव प्रतिज्ञया सङ्गतिरिति सूचयितुम्* प्रथमे ऽध्यायइत्युक्तम् * नन्वेवं सति चोदनाशब्दस्य विधिप्रत्ययमात्रवाचित्वात्तत्पदेन पदेनेति चिन्ता न युक्तेत्याशङ्क्य * वाक्यमित्युक्तम् *

तदुपपादनार्थं विधेस्त्र्यंशभावनाविषयत्वं वक्तुम् * क्रियाया इ-त्युक्तम् * तच्चोदनासूत्रएव द्व्यध्याय्याश्चोदनासूत्रमित्यनेन प्रमाणलक्षणवद्भेदलक्षणस्यापि चोदनासूत्रपरिकरत्वाभिधानात्किमाद्यपेक्षितैः पूर्णः समर्थप्रत्ययो विधावित्यनेन वाक्यस्य चोदनात्वाभिधानात् स्पष्टमित्युपेक्ष्य वाक्ये चेति वाक्यंवाक्यार्थसावयवत्वाभिधानस्य प्रकृतोपयोगमाह * यदेति * भाष्यार्थमजानानः शङ्कते * अत्रापीति * वाक्यवाक्यार्थयोः सावयवत्वे ऽपि चोद्यं भवतीत्यर्थः। धर्मस्य वाक्यरूपचोदनागम्यत्वेन वाक्यार्थत्वात्प्रतिपदमित्याशङ्का न युक्ता वाक्यार्थस्य लक्ष्यमाणत्वाद्वाच्यत्वाभिधानं न युक्तमिति चोद्यार्थः। एतदेव व्याचष्टे * यदि हीति * किं वाक्यार्थस्य धर्मत्वमभिप्रेत्येयमाशङ्का भाष्येण धर्मस्य पदार्थता उक्तेत्यभिमानाद्वा तत्र पदार्थस्यैव श्रेयःसाधनत्वेन धर्मत्वान्न तावद्वाक्यार्थस्य धर्मता युक्तेत्याह * तदुच्यतइति * धर्मस्य वाक्यार्थत्वे ऽपि वाक्यार्थस्य धर्मत्वं नास्तीत्याशयः। न च भाष्येण धर्मस्य पदार्थतोक्तेत्याह * न चात्रेति* श्रेयःसाधनत्वस्य फलपदसमभिव्याहारलभ्यत्वाद्वाक्यार्थात्मत्वे सति वाक्यार्थत्वप्रसिद्ध्युपपादनायोक्ते पदार्थस्य धर्मत्वे सर्वपदानामेकवाच्याभावात्सर्वशब्दानर्थक्यमाशङ्क्येतरेत्युक्तम् । पदार्थान्तरानुपगृहीतस्यैकपदार्थस्यैव फलपदान्वयाधीना श्रेयःसाधनत्वावगतिरित्याशयः। अत्रैव भाष्यं योजयति *तथा चेति* नन्वेवमपि पदद्वयमात्राधीनत्वाद्धर्मत्वावगतेर्बहुविषयसर्वशब्दानर्थक्यं द्रव्यादेरपि फलवदुपकारित्वेन धर्मत्वात्तदभिधायिपदापेक्षत्वेन सर्वशब्दस्यार्थवत्त्वे सत्येकपदानर्थक्यं स्यादित्याशङ्क्याह *साक्षादिति* कान्यस्य साधनानीत्यादौ अङ्गस्य धर्मसाधनत्वाभिधानेन धर्मत्वानभ्युपगमान्न धर्मानेकत्वापत्तिरित्याशयः। यथा श्रुतं त्वसमञ्जसमेव स्यादित्याह *न त्विति* नन्वत्र किं पदेनेति भाष्यात्सर्वेषां धर्मत्वम् एकस्य वेति विचारः प्रतिभाति यदैकस्मादपूर्वम् इत्यस्माच्च सर्वेषां वा ऽपूर्वसाधनत्वमेकस्य वेति यआहुः किमपि भावयेदिति ते स्वर्गकामपदसम्बन्धात्स्वर्गं भावयेदिति ब्रूयुरिति मुख्योपोद्वाताधिकरणभाष्याच्च एकस्य फलसम्बन्धः सर्वेषां चेति तत्र किं प्राधान्येन विचार्यमित्याशङ्क्याह * यच्चेति * फलपदसम्बन्धावगम्यधर्मत्वकल्प्यत्वादपूर्वसाधनत्वस्य फलपदसम्बन्धएव मूलत्वात्प्राधान्येन विचार्य इत्यर्थः। किं तावदिति पूर्वपक्षप्रतिज्ञामुपपादयितुं व्याचष्टे * किं प्राप्तमिति * प्रतिज्ञासूचितामुपपत्तिं प्रश्नपूर्व-

३३८।१२

१ वाक्येति २ पु० ना० ।

कमाह * कुत इति * सर्वेषामगृह्यमाणविशेषतया ऐकरूप्यात्फल-पदसम्बन्ध इति हेतौ तृतीयामङ्गीकृत्य तावद्व्याचष्टे *यदि हीति* सर्वेषां फलपदसम्बन्धे सति ऐकरूप्येण सम्बन्धः सिद्ध्यतीति इत्थम्भावे तृतीयामङ्गीकृत्यान्यथा व्याचष्टे * यदि चेति * व्याख्याद्वय-समुच्चयार्थश्चशब्दः प्रधानेन चेत्युपपत्त्यन्तरं गुणसम्बन्धे ऽप्यर्थवत्त्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * सर्वश्चेति * ननु सर्वेषां फलपदसम्बन्धस्य प्रतिज्ञार्थत्वे धर्मग्रहणमसङ्गतं स्यादित्याशङ्क्य फलतः सङ्गतिं दर्शयन्नुत्तरार्द्धं व्याचष्टे * तस्मादिति * नन्वेवं सति धर्मभेदाभेदफलत्वाद्विचारस्य तस्मादेकमपूर्वमिति सिद्धान्तोपसंहारवत्पूर्वपक्षे भिन्नो धर्म इति वाच्यमित्याशङ्क्याह * तन्न त्विति * प्रत्येकं फलसाधनत्वे सति भेदेन श्रेयःसाधनत्वाद्धर्मभेदः सिद्ध्येन्न च सर्वेषामपि फलपदसम्बन्धे नियमेन प्रत्येकं फलसाधनतास्तीत्याशयः । पुरुषार्थैकसिद्धित्वात्तस्य तस्याधिकारः स्यादिति षष्ठाधिकरणन्यायेन यथा सत्रिणः प्रत्येकं कृत्स्नं फलं लभन्ते तथा नामधात्वर्था अपि किं प्रत्येकं फलं साधयन्त्यथ एकप्रयोजनाभिसम्बन्धात्पृथक्सतां ततः स्यादैककर्म्यमेकशब्दाभिसंयोगादित्येकादशाधिकरणन्यायेन यथा दर्शपूर्णमासौ संहत्य साधयतस्तथैते ऽपि संहत्य साधयन्तीति यथेष्टं कल्पनोपपत्तेः सर्वेषां फलसाधनत्वे ऽपि पृथक्फलसाधनत्वानियमाभावान्नैकान्ततो धर्मभेदः सिद्ध्येदित्यर्थः प्रत्येकमपि फलसाधनत्वे ऽग्निहोत्रे दध्यादिवददृष्टार्थत्वेनैकार्थत्वादन्योन्यानैरपेक्ष्याद्विकल्पे सत्यथ वा ऽग्निहोत्रदर्शपूर्णमासादिवदन्योन्यनैरपेक्ष्याभावात्समुच्चये सति नात्यन्तिको धर्मभेदः सिध्येन्न चाग्निहोत्रदर्शपूर्णमासादिवदेकान्तत एकशब्दोपादानमप्यस्तीति सूचयितुम् * तथेत्युक्तम् * आदिशब्दसूचितानवक्लृप्तिर्यथेष्टशब्देन स्वीकृता । ननु ऋद्धिकामाः सत्रमासीरन्नित्याख्यातोक्तस्य बहुकर्तृत्वस्य संहतानां कर्तृत्वाद् द्रव्यभेदे ऽपि कर्तृरूपैक्यादनुपपत्तेः प्रत्येकं कर्तृत्वावसायात्पुरुषार्थस्य फलस्यैकस्मात्कर्तुः सिद्धेः तस्य तस्य कर्तुः प्रत्येकमधिकारो युक्तः । श्येनेनाभिचरन्यजेत चित्रया यजेत पशुकाम इत्यादौ तु नामधात्वर्थानां फलभावनां प्रत्युपादेयत्वेन समुदाये वाक्यपरिसमाप्तेः संहत्यकारित्वावगमात्प्रत्येकसाधनशक्त्यवगमहेतोर्बहुवचनस्याभावात्कथं प्रत्येकं फलसाधनतेत्याशङ्क्याह * तत्रेति * नामधात्वर्थयोरस्मिन्पूर्वपक्षे ऽरुणैकहायन्यादिवद्विशेषणविशेष्यभावानभ्युपगमाद्दर्शपूर्णमासादिवच्चैकशब्दोपादानाभावात्साहित्यानवगतेरुपादेयत्वे ऽपि समुदाये वाक्यसमाप्त्ययोगात्

बहुवचनाभावे ऽपि नामार्थस्य तृतीयया व्रीह्यादिवन्निरपेक्षसाधनत्वावगमाद्धात्वर्थस्याप्यन्यसापेक्षस्य साधनत्वे सामर्थ्याभावात्समर्थः पदविधिरिति पदमात्रविधौ सामर्थ्याधीनत्वस्मृतेः प्रत्ययार्थान्वयानुपपत्तिप्रसङ्गान्नैरपेक्ष्यावगतेर्बहुवचनाभावे ऽपि पृथक्फलसाधनत्वावगतिः सम्भवतीत्यर्थः। समुच्चयस्तर्हि न सम्भवेदित्याशङ्क्य यथा सत्रिणां प्रत्येकं साधनत्वशक्त्यवगमे ऽपि समुच्चयस्तथा नामधात्वर्थानामपीत्येतावता दृष्टान्ताभिधानम्। नन्वत्र सत्रिवत् बहुवचनाभावात्कथं समुच्चयावगतिरित्याशङ्क्य * फलेत्युक्तम् * दृष्टार्थव्रीह्यादेः साहित्ये ऽपि फलानतिशयादगत्या विकल्पो ऽङ्गीकृतः। इह तु प्रत्येकं साधनत्वे ऽपि समुच्चयेन फलभूयस्त्वस्य सारतरत्वस्य वा कल्पयितुं शक्यत्वान्न विकल्पाङ्गीकरणं युक्तमिति भावः। नन्वेवं सति दर्शपूर्णमासवदेकशब्दोपादानाभावात्कथं संहत्य साधनत्वपक्षसम्भावनेत्याशङ्क्याह * अथ वेति * अन्योन्यनैरपेक्ष्यात्संहत्य साधनत्वायोगे ऽपि दर्शपूर्णमासवत्साधनानां साहित्यमेकशब्दोपादानाभावे ऽप्येकवाक्योपादानात्सम्भवतीत्यर्थः। समुदाये वाक्यसमाप्तिसम्भावनार्थो ऽरुणादिदृष्टान्तः। विकल्पपक्षमपि सम्भावयत्यथ वेति। दर्शपूर्णमासवदेकशब्दोपादानाभावेन शब्दसामर्थ्यादरुणादिवच्चान्योन्याकाङ्क्षाभावेन वस्तुसामर्थ्यादपि साहित्यानवगतेः। समुदाये प्रमाणाभावात्प्रत्येकं वाक्यसमाप्त्या विकल्पः प्रतिभातीत्यर्थः * इति प्राप्तइति* सिद्धान्तभाष्यं प्रति पदधर्म इति सर्वेषां फलसाधनत्वे पूर्वपक्षिते तत्प्रतियोगित्वेनैकस्य फलसाधनत्वे ऽभिधातव्ये ऽपूर्वसाधनत्वाभिधानादयुक्तमाशङ्क्योपपादयन् सिद्धान्तयति *अत्रेति* अदृष्टकल्पनागौरवापत्त्या सर्वेषां फलसाधनत्वं निराकर्त्तुमेवमुक्तमित्याशयः। सर्वेषां हि फलसाधनत्वे ऽभिहिते संहत्य पक्षे ऽपि उत्पत्त्यपूर्वभेदो ऽवश्याङ्गीकार्यः। विकल्पे ऽपि प्रत्येकमपूर्वकल्पना प्रसज्येतैव तत्र यद्येकस्य फलापूर्वसाधनत्वे नामार्थस्य धात्वर्थस्यानर्थक्यं स्यात्ततो ऽगत्या बह्वदृष्टकल्पनापादकमपि सर्वेषां फलापूर्वसाधनत्वं कल्प्येत। न त्वेतदस्ति धात्वर्थस्य साधनत्वे नामार्थस्य धात्वर्थनिष्पादकत्वेन तादर्थ्योपपत्तेः नामार्थस्य चासाधनत्वे निराश्रयस्य तस्य साधनत्वायोगेनाश्रयतया धात्वर्थस्य नामार्थोपकारित्वोपपत्तेः। ततश्चादृष्टानुमानस्य प्रसङ्गो यस्यां कल्पनायां साल्पीयसी भविष्यतीति भाष्यार्थो ऽनेन सूचितः। श्लोकं व्याचष्टे * यदि हीति * तस्मादित्युपसंहारभाष्यं फलसम्बन्धद्वारा ऽपूर्वसम्बन्धाभिधानात्पूर्वपक्षप्रतियोगित्वोपपत्तावप्युप-

क्रमानुरोधेनैकस्मादपूर्वमित्युपसंहर्त्तव्ये पूर्वैक्योपसंहारादयुक्तमाशङ्क्यैकस्मादित्यनेनैकस्य फलापूर्वसाधनतया उक्तस्य तस्माच्छब्देन परामर्शमभिप्रेत्यैकस्मात्फलसम्बन्धिनो ऽपूर्वमित्येवं व्याख्यां सूचयन् सिद्धान्तमुपसंहरति * तस्मादिति * भाष्यकृता तु सर्वेषां फलसम्बन्धे फलांशस्याविधेयत्वेन नामधात्वर्थविशिष्टफलभावनाविध्यनुपपत्तेर्नामधात्वर्थानामेकविशिष्टविधिप्रसूतार्थविधिविधेयत्वायोगाच्छ्रौतव्यापारनानात्वेन वाक्यभेदापत्तेरेकस्यैव फलोद्देशेन विधेयत्वादेकमेवापूर्वं प्रमाणवदिति सूचनायापूर्वैक्यमुक्तम् । एवं च सर्वेषां फलसाधनत्वपक्षे प्रत्येकं विकल्पेनैव फलसाधनत्वापत्तेर्धर्मभेदात् सिद्धान्ते चाभेदात्साक्षादप्यस्याश्चिन्ताया लक्षणसङ्गतिः सूचिता भवति । यस्त्वेकस्य फलवत्त्वे ऽन्यस्य तदुपकारित्वे वैरूप्याख्यो वाक्यभेदो ऽभिहितः तं परिहरति * न चेति * नामार्थस्य फलसम्बन्धे सोमेन यजेतेत्यादौ चैतत्परिहारायोगाद्भावार्थाधिकरणसिद्धान्तत्वाच्च पूर्वं नामधेयत्वस्य वक्तुमशक्तेरपरितोषात्स्वमतेनान्यथा परिहरति * अगत्या वेति * अदृष्टकल्पनातो लक्षणा ज्यायसीति सूचनायागत्येत्युक्तम् । इह नामार्थस्य फलसम्बन्धे यागवता श्येनेनेति मत्वर्थलक्षणाधात्वर्थपक्षे तु श्येनवता यागेनेति मत्वर्थलक्षणाप्यत्र नास्तीति प्रौढ्या परिहारान्तरमाह*अर्थाक्षिप्तेति *धात्वर्थस्य करणत्वे कर्तृव्यापारव्याप्यत्वात्करणस्य यो ऽर्थात्करणत्वेनाक्षिप्तः कर्तृव्यापारव्याप्यत्वरूपः साध्यांशस्तद्द्वारेण धात्वर्थैरात्मनो निष्पादकस्य नामार्थरूपकरणस्य ग्रहणसिद्धेः शब्दस्योपादेयत्वोद्देश्यत्वविधेयत्वानुवाद्यत्वगुणत्वप्रधानत्वरूपविरुद्धत्रिकद्वयपरत्वाभावान्न वैरूप्यलक्षणा विरोधो भविष्यतीत्यर्थः । नामार्थस्य करणत्वे निर्व्यापारस्य तस्य करणत्वायोगादात्मनः करणत्वसिद्धये ऽर्थाक्षिप्तो यः कस्य चिद्व्यापारस्य साध्यत्वाख्यः सामान्यरूपो ऽशस्तद्द्वारेण नामार्थैरात्मीयस्ववाक्योपात्तयागादिविशेषरूपसाध्यग्रहणसिद्धेरित्यूहेन योज्यम् ॥१॥ सर्वेषां फलसाधनत्वे कतरस्य साधनतेति विचारायोगात्तत्सिद्ध्यर्थमेकस्य साधनत्वे साधिते मुख्योपोद्घातोपक्रमार्थं यदेति भाष्यं तस्माच्छब्दपरामृष्टादेकस्मात्फलसम्बन्धिनो ऽपूर्वमित्येवं व्याचष्टे * एवमिति * अत्रापि भाष्यगतस्यैकशब्दस्य पूर्वोक्तमेव प्रयोजनद्वयमविशेषेणेति पूर्वपक्षभाष्यादनियमपक्षो ऽप्यत्राभिप्रेत इति शङ्का स्यात्तन्निवृत्तये निर्द्धारणार्थो डतरप्रत्ययः । ननु सर्वेषां फलसाधनत्वयोग्यतायामप्यनेकादृष्टकल्पनापरिहारायैकस्य साधनतोक्ता तस्य च पक्षद्वये ऽप्युपपत्तेरनियमो

ऽपि प्राप्नोतीत्याशङ्कामुपन्यासपूर्वकं निरस्यति * सर्वथेति * नन्व-नियमे विकल्पापत्तेस्तस्य च पूर्वाधिकरणपूर्वपक्षनिरासेन निरस्त-त्वान्नेहानियमाशङ्का युक्तेत्याशङ्कानिरासस्सूचनार्थः प्राप्तिशब्दः सर्वे-षां फलसाधनत्वं वाक्यं बोधयतीति पूर्वाधिकरणपूर्वपक्षार्थः। प्रयोगे तु विकल्पो योगसिद्ध्यधिकरणन्यायेन सिद्धः फलत्वेनोक्तः। इदानीं तु वाक्येनैवानियमः प्रतिपाद्यतइति शङ्कानिरसनीयेत्याशयः । वि-ध्यधीनत्वात्फलसाधनत्वस्य एकस्मिंश्च वाक्ये विधेयद्वयायोगेनैक-विशिष्टस्येतरस्य विधेयत्वात् धात्वर्थस्य फलसम्बन्धे श्येनवता यागे-नेति फलसम्बन्धिनो धात्वर्थस्य विशेष्यत्वरूपात्प्राधान्यात्फलसम्ब-न्धिनश्च नामार्थस्य विशेषणत्वरूपादङ्गत्वान्नामार्थस्य तु फलसम्बन्धे यागवता श्येनेनेति विपरीतविशेषणविशेष्यभावापत्तेरेकस्य चैकत्र वाक्ये वचनव्यक्तिभेदप्रसङ्गेन विशेषणविशेष्यत्वाख्याङ्गप्रधानत्वा-योगान्नानियमः शङ्कितुं युक्त इत्याशयः। श्लोकं व्याचष्टे *न हीति* ३४०।२ अतो निर्द्धारणार्थो डतरप्रत्ययो युक्त इत्युपसंहरति * तस्मादिति* कः पुनरिति भाष्येणाख्यातशब्दानां भावनावाचित्वव्युत्पादनार्थं प्रश्नद्वयं कृतं तद्भावप्रधानमाख्यातमिति स्मृत्याख्यातस्य भावनावा-चित्वप्रसिद्धेरयुक्तमाशङ्क्योपपादयति * कः पुनरिति * इह व्यु-त्पाद्यमानभावनावाचित्वबलेन भावनाक्षेपादेव कर्त्तृप्रतीतिसिद्धेरा-ख्यातस्य कर्त्तृवाचित्वं कर्त्रधिकरणे निषेत्स्यमानमपि असिद्धभावना-वाचित्वावस्थायामुच्यमानं न विरुद्धत्वेनाशङ्कनीयं विशेष्यत्वेन वा विशेषणत्वेन वा कर्त्तैवाख्यातेनोच्यते न तु कथं चिद्भावनेति सूच-यितुं कर्त्तुः प्रत्ययार्थत्वेनाप्राधान्याद्विशेष्यत्वे ऽभिहिते प्रत्ययार्थत्वो-पपादनार्थं लः कर्मणि चेति सूत्रे चकारेण कर्त्तरिकृदित्यतः कर्त्त-रीत्यनुकर्षणात्कर्त्तरि लकारोत्पत्तिरुक्ता । नन्वनेककारकानुरञ्जन-सहत्वेन भावनायाः प्राधान्यदर्शनात्प्रत्ययार्थत्वं न्याय्यं न कर्त्तुरि-त्याशङ्क्य फलभाक्त्वात्कर्त्तुः प्राधान्यं वक्तुम् * फलेत्युक्तम् * ननु प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतः तयोः प्रत्ययार्थः प्राधान्येनेति सामान्यस्मृतेर्भावप्रधानमाख्यातमिति विशेषस्मृत्या बाधाद्भावनाया एव प्राधान्यात्प्रत्ययार्थता युक्तेत्याशङ्क्य * कथं चिद्धेत्युक्तम् * धा-त्वर्थातिरिक्तायाः भावनायाः स्वरूपेणैव सिद्धायाः प्राधान्यप्रत्यया-र्थत्वयोर्दूरोत्सारितत्वाद्धात्वर्थः केवलः शुद्धो भाव इत्यभिधीयतइ-ति च भावशब्दस्य स्वतन्त्रधात्वर्थवाचित्वस्मृतेविशेषस्मृतिबलेन प्र-कृतिप्रत्ययार्थप्राधान्याविपर्ययमभ्युपगम्य कर्तृविशिष्टयागाद्यभिधानं युक्तं न तु भावनाप्राधान्यपरेयं स्मृतिरित्याशयः । ननु कः पुन-

भाव इति भावनाक्षेपेणैव तद्वाचिशब्दाक्षेपसिद्धेः के भावशब्दा इति पुनराक्षेपो अयुक्त इत्याशङ्क्याह * सत्यामपीति * यदि कश्चिद्भावोत्पन्नल्युडादिप्रत्ययान्तधातुवाच्यस्य भावत्वाभ्युपगमेनार्थपर्यनुयोगं परिहरेत्तं प्रति श्येनेन यजेतेत्यादिषु एतदधिकरणोदाहरणभूतेषु वाक्येषु तादृक्भावशब्दाभावादन्य एव भावो भावशब्दाश्चाभिमता इतिप्रत्युत्तरसूचनायोभयप्रश्न इत्यर्थः । अलौकिकशब्दो वैयाकरणाप्रसिद्धत्वाभिप्रायः । न केवलं भाव एवालौकिकः किं तु भावशब्दा अपीत्यपिशब्दार्थः यजतीत्युत्तरभाष्ये शब्दमात्रकथनादव्यापकमाशङ्क्य शब्दान्तरकथनेनार्थान्तरस्यापि सूचनाद्व्यापकत्वं दर्शयन् व्याचष्टे * सिद्धान्तेति * वैयाकरणाभिमतशुद्धधात्वर्थव्यतिरिक्तभावनारूपार्थवाचित्वोपपादनार्थं हेतुमति चेति णिचि कृते भावीतीकारान्तत्वादेराजित्यच्प्रत्यये सति णेरनिटीति णिलोपे भावशब्दव्युत्पत्तिनिरूपणेन कः पुनर्भाव इति प्रश्ने निरस्ते के भावशब्दा इति प्रश्ननिरासाय आख्यातस्य * चेत्युक्तम् * धात्वर्थातिरिक्तभावनाख्यभावाभ्युपगमेनोदाहृतानां तद्वाचित्वासम्भवाशङ्कार्थं नन्विति भाष्यं धातोर्यागादिधात्वर्थवाचित्वे ऽपि आख्यातस्य भावनावाचित्वोपपत्तेरयुक्तमाशङ्क्योपपादयति * परः पुनरिति * भावनाया णिजन्तभवतिधातुमात्रवाचित्वाच्छब्दान्तरवाच्यत्वायोगे ऽभिहिते ननु यजत्यादिधात्वन्तरवाच्यत्वाभावे ऽप्याख्यातवाच्यत्वं भविष्यतीत्याशङ्क्याख्यातस्य धात्वर्थवाचित्वादर्शनाद्भावयतेश्च सनाद्यन्ता धातव इति धातुसञ्ज्ञत्वेनाख्यातप्रकृतिभूतयजत्यादिधात्वर्थत्वाभावे ऽपि भावनाया धात्वन्तरार्थत्वान्नाख्यातवाच्यत्वं सम्भवतीति दर्शयितुं * न चेत्युक्तम् * नन्वेवमपि धातूनां भावनावाचित्वस्य सिद्धान्त्यनभिमतत्वात्तन्निषेधो न युक्त इत्याशङ्क्य * काममित्युक्तम् । धात्वर्थत्वेनाख्यातप्रत्ययार्थत्वे निषिद्धे यदि कश्चिद्याति वाति गच्छतीत्यादिधातूनां तुल्यार्थत्वदर्शनाद्यजत्यादिधातूनां भावयतिधातुवाच्यभावनावाचित्वं शङ्केत तन्निरासायेदमुक्तमित्याशयः *नैतदेवमिति* परिहारभाष्यं धात्वर्थाभिधानानर्थक्यमाशङ्क्य भावनानुरञ्जकत्वेन धात्वर्थाभिधानं दर्शयन् व्याचष्टे * अत्रेति * धात्वर्थस्यापि प्रत्ययार्थतानन्यथासिद्धप्रतीतिबलादवगम्यमाना न विरुद्धेत्याशयः । श्लोकं व्याचष्टे * यावानेव हीति * नन्वाख्यातप्रत्ययस्य भावनावाचित्वे ऽपि इह धात्वर्थस्य फलभावनाकरणत्वाभिधानार्थं धातोः फलपदसम्बन्धेनापूर्वगमकताया विवक्षितस्य भावनावाचित्वाभावेन भावशब्दत्वाभावात् किं भावशब्देभ्यो ऽपूर्वमि-

ति सिद्धान्तवचनव्यक्तिरयुक्ता प्रत्ययसम्बन्धानुग्रहात्तु भावनानुर-ञ्जकस्यार्थवाचितया भावशब्दत्वे द्रव्यगुणशब्दानामपि पूर्वपक्षे प्र-त्ययसम्बन्धस्य सर्वेषां भावार्थ इति चेदित्यत्र वक्ष्यमाणत्वा-द्भावशब्दत्वापत्तिरित्याशङ्कानिरासार्थं द्रव्यगुणशब्देभ्यो द्रव्य-गुणप्रत्ययो न तु तेभ्यो भावना प्रतीयते तदर्थस्य भा-वनानुरञ्जकत्वायोगादिति प्रत्ययशब्दस्य समासान्निष्कृष्य भा-वनाशब्देनान्वयं कर्मव्युत्पत्तिं चाङ्गीकृत्य भाष्यकृतोक्तम् । तत्र के द्रव्यगुणाः के वा तच्छब्दा इति प्रश्नपूर्वकं तत्स्वरूपमनु-क्त्वैव भावशब्दत्वशङ्कानिरासो न युक्त इत्याशङ्क्याह * तद्व्यति-रिक्तास्त्विति * आख्यातानां भावशब्दत्वे कथिते तद्व्यतिरिक्तानां द्रव्यगुणशब्दत्वज्ञानसिद्धेः प्रश्नपूर्वकमनभिधानमित्यर्थः । उपलक्ष-णार्थः पृष्ठशब्दः निपातोपसर्गाणामाख्यातव्यतिरेकेऽपि स्वतन्त्रा-र्थानभिधायित्वेनेहाविवक्षितत्वान्न द्रव्यगुणशब्दत्वापत्तिः । द्रव्य-गुणशब्दत्वेन च निष्पन्नार्थाभिधायित्वस्य विवक्षितत्वात्क्रियावाचि-नां नाम्नां द्रव्यगुणशब्दत्वापत्तावप्यदोषः । किं तावदिति पूर्वप-क्षभाष्यमव्यवस्थितशास्त्रार्थानुपपत्तेरनियमपक्षायोगादयुक्तमाशङ्क्य यदि भावशब्देभ्य एवाकाङ्क्षोत्पद्यते न द्रव्यगुणशब्देभ्य इति विशे-षः स्यात्ततो द्रव्यगुणशब्दानां नैराकाङ्क्ष्येणाकाङ्क्षानिबन्धनफलप-दसम्बन्धायोगान्नापूर्वंगमकत्वं स्यान्न त्वसावस्ति द्रव्यगुणशब्दे-भ्योऽपि करणविभक्त्यन्तेभ्यः साध्याद्याकाङ्क्षोत्पत्तेरविशेषादित्ये-व व्याख्यां सूचयन् पूर्वपक्षमाह * तत्रेति * यथैव भावशब्देभ्यो ३४१।१ भावार्थत्वात् भावनाकाङ्क्षोत्पत्तिस्तथैव द्रव्यगुणशब्देभ्योऽपि करणार्थत्वादित्यविशेषपदव्याख्यासूचनार्थं करणार्थत्वेन फलपद-सङ्गतौ योग्यत्वादित्युक्तम् । इतरथा निष्पन्नार्थाभिधायित्वेनैव यो-ग्यत्वसिद्धेः करणार्थत्वस्य च धातावपि तुल्यत्वात्करणार्थत्वश-ब्दोऽनर्थकः स्यादिति । नन्वविशेषे सति कथं द्रव्यादिशब्दानामेव फलपदसङ्गतिरित्याशङ्क्य निष्पन्नार्थाभिधायित्वलक्षणाभिधानमनेन च भाष्येणाकाङ्क्षोत्पादकत्वलक्षणविशेषसदसद्भावसन्देहएव ना-मार्थस्य फलभावनाकरणत्वं धात्वर्थस्य चेति सन्देहकारणमिति सू-चितं भवति । अत एव सर्वेषां भावोऽर्थ इति चेदित्यनेन सर्वेषां साकाङ्क्षत्वाविशेषमाशङ्क्य येषामुत्पत्ताविति सूत्रद्वयेन विशेषो वक्ष्यते । श्लोकं व्याचष्टे * सर्वत्र हीति * न साध्यान्तरमित्यनेन धात्वर्थस्य विधिसामर्थ्यात्करणत्वावगतेः साध्यापेक्षायामपि असि-द्धत्वेन तस्यापि साध्यत्वादसम्बन्धः समत्वात्स्यादिति न्यायान्न

साध्यान्वयो ऽस्तीति सूचितम्। उच्यतइति सिद्धान्तभाष्यं व्याचष्टे * इतीति * सूत्रशब्देन प्रतिपदाधिकरणसिद्धान्तस्योत्सूत्रत्वं सूचितम्। कीदृशेन सूत्रेण भाष्यकृतोत्तरं दीयतइत्यपेक्षिते सूत्रं योजयति * भावार्था इति * यच्छब्देन भावप्रधानमाख्यातमित्याख्यातशब्दानां भावनावाचित्वप्रसिद्धेस्तद्विषयो ऽयं निर्देश इति सूचितम्। फलस्येति भाष्यात् क्रियाशब्दस्य फलनिष्पादनाविषयत्वप्रतीतावपि भावशब्दानां फलनिष्पादनप्रत्यायकत्वाभिधानस्य यद्येकमपूर्वं तदा सन्देहः। किं भावशब्देभ्य इति सन्देहभाष्याद्भावशब्देभ्यो ऽपूर्वमिति सिद्धान्तवचनव्यक्त्यर्थत्वावगतेस्तद्धेतुत्वसूचनार्थमपूर्वक्रियागतिरित्युक्तम्। एष ह्यर्थो विधीयतइत्युक्ते को ऽसावित्यपेक्षायाम् * कुर्यादित्युक्तम् * आख्यातपदानां फलपदान्वये धात्वर्थस्य फलभावनाकरणत्वं सिद्धान्त्यभिमतं सिद्ध्यतीति प्रदर्शनार्थम् * यजिनेत्युक्तम् * (फलसाधनविधिमात्रेण भावशब्दानामपूर्वगमकत्वासिद्धेस्तैरित्यध्याहृतम् भावशब्दानामेव फलपदान्वयो न द्रव्यगुणशब्दानामित्याशयः।[1]) ननु भावशब्दानां फलसाधनविधायकत्वस्यापूर्वगमकत्वे कथं हेतुतेत्याशङ्क्याह * फलेति * ननु भावशब्दानामेव फलपदान्वयो न द्रव्यगुणशब्दानामित्येतदेव कथमवगम्यतइत्याशङ्क्याह * सम्बन्धश्चेति * द्रव्यगुणशब्देभ्यः करणार्थत्वेन क्रियामात्राकाङ्क्षोत्पत्तावपि कारकाणां क्रियान्वयनिरपेक्षान्योन्यान्वयायोगेन साध्यानाकाङ्क्षत्वात्तदभावे चेतिकर्त्तव्यतान्वयानुपपत्तेः भावशब्दवत् सर्वपदार्थान्वयः स्यादित्याकाङ्क्षा नोत्पद्यत इति सूचयितुम् * प्रसर्पन्तीत्युक्तम् * दृश्यतइत्यनेन प्रतीतिसाक्षिकतोक्ता अतो भावशब्दानां फलपदान्वयेन फलसाधनविधायकत्वादपूर्वगमकतेति सूत्रयोजनामुपसंहरति * तस्मादिति * क्रियाशब्दव्याख्यानार्थो भावनाशब्दः। न चात्र धात्वर्थस्य फलभावनाकरणत्वं तद्भेदानुनिष्पाद्यपूर्वभेदसिद्ध्यर्थं वाच्यम्। तच्च भावनावाचिनः प्रत्ययस्य फलपदान्वये ऽपि करणाकाङ्क्षायां सिद्धत्वेन योग्यत्वात्पदान्तरोपात्तस्यापि नामार्थस्यैव करणत्वापत्तेर्न सिद्ध्यतीत्याशङ्क्याह * तत्र चेति * योग्यत्वं नाम लिङ्गं तच्चैकपदोपादाननिमित्तप्रत्यासत्तिलक्षणया श्रुत्या बाध्यतइति भावः। स्वकारकनिष्पादितस्य धात्वर्थस्यापि योग्यतास्तीति सूचनार्थश्चकारः। सिद्धे च धात्वर्थस्य करणत्वे तदन्यथानुपपत्तिकल्प्यत्वेनापूर्वस्य तद्भेदानुनिष्पादी भेदः सिद्ध्यतीति सूचयन्नाह * अत इति * भाष्यं चा-

१ अयं पा० २ पु० ना०।

नेनैव व्याख्यातम्। भावशब्देभ्यः फलक्रियाप्रतीयतइति भावशब्दानां फलपदान्वये ऽभिहिते कुतो भावशब्दानामन्वय इति पृष्टे ऽशन्त्रयाकाङ्क्षभावनावाचित्वादेवेत्युक्त्वा यआहुरित्यनेन किमपीति भाव्याकाङ्क्षाप्रदर्शनपूर्वकमेतदेवोपपाद्यनन्वाख्यातस्य भावनावाचिनः फलपदान्वये ऽपि करणाकाङ्क्षायां नामार्थस्यापि करणत्वोपपत्तेः कथं धात्वर्थस्य करणत्वसिद्धिरित्याशङ्क्य ते चेत्यनेन धात्वर्थानुरक्तभावनावाचितया धात्वर्थसम्बद्धानां स्वर्गोत्पादनाभिधायित्वात्प्रत्यासत्तेर्धात्वर्थस्यैव करणत्वावगतिरिति कर्मशब्दा इति एतत्सूत्रावयवसूचिते ऽर्थे ऽभिहिते नन्वेकप्रत्ययोपादानश्रुत्या धात्वर्थनिरपेक्षायाः भावनाया विध्यन्वयात्स्वर्गादिपुरुषार्थफलत्वे ऽवगते करणाकाङ्क्षायामपि निष्पन्नत्वेनायोग्यत्वात्प्रत्यासन्नमपि धात्वर्थं भाव्यांशवत्करणांशादपि प्रच्याव्य नामार्थेनैवान्वयावगमात्कुतो धात्वर्थ सम्बन्ध इति पृष्ठा एष हीति सूत्रावयेन प्रकृतिप्रत्ययपौर्वापर्यनियमाच्छुद्धभावनानवगतेरनुष्ठानाशक्तेश्च धात्वर्थानुरक्ताया एव फलोद्देशेन विधीयमानत्वाद्विधिगम्यत्वाच्च करणत्वस्य केन भावयेत्स्वर्गमित्यपेक्षायां यागादिनेत्येवान्वयो युक्त इत्युत्तरे दत्ते धात्वर्थकरणत्वाभिधानफलं भावनाशब्दानामपूर्वगमकत्वं यस्य चेत्यादिनोक्तमिति अपूर्वभावनागम्यतइति भावनाशब्देन निष्पत्त्युत्पत्तिशब्दयोः प्रयोज्यव्यापारवाचिनोरपि प्रयोजकव्यापारलक्षणार्थत्वं सूचितम्। अन्यथानुपपत्तिशब्देन तेनापूर्वं कृत्वा नान्यथेति भाष्येणापूर्वस्यार्थापत्तिगम्यता पराभिमतलिङादिवाच्यत्वनिरासायोक्तेति सूचितं तथा च ननु कश्चिच्छब्दः साक्षादपूर्वस्य वाचको ऽस्तीत्युक्तं। लिङादिव्यतिरिक्तशब्दाभिप्रायत्वे तु कश्चिच्छब्दो ऽसमञ्जसः स्यात्। अपूर्वशब्दस्याप्यनुष्ठानात्पूर्वं न जायत इत्यवयवव्युत्पत्त्या प्रवृत्तेर्न वाचकतास्तीत्यविरोधः।

अतो लिङादिवाच्यत्वमपूर्वस्य वदन्तिये।
एतद्भाष्यविरोधस्तैः परिहर्त्तुं न शक्यते॥

एवं सूत्रयोजनापूर्वकं सङ्क्षेपेण भाष्यं व्याख्यायाख्यातस्य भावनावाचित्वमाक्षिपति * कथं पुनरिति * यद्यपि प्रत्ययवाचित्ववद्यज्यादिवाच्यत्वमप्याक्षेप्तुरनिष्टं तथापि प्रत्ययमात्रवाच्यत्वसिद्धान्तसूचनार्थं यागादिना स्वर्गकाम इति करणांशवाचित्वेन यज्यादीन्धातून्पृथक्कृत्य प्रत्ययमात्रवाच्यो भावनारूपो ऽर्थो यो ऽभ्युपगम्यते * स कथं लभ्यतइति * अनुवादपूर्वकमाक्षेपः कृतः। एवकारेण धातुवाच्यत्व-

निरासासिद्धावपि धातुप्रत्ययसमुदायवाच्यत्वनिरासार्थः केवलश-ब्दः। ये तु भावनारूपो ऽर्थो ऽङ्गीक्रियमाणो धातोः स्वार्थाभिधानोप-क्षीणशक्तित्वात्प्रत्ययवाच्यो ङ्गीकार्यः । स च न सम्भवतीति भा-वनासद्भावाक्षेपार्थत्वेनेमं ग्रन्थं व्याचक्षते तेषामभिदध्युः *स्वशक्त्या हीति* वाच्यत्वाक्षेपोपपादनार्थः सिद्धकर्तृक्रियावाचिनीत्यादिस्त-स्मात्प्रत्ययार्थ एव भावनेत्युपपन्नमित्यन्तश्च वाच्यत्वसमर्थनार्थः । सर्वो ऽयं ग्रन्थो ऽन्यपरत्वापत्तेरसमञ्जस एव स्यात् । न चाख्यातवा-च्यत्वासम्भवमात्रेण वस्त्वभावो भवति घटादिवन्नामवाच्यत्वोपपत्तेः। उत्पादनमेव च प्रयत्नानुष्ठानाद्यपरपर्यायं भावनाशब्देनाभिप्रेतम् । तच्च सर्वलोकप्रसिद्धत्वान्नापह्नोतुं शक्यम्। धात्वर्थमात्रातिरेके तु वि-प्रतिपत्तिः तत्र चानतिरेके ऽपि धातुना धात्वर्थस्वरूपमभिधाय त-स्यैवान्योत्पादानुकूलत्वरूपभावनाप्रत्ययेनोच्यतइति वक्तुं शक्यत्वा-न्न धात्वर्थातिरेकाक्षेपार्थत्वं वाच्यत्वाक्षेपस्य युक्तम् । भावनायां तु धात्वर्थस्य करणत्वसिद्ध्यर्थम्। ननु च यदि प्रयोजकव्यापारो भावने-ष्यते इत्यादिना शङ्कापूर्वकं धात्वर्थातिरेको वक्ष्यते अत एव प्रत्य-यार्थस्य भावस्य वाच्यता तत्र चिन्तितेत्याकृत्यधिकरणे ऽभिहितम्। वाच्यत्वाक्षेपं प्रश्नपूर्वकमुपपादयति*कुत इति* आख्यातप्रत्ययमात्र-स्य भावनावाचित्वाक्षेपे ऽप्युदाहरणभूतविधिवाक्यगताख्याताभि-प्रायेण * विधिमात्रमित्युक्तम् * कर्तृसंख्योपग्रहविशेषाभि-धाने ऽपि भावनाभिधाननिरासार्थो मात्रशब्दः । धातुप्रत्ययांशद्व-ययोगिन्याख्याते धात्वंशस्य करणांशवाचित्वाभ्युपगमात्प्रत्ययस्यापि भावनावाचित्वासम्भवे ऽनभिधेयताक्षेप्तुरभिमता सिद्ध्यतीति सू-चयितुम् * केनेत्युक्तम् * नन्वाख्यातप्रत्ययस्यानेकार्थत्वाद्विध्यभि-धायित्वे ऽप्यविरुद्धं भावनाभिधायित्वमित्याशङ्क्य * स्वशक्त्येत्यु-क्तम् * स्वप्रत्ययार्थमात्रे प्रत्ययस्य शक्तेर्भावयतिधातुवाच्यभाव-नाभिधायित्वं न सम्भवतीत्याशयः । नन्वेवमपि धात्वंशेनाभिधा-नोपपत्तेः केनांशेनेत्यनभिधेयत्वाभिधानमयुक्तमित्याशङ्क्याह * न चेति * यज्यादिधातूनामण्यन्तधात्वर्थाभिधानव्यापृतत्वात् ण्य-न्तभावयतिधात्वर्थाभिधायिता न युक्तेत्यर्थः । नन्वाख्यातश्रवणा-नन्तरं भावनाप्रतीत्यन्यथानुपपत्त्या तत्रापिशक्तिः कल्पनीयेत्याश-ङ्क्याह *अत इति * नास्माभिः प्रतीयमानाया अपि भावनाया युक्त्या वाच्यत्वं निरस्यते किं त्वप्रतीयमानत्वादेव स्वपक्षानुरागेण त्वप्रतीयमानायामपि प्रतीत्यारोपवादिनं प्रति युक्त्युपन्यास इत्याश-यः । यतो लिङादयो धातवो वा न भावनां प्रतिपादयन्ति न भा-

वनाप्रतिपत्तिं जनयन्ति न तेभ्यो भावनाप्रतिपत्तिर्जायते अतः श-
ब्दजनितप्रतीतिरहितमेवेदमारोप्यत इत्यर्थः । ननु लिङादीनां धा-
त्वन्तरार्थवाचित्वायोगे ऽपि करोतिभावयतिभ्यां विवरणदर्शनात्त-
त्पर्यायत्वावगतेस्तदर्थवाचिता युक्तेत्याशङ्क्याह * किं चेति * पि-
कादिशब्दान्तरस्य यो ऽर्थः कोकिलादिपर्यायैर्व्याख्यायते तस्मिन्नर्थे
न स पर्यायस्तेन शब्दान्तरेण सह प्रयुज्यते किं तु केवलस्ततश्च प-
र्यायत्वस्य सहाप्रयोज्यत्वेन व्याप्तेराख्याते करोतिभावयतिभ्यां स-
हाप्रयोज्यत्वव्यावृत्त्या तत्पर्यायत्वव्यावृत्तिरित्याशयः । श्लोकं व्या-
चष्टे * तद्यथेति * ननु करोतिभावयतिमात्रेणाख्यातार्थकथन-
सिद्धावपि केवलधातुप्रयोगायोगात्तदनुग्रहार्थं प्रत्ययः प्रयुज्यमानो
न दोषमावहतीत्याशङ्क्याह * न हीति * प्रत्ययसहितकरोतिभा- ३४२।२
वयतिप्रयोगे सति या करोतिना भावयतिना वा यजत्यादिपदप्रत्या-
य्या क्रिया व्याख्यायते सा यथा धात्वर्थस्य यागेनेति पृथगुपादाना-
त्तद्वाच्या न सम्भवति तथा पर्याययोः सह प्रयोगायोगेनाख्यातवा-
च्यत्वस्याप्यसम्भवो वा विशेषाद्व्याख्यान्यथानुपपत्त्या चैकेनांशेन
वाच्येत्यवगतावपि किं यजत्यादिधात्वंशेन प्रत्याय्याख्यातांशेन वेति
विवेकज्ञानान्नार्थकथनं सिद्ध्येदिति भावः । नन्वेवं सति प्रत्ययो
न प्रयुज्यतामित्याशङ्क्याह * अत्र त्विति * केवलधातुप्रयोगाद-
वश्यं प्रत्ययः प्रयोज्य इति भावः । करोतिभावयतिपरप्रत्ययप्रयोगे
च सति तेनैव यजिपरप्रत्ययार्थोपादानात्करोतिभावयत्योस्तदर्थकथ-
नार्थत्वानुपपत्तेरानर्थक्यं स्यादित्याह * अतश्चेति * अधिकस्या-
वापः प्रक्षेपो ऽस्यास्तीति बहुव्रीह्यर्थः । नन्वधिकावापो ऽपि विश्व-
जिदादिवाक्ये स्वर्गकामादिपदावापवन्न दोषमावहतीत्याशङ्कानिरा-
सं सूचयन्नुपसंहरति * तस्मादिति * आनर्थक्येन वेदाननुमत-
त्वान्नास्य तत्तुल्यतेत्याशयः । आख्यातस्य भावनावाचित्वमाक्षिप्तं
समाधातुं करोत्यर्थवाचित्वं तावदुपपादयति * अत्रेति * किं करोति
पचतीति करोतिसामानाधिकरण्येनाख्यातप्रत्यये करोत्यर्थो वाच्यो
ऽवगम्यत इत्युक्ते भवत्यादिपराख्यातप्रत्यये करोत्यर्थसामानाधिक-
रण्याभावात्करोत्यर्थवाचित्वं न सिद्ध्यतीत्याशङ्क्य * सिद्धेत्यु-
क्तम् * आक्षेपवाद्यसिद्धमपि आख्यातप्रत्ययस्य क्रियावाचित्वं स्व-
सिद्धान्तसिद्धमङ्गीकृत्य नाख्यातमात्रस्य करोत्यर्थवाचित्वं ब्रूमः किं
तु करोतिसामानाधिकरण्यवतामेवाख्यातानामिति ख्यापनाय सिद्ध-
कर्तृक्रियावाचित्वमुपलक्षणं कृतम् । यद्वा ये धात्वर्थस्य स्वरूपेण धा-
तुनाभिहितस्यापि निष्पाद्यत्वलक्षणक्रियारूपेण प्रमाप्रत्ययवाच्यत्व-

मङ्गीकृत्य मीमांसकाभिमतधात्वर्थातिरिक्तभाव्यनिष्ठभावनावाचित्वं प्रत्ययस्य नेच्छन्ति तान्प्रति भावनावाचित्वं साधयितुं करोत्यर्थवाचितानेन साध्यतइत्यदोषः । नन्वसिद्धकर्तृविषयेष्वस्त्यादिपरेष्वाख्यातेषु करोतिसामानाधिकरण्याभावेन करोत्यर्थक्रियावाचित्वाभावात्तद्व्यावृत्त्यर्थं सिद्धविशेषणं व्यर्थमित्याशङ्क्य भाव्यनिष्ठभावनारूपकरोतिवाच्यक्रियावाचित्वाभावे ऽपि कर्त्रात्मलाभाख्यक्रियावाचित्वसद्भावाद्विशेषणसाफल्यं दर्शयितुं सिद्धासिद्धकर्तृक्रियावाचीन्याख्यातानि विविनक्ति *इहेति* भवतेर्जन्माख्याद्यभावविकारवाचित्वात्ततः परा तिङ्विभक्तिर्जायमानस्य कर्तुर्जन्मोत्पत्त्याद्यपरपर्यायात्मलाभमात्ररूपं व्यापारं प्रतिपादयन्ति । अस्तिविद्यत्योस्तु द्वितीयभावविकारवाचित्वात्ततः परां सत्तां प्रतिपद्यमानस्य कर्तुः स्वसत्ताख्यात्मलाभमात्ररूपमित्यर्थः । अन्यात्मलाभविषयस्यैव व्यापारस्य करोत्यर्थत्वात्तस्य चास्त्यादिपरया विभक्त्यानभिधानात्करोत्यर्थक्रियावाचित्वाभावे ऽप्यात्मलाभस्यानिष्पन्नरूपत्वेन व्यापारशब्दवाच्यत्वाद्व्यापारस्य क्रियात्वप्रसिद्धेर्व्यापाराख्यक्रियावाचित्वस्य सर्वाख्यातेषु भावादर्थवद्विशेषणमित्यर्थः । ननु द्रव्यव्यतिरेकेण व्यापारस्यानुपलब्धेरभावान्न वाच्यत्वं सम्भवतीत्याशङ्क्याह * द्रव्यमेव चेति * जातिगुणवत्क्रियाया अपि द्रव्यादत्यन्तव्यतिरेकाभावान्न व्यतिरेकानुपलम्भमात्रेणाभावो भवतीति सूचयितुम् * द्रव्यमेवेत्युक्तम् * ननु द्रव्यस्य व्यापारशब्दवाच्यत्वे सर्वदा घटो भवति देवदत्तः पचतीति प्रयोगः स्यादित्याशङ्क्य प्रचलितमपगतमात्मनस्तत्त्वमौदासीन्यस्वरूपं यस्येति द्रव्यगतस्यावस्थाविशेषस्य व्यापारशब्दवाच्यत्वं सूचितम् । नन्वेवं सति यौवनाद्यवस्थाविशेषस्यापि व्यापारत्वं स्यादित्याशङ्क्य विप्रकीर्णो विक्षिप्तो ऽनेकत्र व्यासक्तत्वादेकत्रानुपसंहृतः स्व आत्मीयो भावो धर्मो यस्येति अवस्थान्तरव्यावृत्त्यर्थं व्यापारावस्थाया विप्रकीर्णत्वं विशेषणम् । नन्वेवं सत्यवयविरूपस्याप्यनेकावयवव्यासक्तत्वेनैकत्रानुपसंहृतत्वाद्व्यापरत्वं स्यादित्याशङ्क्य तद्व्यावृत्त्यर्थं क्रियावयवानां क्षणिकत्वेनानेकक्षणव्यासक्तत्वाभावे ऽपि ।

> यदा त्वाद्यपरिस्पन्दात्प्रभृत्या फललाभतः ।
> क्रिया पूर्वापरीभूता लक्ष्यते वर्त्तते तदा ॥

अनेकफलसाधनानेकक्रियावयवसमूहस्यैव क्रियात्वाभिधानात्तस्याः पूर्वापरानेकक्षणव्यासक्तत्वरूपं पूर्वापरीभूतत्वं विशेषणम् । अवयविनस्त्वनेकावयवव्यासक्तत्वे ऽपि युगपद् बुद्धे-

नानेकक्षणव्यासक्तताऽस्तीति भावः । नन्वेवं सत्यनेकक्षण-वर्त्तित्वेन क्रियाया द्रव्यतुल्यत्वात्कथं द्रव्याद्भेदाध्यवसाय इत्याशङ्क्य पूर्वौदासीन्यावस्थातः प्रच्युतं परमौदासीन्यावस्थामप्राप्तमिति पूर्वापरावस्थयोरनुवृत्त्या द्रव्याद्व्यावृत्तरूपाभिधानेन भेदो दर्शितः । नन्वस्तु नाम द्रव्यस्यैवंविधावस्थाविशेषस्तस्य तु व्यापार-शब्दवाच्यत्वे किं निमित्तमित्याशङ्क्य फलोत्पादानुकूलत्वस्य निमित्तत्वसूचनार्थम् * विशिष्टेत्युक्तम् * यद्वा ननु घटो भवतीत्यादौ घटस्य वा कर्तृत्वं विवक्षितं मृत्पिण्डस्य वा । तच्च घटस्यासिद्धसत्ताकत्वेन व्यापाराश्रयत्वायोगान्मृत्पिण्डस्य च सिद्धत्वेन कर्त्रात्मला-भाख्यव्यापाराश्रयत्वायोगान्नोभयथापि सम्भवतीत्याशङ्क्येदमुक्तम् । घटोत्पत्तेः प्रागपि घटविषयायाः मृत्पिण्डाश्रितायाः शक्तेः कार्यकारणनियमान्यथानुपपत्तिकल्पितायाः सद्भावात्स्वरूपेण चाविद्यमानस्यापि शक्तिसद्भावमात्रेणातीतानागतज्ञानादौ कारकत्वदर्शनात्कर्तृत्वोपपत्तेः।समवायिकारणाच्च कार्यस्यात्यन्तभेदाभावान्मृत्पिण्डात्मना व्यापाराश्रयत्वोपपत्तेर्घटात्मना चासिद्धत्वोपपत्तेरुभयथाप्यविरोध इत्याशयः । नन्वस्य सिद्धासिद्धकर्त्राश्रितत्वे तस्यैव करोत्यर्थत्वादस्त्यादावपि करोतिसामानाधिकरण्यापत्तिः सिद्धकर्तृमात्राश्रितत्वे त्वस्त्यादिपराया विभक्तेर्व्यापारप्रतिपादकत्वाभिधानं न युज्येतेत्याशङ्क्यासिद्धकर्त्राश्रितस्य व्यापारस्य करोत्यर्थत्वाभावं दर्शयितुमाश्रयं तावद्विविनक्ति *तत्रेति* अन्योत्पादानुकूलस्यैव व्यापारस्य करोत्यर्थं वक्तुमेवकारः । अन्यात्मलाभफलकस्य हि व्यापारस्य कर्त्ता करोतीति व्यपदिश्यते अस्त्या पराख्यातप्रयोगे च कर्त्तुरेवात्मलाभाख्यव्यापारावस्थात्वप्रतीतेरन्यात्मलाभफलकव्यापारायोगान्न करोतिव्यपदेशता युक्तेत्याशयः । एवंशब्दात्प्रकृतव्यापारमात्रपरामर्शावगमे ऽपि सिद्धे कर्त्तर्यन्यस्यैवमवस्थात्वाभिधानेन तस्यासिद्धकर्त्तृविषयत्वावसायात्तस्य चात्मलाभातिरिक्तव्यापाराभावात्तत्परत्वव्याख्यानमसिद्धे कर्त्तरि तस्यैव व्यापारत्वं प्रतीयते सिद्धे त्वन्यो ऽपीत्यपिशब्दाध्याहारेण व्याख्याने व्यापारमात्रपरामर्शे ऽप्यदोषः । अन्यस्यात्मलाभाख्यं व्यापारं प्रति कर्तृत्वे ऽपि सिद्धकर्त्तृत्वस्य करोतिप्रयोगविषयत्वात्तत्र चासिद्धस्य कर्तृत्वाप्रतीतेः कर्त्तुरन्यत्वमविरुद्धं ततश्चासिद्धे कर्त्तर्यन्यात्मलाभफलाभावेन तद्व्यापारस्य करोत्यर्थत्वायोगात् सिद्धकर्त्तुर्व्यापारस्य त्वन्यात्मलाभफलत्वात्करोत्यर्थत्वोपपत्तेर्व्यवस्था युक्तेत्याह * तदिति * तस्मादित्यर्थे तदित्यव्ययम् । सिद्धकर्त्राश्रितस्यैव व्यापारस्य करोतिवाच्यत्वं ना-

सिद्धकर्त्राश्रितस्येत्येतदेव करोतिसामानाधिकरण्यव्यवस्थयोपपाद-
यति * तथा चेति * नन्वाख्यातकरोत्योर्द्वयोरप्याकृत्यधिकरण-
न्यायेन सामान्यवाचित्वात्पर्यायत्वापत्तेः सामानाधिकरण्यं न यु-
क्तमित्याशङ्क्य * सामान्येत्युक्तम् * सामान्यवाचिनो ऽप्याख्यात-
स्य प्रकृत्यर्थोपधानेन विशेषपरत्वात्को राजा यातीति शुद्धसामान्य-
वाचिनो राजशब्दस्येव पाञ्चालराजशब्देन पाञ्चालविशेषोपहितराज-
सामान्यवाचिना सामानाधिकरण्यं युक्तमित्याशयः। यथाहुः मण्ड-
नमिश्राः भेदोपहितसामान्यवचने ऽप्यपृथक् श्रुतिरिति । श्लोकार्थ-
मुपसंहरति * तस्मादिति * ननु लब्धात्मककर्तृव्यापारवाचिना-
माख्यातानां करोतिसामानाधिकरण्यात्करोत्यर्थत्वे ऽपि भावयत्य-
र्थभावनावाचित्वं कथमित्याशङ्क्य भावनावाचित्वोपपादनार्थं क-
रोतिभावयत्योस्तुल्यार्थत्वमुपपादयितुं भावयतिवत् करोतेरपि भव-
त्यर्थककर्तृकर्मनिष्ठत्वं दर्शयन्कर्मनिष्ठतामेव तावदाह*तत्र चेति* उ-
पसर्जनत्वेनाप्यनन्तरनिर्दिष्टस्य करोत्यर्थस्य योग्यतया तत्शब्देन परा-
३४३।१ मर्शात्तत्र करोत्यर्थ इत्यर्थः । एतदेव प्रश्नपूर्वकमुपपादयति * कुत
इति*ननु कर्मनिष्ठत्वे ऽपि ग्रामं गच्छतीतिवद्भवत्यर्थकर्मकर्तृनिष्ठत्वा-
भावात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्य करोत्यर्थं प्रति भवत्य-
र्थकर्तुरेव कर्मतेत्याह * भवत्यर्थस्येति * करोतेरर्थस्येत्यर्थव्य-
तिरेकजनिता षष्ठी यजतिस्त्वित्यादिवद्धात्वर्थपरो वायं धातुनिर्देशः
श्लोकपूर्वार्द्धं व्याचष्टे * करोतेरिति * उत्तरार्द्धं व्याख्यातुं क-
र्मणः प्रधानक्रियातिरिक्तावान्तरक्रियाकर्तृत्वापेक्षां तावदाह * स-
र्वेति * नन्ववान्तरक्रियापेक्षायामपि भवनक्रियापेक्षायाः प्रधान-
क्रियान्तरेष्वदर्शनात्कथमत्र तदपेक्षेत्याशङ्क्याह * प्रतिक्रियं चेति*
अन्वयव्यतिरेकौ दर्शयति * तथा हीति * व्यतिरेकाभिधानसू-
चितान्वयदर्शनपूर्वकं श्लोकं व्याचष्टे * य एवेति * स्वयं विशीर्णे
बीजे अङ्कुरस्य प्रवृत्त्योत्पत्त्याख्यभवनस्य जलावसेकारोपणादिनोत्पा-
दनाख्यप्रयुक्तिदर्शनात्प्रवृत्तभवनः प्रयुज्यतइत्युक्ते ननु प्रवृत्त्यर्थत्वात्प्र-
युक्तेः प्रवृत्तस्यानर्थक्यापत्तेः प्रयुक्तिरयुक्तेत्याशङ्क्य * सम्भावित-
भवनो वेत्युक्तम् * मृदादाविव घटादिसर्वः सम्भावितभवन एव
प्रयुज्यते स्वयं विशीर्णबीजाङ्कुरस्यापि वृक्षादिरूपेणाप्रवृत्तोत्पत्तेरेव
जलावसेकादिनोत्पादनादित्याशयः । ननु सिद्धस्यापि पाकादेः
करोत्यर्थकर्मत्वदर्शनाद्व्यतिरेको व्यभिचरतीत्याशङ्क्याह * यत्रापी-
ति * ननूत्पूर्वस्य करोतेरुपकारप्रयुक्तहिंसात्मकसूचनाख्ये गन्धने
अपपूर्वस्य च भर्त्सनाख्ये ऽवक्षेपणे प्रपूर्वस्य चानुवृत्त्याख्यसेवने प्रक-

षेकथनाख्यप्रकथने धर्माद्यर्थविनियोगाख्योपयोगे उपपूर्वस्य साहसिककर्माख्यसाहसिक्ये उपपूर्वस्य सतो गुणान्तराधानाख्ये प्रतियत्ने प्रयोगाद् गन्धनावक्षेपणसेवनसाहसिक्यप्रतियत्नप्रकथनोपयोगेषु कृञ इतिस्मृतेश्चानेकार्थत्वेनोत्पादनार्थत्वनियमाभावात्कथमुत्पत्त्याख्यभवनकर्तृकर्मनिष्ठत्वनियम इत्याशङ्क्याह * सत्यपि चेति * नियमाभावे ऽपि वा यदोत्पादनार्थत्वं तदोत्पाद्यमानकर्मनिष्ठत्वं भविष्यतीत्याह * अथ वेति * करोत्यर्थकर्मणो भवनक्रियापेक्षामुपपादितामुपसंहरति * तेनेति * लब्धायां च भवनक्रियायां तत्कर्तृकर्मनिष्ठत्वं करोत्यर्थस्य सिद्धं भवतीति तावच्छब्देन सूचितम्। नन्वेवं करोतेर्भावयतिवद्भवत्यर्थकर्तृकर्मनिष्ठत्वे ऽपि णिजन्तत्वाभावेन प्रयोजकव्यापारवाचित्वायोगात्कथं भावयतिना तुल्यार्थतेत्याशङ्क्याह * ततश्चेति * करोत्यर्थस्य भावयत्यर्थत्वोपपादनाय प्रयोजकव्यापारत्वप्रतिपादनार्थं तत्कर्तुः प्रयोजकत्वाभिधानं प्रयोज्यं विना प्रयोजकत्वायोगात्तत्सिद्ध्यर्थं प्रयोजत्वाभिधानम्। ननु णिच्प्रत्ययरहितस्य धातोः प्रयोजकव्यापारवाचित्वे करोतिवद्भवतेरपि तद्वाचित्वापत्तेर्भावयतीति णिच्प्रत्ययो ऽनर्थकः स्यात्प्रयोज्यव्यापारवाचित्वे वा भवतिवत्करोतेरपि तद्वाचित्वापत्तेः प्रयोजकव्यापारवाचित्वं न स्यादित्याशङ्क्याह * भवतीति * णिच्प्रत्ययरहितत्वाविशेषे ऽपि यथा विक्लिदेः प्रयोज्यतण्डुलव्यापारवाचित्वं पचतेस्तु प्रयोजकदेवदत्तव्यापारवाचित्वं वृद्धव्यवहारान्नियतं तथा तयोरपीत्यर्थः। ननु प्रयोज्यप्रयोजकव्यापारयोः परस्परापेक्षत्वात्कथमनयोः प्रयोज्यप्रयोजकव्यापारमात्रवाचितेत्याशङ्क्याह * तत्र चेति * प्रयोज्यव्यापारानपेक्षप्रयोजकव्यापारयोगादेवकारोक्तातन्मात्रे विवक्षा न युक्तेत्याशङ्क्य प्रयोज्यव्यापारस्यान्यतो ऽवगतिसिद्धेः पारिशेष्यात्प्रयोजकव्यापारमात्रविवक्षोपपन्नेति केवलमित्यनेन तु पारिशेष्यवाचिना क्रियाविशेषणेनोक्ते कथं प्रयोज्यव्यापारस्याभिधानं विनावगतिरित्यपेक्षायां घटमिति द्वितीययाभिहितया कर्माख्यया शक्त्याक्षिप्तः प्रयोज्यस्य घटस्य भवनाख्यो व्यापारो यस्मिन्नित्युक्तम्। कथं वा कर्मणः प्रयोज्यव्यापाराक्षेप इत्याशङ्क्य *कर्मणः शक्त्येत्युक्तम् * निर्व्यापारस्य कर्मत्वायोगात्तद्बलेनाक्षेप इति भावः। करोतिमात्रप्रयोगे कथमाक्षेप इत्याशङ्क्य * स्वयमाक्षिप्तप्रयोज्यव्यापारेत्युक्तम् * घटो भवतीत्यत्र प्रथमाया अप्यभिहितकारकविभक्तित्वाभ्युपगमात्प्रथमाभिहितकर्तृशक्त्याक्षिप्तः प्रयोजकव्यापारो यस्मिन्स्वयं वाक्षिप्तः प्रयोजकव्यापारो येनेति बहुव्रीहि- ३४४।१

विग्रहेण व्याख्येयम्। पचतिविक्लिद्यतीतिदृष्टान्तार्थौ उभयोस्तु व्यापारयोर्भिन्नपदोपात्तयोः समुच्चयेन विवक्षायां करोतिभवत्योः समुच्चित्य प्रयोग इत्याह * कदा चिदिति * ननु करोतेः प्रयोजकव्यापारवाचित्वे तदाक्षिप्तस्यापि भावनाख्यस्य प्रयोज्यस्य व्यापारस्याशब्दत्वेन प्राधान्यानुपपत्तेः क्रियते घट इति प्रयोज्यवाचिना घटशब्देन सामानाधिकरण्यं न स्यादित्याशङ्क्याह * कदा चिदिति * तिङा घटस्य कर्मत्वोक्तेः कर्मणश्च वस्तुतः प्राधान्यात् सव्यापारस्यैव च कर्मत्वादाक्षिप्तस्यापि प्रयोज्यव्यापारस्योपसर्जनीभूतः प्रयोजकव्यापारो यस्य स विवक्ष्यतइत्युत्तरग्रन्थगतविवक्ष्यतइति पदानुषङ्गेण व्याख्येयम्। ननु प्रयोज्यव्यापारस्य प्राधान्यविवक्षायां करोतिप्रयोगोपपत्तावुपसर्जनत्वविवक्षायां सुतरामुपपत्तेर्न कदा चिद्भावयतिः प्रयुज्येतेत्याशङ्क्याह *कदा चित्पुनरिति* समानस्य पदस्यैकदेशेनोपात्ता प्रयोज्यक्रियोपसर्जनीभूता यस्येति विग्रहः तदा च समानपदैकदेशोपात्तत्वविवक्षायां करोतेरेवाशक्तत्वेन भवतेरपि प्रयोज्यक्रियामात्रपर्यवसायित्वेन प्रयोजकव्यापारविवक्षायां णिच्प्रत्ययं विना प्रवृत्त्यशक्तेः सो ऽप्यधिकः प्रयुज्यतइत्यर्थः। क्रियाया धातुवाच्यत्वप्रसिद्धेर्णिचश्च केवलस्य धातुत्वाभावान्न क्रियावाचितास्तीति ये वदन्ति तन्मते न द्योतकत्वोक्तिः। स्वमते तु भुविक्लिद्योः प्रयोजकक्रियावाचित्वे केवलप्रयोज्यक्रियानिष्ठत्वोक्तिर्विरोधापत्तेर्णिच एव तद्वाचकत्वम्। प्रयोज्यक्रियावाचिना णिचा विना प्रयोजकक्रियायामशक्तिं वृद्धवचनेन द्रढयति * तथा चाहेति * प्रयोज्यकर्तृकाणां भवनादीनां व्यापाराणां प्रतिपादका ये भूवादयो धातवस्तेषांप्रयोज्यानां घटादीनां ये प्रयोजकाः कुलालादयस्तेषां व्यापारेषु णयन्ता एव प्रयुज्यन्तइत्यर्थः। भवनादीनामन्योत्पादानुकूलत्वाभावेनाव्यापारत्वमाशङ्क्य *एकान्तेत्युक्तम्* अन्योत्पादानुकूलत्वाभावे ऽप्यनिष्पन्नरूपत्वादेकान्तेन व्यापारतास्तीत्याशयः। ननु भवत्यादीनां णिचं विना प्रयोजकक्रियाभिधानाशक्तौ करोत्यादीनामप्यशक्तिप्रसङ्गात्तेषां वा शक्तावन्येषामपि शक्तिप्रसङ्गाद्व्यवस्था न युक्तेत्याशङ्क्याह * न चेति * शक्तीनां स्वभावत्वेनापर्यनुयोज्यत्वात्प्रकृतयः प्रत्ययास्तत्समुदायात्मकानि चादिशब्दोक्तानि पदानि नानारूपानर्थान्वदन्तीत्यर्थः। अतो भवत्यर्थकर्तृकर्मनिष्ठप्रयोजकव्यापारवाचित्वेन करोतिभावयत्योस्तुल्यार्थत्वात्सिद्धकर्तृक्रियावाचिषु चाख्यातेषु करोतिसामानाधिकरण्येन करोत्यर्थस्य वाच्यत्वावगमात्तद्द्वारा भावयत्यर्थस्यापि वाच्यत्वासिद्धेर्यज्या-

यर्थश्चातो ऽवगम्यते भावयोरिति चेदित्यादिभाष्यं युक्त-मेवेत्याह * एवमिति * ननु भावनायाः प्रत्ययवाच्यत्वे ऽपि धात्वर्थस्यैव निष्पाद्यत्वलक्षणक्रियारूपेण प्रत्ययेनाभिधानाद्भा-वनात्वोपपत्तेरन्योत्पादानुकूलत्वं ऽपि वा भावनालक्षणे धात्वर्थ-स्यैव धातुना व्यापारात्मनोपादीयमानस्य प्रत्ययावगतानुष्ठेयत्वान्य-थानुपपत्त्या फलोत्पादानुकूलतयावगमाद्भावनात्वोपपत्तेर्भावयेद्या-गेनेति क्रियाकरणतया भेदेन निर्देशो न युक्त इत्याशङ्क्य भवनक्रि-याकर्तृकर्मनिष्ठप्रयोजकव्यापारत्वं धात्वर्थव्यावर्त्तकं लक्षणमाह * तेनेति * येन कारणेन करोतिभावयत्योरुक्तप्रकारेण तुल्यार्थत्वं तेन कारणेनेत्यर्थः। यत्त्वाक्षेपत्रा विधिमात्राभिधायित्वाल्लिङादीनां भावनाभिधायित्वं न सम्भवतीत्युक्तं तदनुभाषणपूर्वकं निराकरो-ति * यत्तूक्तमिति। अयमाशयः * किं विधिमात्रशब्देन भावयति-धातुवाच्यत्वं भावनायाः प्रत्ययानभिधेयत्वे कारणमभिप्रेतं विधि-व्यतिरिक्तभावनाभावो वा। तत्र विधेरपि भावयतिधातुवाच्यत्वेन लिङाद्यवाच्यत्वापत्तेर्नाद्यः कल्प इत्यभिधाभावनाशब्देन सूचितं प्रयोजकव्यापारवाचित्वात् भावनाशब्दस्य विधेरपि प्रयोजकलि-ङादिव्यापारत्वात् भावनात्वमस्तीत्याशयः। ननु विधेर्लिङादिवा-च्यताभ्युपगमात्तदुच्चारणात्प्रागसिद्धत्वे सति अगृहीतसम्बन्धत्वेन वाच्यत्वायोगाल्लिङाद्युच्चारणात्प्रागेव सिद्धेस्तत्परत्वं न युक्तमि-त्याशङ्क्य शब्दश्रवणानन्तरभाविप्रवृत्तिहेतुप्रेषणाध्येषणादिव्यापारा-नुवृत्तप्रवर्त्तनासामान्याभिधानेन तद्विशेषापेक्षायामपौरुषेये वेदे पुरु-षधर्मस्य प्रेषणादेरसम्भवात्तद्व्यतिरिक्तविध्याख्यस्य विशेषस्य पारि-शेष्याल्लक्षणया गम्यमानस्य सम्बन्धग्रहणानपेक्षत्वेन प्राक् सिद्ध्य-नपेक्षणादविरुद्धा शब्दव्यापारतेति सूचनायाभिधाशब्दः। कर्त्तृव्युत्प-त्त्या करणव्युत्पत्त्या वाभिधाशब्दस्य शब्दपरत्वमङ्गीकृत्याभिधायाः शब्दस्यात्मनो भावनां व्यापारं प्रवर्त्तनासामान्यव्यक्तिभूतं लिङाद-यः प्रवर्त्तनासामान्यमभिदधाना निर्विशेषसामान्यायोगात्प्रैषादौ च लोकदृष्टस्य विशेषस्य पुरुषधर्मत्वेनापौरुषेये वेदेऽसम्भवात्प्रवर्त्तना-सामान्यस्य च प्रैषादिप्रवर्त्तकव्यापारवर्त्तित्वदर्शनाल्लिङादेरेव च वेदाप्रवर्त्तकत्वावधारणाल्लक्षणया गमयन्तीत्यर्थः। अन्यामित्यपरत्व-वाचिना ऽन्यशब्देन शब्दभावनायाः पाश्चात्यमभिदधतार्थभावना-विषयत्वेन तदपेक्षत्वसूचनाद्विध्यभिधायित्वं नार्थभावनाभिधायि-त्वस्य बाधकं प्रत्युत साधकमिति सूचितम्। न च विधिव्यतिरि-क्तभावनापह्नवार्थो विधिमात्रशब्दार्थो युज्यते विध्यभावे ऽपि सर्वा-

ख्यातेषु दर्शनेनापह्नोतुमशक्यत्वादिति द्वितीयकल्पनिरासायोत्तरार्धे विधेयायाः भावनायाः पुरुषार्थरूपभाव्यनिष्ठत्वसूचनायेच्छायोनित्वं सूचयितुमिच्छार्थादर्थयतेर्णिजन्तादर्थयतइति कर्तृविवक्षायामेरजित्यच्प्रत्ययोत्पादनेनार्थिनः पुरुषस्यार्थशब्देनाभिधानाद्भावनायाश्च पुरुषधर्मत्वाद्धर्मधर्मिणोश्चात्यन्तभेदाभावात्तादात्म्यं विवक्षित्वार्थात्मा चासौ भावना चेति विग्रहः कार्यः । अन्यामित्यर्थ-

३४५।२ भावनापेक्षित्वं शब्दभावनायाः सूचितमुपपादयति * यदा हीति* पुरुषव्यापाररूपेत्यनेनार्थशब्दस्यार्थयतइति व्युत्पत्त्यार्थिपुरुषपरतया व्याख्यानं सूचितम्। विध्यादीनां भावनाव्यक्तित्वाभावे ऽपि विषयित्वेनावच्छेदकत्वात् विशेषतोक्ता लिङादिषु शब्दविशेषेषु अनुवृत्तं यत्सामान्यमाख्यातत्वं नाम तद्व्यतिरिक्तैर्लिङादिशब्दविशेषैर्वाच्या इत्याख्याततत्वेति त्वप्रत्ययाध्याहारेण व्याख्येयम्। व्यक्तीनां सामान्यादत्यन्तव्यतिरेकाभावे ऽपि आख्यातरूपवाच्यार्थभावनाव्यतिरिक्तविध्याद्यर्थान्तरवाचित्वोपपादनार्थं कथं चिद्व्यतिरेकविवक्षया व्यतिरेकशब्दः। लिङ्लोट्तव्यपञ्चमलकाराणां विधिर्वाच्यस्तेषामेव नञ्युक्तानां निषेधः। लङ्लुङ्लिटां भूतकालः लृट्लुटोर्भविष्यत्कालः लटो वर्त्तमानकालः आदिशब्दोपात्ता क्रियातिपत्तिर्लृङ्वाच्या आशीरादीनामपि लिङादिशब्दवाच्यानामादिशब्देनोपादानमेतदेवोदाहरणैरुपपादयितुम् * तथा चेत्युक्तम् * ननु विध्यादेरर्थभावनापेक्षित्वे ऽप्यभिधाभावनायाः किमायातं का वाभिधाभावना कथं चास्याः सापेक्षतेत्याशङ्क्य * तत्रेत्युक्तम् * विधेरेवाभिधाख्यशब्दधर्मभावनात्वात्तस्याश्च प्रयोजकशब्दव्यापारत्वेन प्रयोज्यपुरुषव्यापारात्मकार्थभावनाविषयत्वात्तदपेक्षितेत्याशयः। शब्दव्यतिरेकेण व्यापारस्यानुपलम्भेनाभावमाशङ्क्यात्यन्तभेदाभावेनानुपलम्भोपपादनायाभिधात्मिकेत्युक्तम् । ननु भावनायाः सर्वत्रांशत्रयोपेतत्वाद्विधेश्चांशत्रयानिरूपणान्न भावनात्वमस्तीत्याशङ्क्याह * विशेषतश्चेति * पुरुषप्रवृत्तिविधिज्ञानप्ररोचनाख्यसाध्यसाधनेतिकर्त्तव्यताविशिष्टरूपेण वर्णितेत्यर्थः । यच्च करोतिभावयत्योः प्रत्ययेन सह प्रयोगात्सहाप्रयोज्यत्वलक्षणपर्यायास्थित्यतिलङ्घनेनापर्यायत्वमुक्तं तदप्यनुभाषणपूर्वकं त्रेधा परिहरति * यत्त्विति * पर्यायाणां सहाप्रयोज्यत्वस्यानर्थक्यापत्तिप्रयुक्तत्वात् पर्यायत्वस्वरूपस्याप्रयोजकत्वेन स्वरूपप्रयुक्तसाहित्यलक्षणव्याप्त्यभावादिह च प्रकृत्यनुग्रहादिप्रयोजनत्रयसद्भावेनानर्थक्यापत्त्यभावान्न सहाप्रयोज्यत्वनिवृत्त्या पर्यायत्वनिवृत्तिरित्याशयः । प्रकृत्यनुग्रहार्थत्वमुप-

मुपपादयति*यदि हीति* ननु तृजादिप्रयोगेणापि प्रकृत्यनुग्रहसि-
द्धेराख्यातनियमो ऽनर्थकः स्यादित्याशङ्क्याह *तेनेति* येन प्रत्ययं
विनापभ्रंशत्वप्रसङ्गस्तेनावश्यं कस्मिंश्चित्प्रत्यये प्रयोज्ये तृजादिप्र-
योगे कर्त्राद्यर्थान्तरापत्तेस्तस्य च विवक्षितार्थाभ्यधिकत्वेनावाच्य-
त्वात्प्रकृत्यर्थानुवाद्याख्यातमेव नियम्यतइत्यर्थः । नन्वधिकार्थापत्ति-
भयात् कर्त्ता भावयितेत्यादिकर्त्रादिवाचितृजादिप्रयोगायोगे ऽपि
इकः श्तिपो वाभ्यधिकार्थानापादकत्वेन प्रयोगोपपत्तेः क्रिभांबिः क-
रोतिर्भावयतिरिति वा कस्मान्न प्रयुज्यतइत्याशङ्कते*ननु चेति *
तयोरधिकार्थत्वाभावे ऽपि तद्युक्तयोः करोतिभावयत्योः स्वरूपवा-
चित्वेनाख्यातार्थवाचित्वहानापत्तेर्न युक्तः प्रयोग इति परिहरति
* नैतदिति * नन्वर्थे ऽपीङ्गन्तस्य श्तिबन्तस्य वा धातोः प्रयोगान्ना-
र्थवाचित्वहानिरित्याशङ्क्याह * यस्त्विति * एतदेवोपसंहरति
* तस्मादिति * कर्तृसंख्यादिसङ्ग्रहार्थत्वं विवृणोति * यदि　३४६।१
चेति * पूर्वस्मिन्परिहारे सर्वप्रत्ययार्थाविवक्षापत्तेः परिहारान्तर-
मुक्तम् भावनांशानुवादास्त्विहापि तुल्य इत्याह * यस्त्विति *
ननु भावनायाः प्राधान्येनाख्यातार्थत्वाद् गुणभूतकर्तृसंख्यादिसंग्र-
हायानुवाद्यत्वानुपपत्तेः प्रकृत्यनुग्रहाय धातुनिर्देशार्थस्यैव प्रत्ययस्य
लक्षणार्थपरत्वोपपत्तेः प्रयोगो युक्त इत्याशङ्क्याह * अन्यथा
हीति * आख्यातार्थकथनाय भावनामात्रवाचिनि क्रिभाव्यादि-
शब्दे प्रयुज्यमाने भावनामात्रस्याख्यातार्थत्वभ्रान्तिं करोतिभा-
वयत्योर्वा सर्वाख्यातार्थवाचित्वभ्रान्तिं व्यावर्त्तयितुं कर्तृसं-
ख्याद्याख्यातेनावश्यं वाच्यमित्यर्थः । रूपाविनाशसिद्ध्यर्थ-
त्वमुपपादयति * नित्यं चेति * एतच्च ननु कारो भाव
इत्यादि भावोत्पन्नकृत्प्रयोगे ऽभ्यधिकार्थान्तरानापत्तेः शब्द-
पदार्थकत्वानापत्तेश्च नाख्यातनियमः सम्भवतीत्याशङ्क्य * परिहा-
रान्तरमुक्तम् * श्लोकार्थमुपसंहरति * तस्मादिति * एवं पर्याय-
त्वे ऽपि प्रत्ययस्य प्रयोजनान्तरार्थत्वेन पौनरुक्त्याभावात्सह प्रयोगो
* न विरुध्यतइत्युक्तम् * इदानीं भावनाया वस्तुतः प्रत्ययमात्रवा-
च्यत्वे ऽपि प्रतीतिमात्रव्यवहारिणा लोकेन विवेक्तुमशक्यत्वादा-
ख्यातपदेन धात्वर्थवत् भावनाप्युच्यतइत्येतावदवगम्य पचतीत्यस्य
को ऽर्थ इति पृष्टे धातुमात्रवाच्यत्वेन निश्चितं धात्वर्थं पाकमिति
व्याख्याय सम्मुग्धाख्यातपदवाच्यत्वेन भावनां ख्यापयितुं करोतौ
भावयतौ वा प्रयुज्यमाने प्रकृत्यनुग्रहार्थं प्रत्ययमात्रस्य भावनावाचि-
त्वाभावेनापौनरुक्त्यं मत्वा प्रयोगो न विरुध्यतइत्याह * किं चेति *

पर्यायत्वाभावादपि तिङ्प्रयोगाविरोध इत्येवम् किं च शब्दव्याख्यानपूर्वकम् । श्लोकं व्याचष्टे * यदि हीति * लोकानवगतं विवेकं कुर्वतां परीक्षकाणां लोकविरोधपरिहारसूचनार्थं लोकस्य विवेकज्ञानप्रयोजनाभावाभिधानम् । ननु धातोः व्यभिचारित्वेनावाचकत्वनिश्चयात्प्रत्ययमात्रवाच्यत्वं विवेक्तुं शक्यमित्याशङ्कते * स्यादेतदिति * प्रत्ययस्यापि व्यभिचारस्तुल्य इति तावत्परिहरति * तदिति * प्रौढ्या भावनावाचित्वेनाभिमतस्य सिद्धकर्तृक्रियावाचिनो धातोरव्यभिचारं वक्तुमुपक्रमते * न वेति * प्राधान्याप्रतीतावपि स्वरूपमात्रप्रतीतिदर्शनायात्यन्तमित्युक्तम् । अस्तिः प्रतीतिलक्षणार्थः। तत्र कृद्विशेषाणां कृत्यानां प्रैषातिसर्गप्राप्तकालेषु कृत्याश्चेति प्रैषवाचित्वस्मृतेरप्राप्तविषयस्य च प्रैषस्य विधित्वाद्विधेश्च भावनाविषयत्वादप्रधानभूतायाश्चांशत्रयोपसंहारासामर्थ्येन विधातुमशक्यत्वादीषत्प्राधान्यमप्यस्तीति सूचयितुं पूर्वं कृत्येषु किं चिदपकृष्यमाणभावनारूपप्रतीतिं दर्शयति * कृत्येषु तावदिति * कृत्यमध्ये ऽपि भोक्तव्यमित्यादेर्भावोत्पन्नात्कृत्याद्धन्तव्य इत्यादिषु कर्मोत्पन्नेषु न्यूनतरागम्यतइत्याह * तत्रापीति * द्रव्यप्राधान्येन धात्वर्थस्यापि प्राधान्याभावाद्भावनायाः सुतरां नास्तीति सूचितं कथं न्यूनतरत्वं चेत्यपेक्षायामाह * न हीति * भोजनं कर्त्तव्यमित्यत्र प्रयोजकव्यापारस्य धात्वर्थप्रधानत्वाद्धन्तव्य इत्यत्र च प्रयोज्यद्रव्यपरत्वान्न प्राधान्यमित्यर्थः । द्रव्यस्वरूपस्य तव्यवाच्यत्वाभावेन प्राधान्यायोगात् कर्मस्वरूपेण प्राधान्यं वक्तुं प्रयोज्यशब्दः । निर्व्यापारस्य प्रयोज्यत्वायोगात्कर्मशक्त्याक्षिप्तप्रयोज्यव्यापारविशिष्टतोक्ता । नन्वेवं सति तिङ्क्षु भावनावाचित्वस्य भावनाप्राधान्यव्याप्तेः कृत्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचितापि निवर्त्ततइत्याशङ्क्य तिङ्क्ष्वपि सर्वेषु भावनाप्राधान्याभावाद्व्याप्त्यभावं सूचयितुमाह * एतेनेति * भावोत्पन्नाः कर्मोत्पन्ना वा स्थानिनो लकारा येषां भुज्यते देवदत्तेन भुज्यते ऽन्नमित्यादीनामादेशानां तिङन्ते ऽप्यनेन भावकर्मोत्पन्नकृत्यव्याख्यानेन व्याख्याता इत्यर्थः । एतदेव विवृणोति * तेष्वपीति * अतो भावनावाचिनामपि सर्वेषां तिङन्तानां तत्प्राधान्यलक्षणतुल्यत्वाभावाद्भावनावाचित्वस्य तत्प्राधान्येनाव्याप्तेर्न कृत्येषु भावनाप्राधान्यनिवृत्त्या तद्वाचित्वनिवृत्तिरित्युपसंहरति * अत इति * अव्ययसंज्ञकेषु कृत्सु कृत्यसंज्ञकेभ्यो ऽपीपतन्न्यूनभावनाज्ञानमित्याह * तथेति * ननु तेषामपि भोक्तव्यमिति कृत्यसंज्ञककृद्वद्भावोत्पन्नत्वस्मरणाविशेषात्कथं कृत्यवाच्यभावनातो ऽव्ययकृ-

३४७।१

द्वाच्यावा भावनायाः न्यूनतेत्याशङ्क्य * अव्ययेत्युक्तम् * स्मृत्युपन्यासेनाव्ययकृत्सु इति ज्ञातुं शक्यत्वान्न कण्ठेनोक्तम्। ईषन्न्यूनभावनाज्ञानस्य स्वसंवेद्यत्वमुदाहरणैर्दर्शयति * अभिक्राममिति * धातुसम्बन्धे प्रत्यया इति धातुसम्बन्धाधिकारविहितानामपि णमुलादीनां धात्वर्थसम्बन्धं विना धातुसम्बन्धायोगात् धात्वर्थनिष्पादलक्षणभावनायाः सम्बन्धं च विना धात्वर्थसम्बन्धायोगाद्भावनासम्बन्धवाचित्वप्रतीतेः समानकर्तृकयोः पूर्वकालइत्यनेन समानकर्तृकयोः धात्वर्थयोः पूर्वकाले धात्वर्थे वर्त्तमानाद्धातोः क्त्वाप्रत्ययं विधाय आभिक्ष्ण्ये णमुल्चेति तस्मिन्नेवार्थे पौनःपुन्याख्याभीक्ष्णाधिक्ये णमुलविधानादभिक्रमणं कृत्वा होमं करोतीति णमुल्श्रुत्यैव होमभावना सापेक्षाभिक्रमणभावनाश्रीयते। करणे हन इति च करणवाचिन्युपपदे हन्तेर्णमुल्प्रत्ययविधानादुपहननं कृत्वा होमं करोतीति हननभावना होमभावना सापेक्षावगम्यते। होमं कृत्वा भक्षणं करोतीति भक्षणभावना सापेक्षा होमभावना क्त्वाश्रुत्यैवावगम्यते। भावलक्षणे स्थेण्कृञ्वदिचरिहुतमिजनिभ्यस्तोसुन् इत्यनेन च तुमर्थइत्यनुवर्त्त्य भावे च तुमर्थत्वेन विवक्षित्वा भावो लक्ष्यतेऽनेनेति च भावलक्षणशब्दार्थे विवक्षित्वा तिष्ठतेरिणः कृञोवदेश्चरेर्जुहोतेस्तमिर्जनेश्च धातोर्भावलक्षणार्थे भावे वर्त्तमानात्तोसुन् विधानात्पुरा वाचः प्रवदितोरनूच्य इत्यत्र प्रवदितोरित्यव्ययतोसुन् श्रुत्यैव पुरेति दिक्शब्दयोगात् लुप्तपञ्चमीकतया वाक्प्रवादक्रियातः पुराप्रातरनुवाकानुवचनं कार्यमित्यनुवाचनभावनासापेक्षा प्रवादभावना गम्यते। अतो भावनान्तरसापेक्षत्वात्स्वसम्वेद्या न्यूनतेत्याशयः। निष्ठासञ्ज्ञयोस्तु क्तक्तवत्वोः कृतो न्यूनतरभावनाज्ञानं स्वसम्वेद्यमित्याह *पक्व इति* पक्वः पक्ववानित्यत्रोदनः कृतपाको देवदत्तः पाकं कृतवानिति निष्पन्नरूपायाः भावनायाः यथासंख्यं कर्मकर्तृरूपद्रव्योपसर्जनत्वप्रतीतेर्निष्पाद्यत्वप्राधान्ययोर्द्वयोरप्यभावात्कृत्यसञ्ज्ञकेभ्यः कृद्भ्यो न्यूनतरेत्याशयः। एवं कृत्याव्ययनिष्ठासञ्ज्ञकेषु कृद्विशेषेषु अपकृष्यमाणभावनारूपप्रतीतिमुक्त्वा कृदन्तरेषु यथासम्भवमतिदिशति * एवमिति * पाचकः पक्तेत्यादिषु कर्त्रुत्पन्नेषु पाककारकः पाककर्त्तेत्यादिकर्तृप्राधान्यप्रतीतेरादिशब्दोपात्तेषु पाक इत्यादिषु भावोत्पन्नेषु पाकः क्रियेत्यादिधात्वर्थप्राधान्यप्रतीतेर्विधेयत्वाभावेन च प्राधान्यानपेक्षणात् कृत्येभ्यो न्यूनतरेति भावः। स्वसम्वेद्यमपि सर्वेषु सिद्धकर्तृक्रियावाचिषु धातुषु भावनाज्ञानं विप्रतिपन्नान्प्रत्यर्थापत्त्या साधयति * तथा चेति * भावोत्पन्नेषु

कृत्येषु कस्य केनेति कर्मकर्तृकरणानां कर्मोत्पन्नेषु केनेति कर्तृकरणयोरभिक्रामामित्यत्र कर्त्तुरुपघातमित्यत्र कस्य कः केनेति कर्मकर्तृकरणानां प्रवदितोरित्यत्र कस्येति कर्मकर्त्रोः पक्क इत्यत्र केनेति कर्तृकरणयोः पक्वानित्यत्र कस्य केनेति कर्मकरणयोः पाचक इत्यत्र कस्य केनेति कर्मकरणयोः पाक इत्यत्र कस्येति कर्मकर्त्रोः केनेति च करणस्याधिकरणाद्यपेक्षायाश्च यथायोगं दर्शनात्तस्याश्च रूढ्यादिषु भावनानुपलब्धावदर्शनाद्भावनाज्ञानहेतुत्वावधारणात्तदन्यथानुपपत्त्या भावनाज्ञानं कल्प्यतइत्यर्थः । करोतेश्च ण्वुल्प्रत्यये कारकशब्दस्य मनिन्प्रत्यये । कर्मशब्दस्य तृच्प्रत्यये कर्तृशब्दस्य ल्युट्प्रत्यये करणशब्दस्य व्युत्पत्तेः कारकव्यपदेशतद्विशेषकर्मादिव्यपदेशानां करोत्यर्थव्यापारसम्बन्धनिबन्धत्वात्तदन्यथानुपपत्त्यापि भावनाज्ञानं कल्प्यतइत्याह * न चेति * ननु धात्वर्थस्यैव व्यापारत्वात्कारकापेक्षा कर्मादिषु च कारककर्मादिव्यपदेशाश्चोपपत्स्यन्त इत्याशङ्क्याह * न त्वस्तीति * धात्वर्थस्य निष्पाद्यत्वे सत्यप्यन्योत्पादानुकूलत्वलक्षणकरोत्यर्थक्रियारूपव्यापारत्वाभावान्न क्रियासम्बन्धिरूपकारकापेक्षा धात्वर्थसम्बन्धनिबन्धना वा कारकादिव्यपदेशाः सम्भवन्तीत्याशयः । यत्र धात्वर्थे किं चिदसन्न जायते स व्यापारो न भवतीत्यर्थः । अतः करोतिभावयत्योर्यो ऽर्थस्सर्वधातूनामर्थः सिद्ध इत्युपसंहरति * ततश्चेति * नन्वाख्यातेषु भावनावाचित्वं करोतिसामानाधिकरण्येन व्याप्तं (कृत्सु करोतिसामानाधिकरण्ये व्यावृत्त्या न व्याप्तं) कृत्सु करोतिसामानाधिकरण्ये व्यावर्त्तते इत्याशङ्क्याह * शक्यते चेति * ननु पूर्वापरानेकक्षणव्यासक्तरूपपूर्वापरीभूतत्वस्य व्यापारलक्षणस्य घञन्तादिष्वप्रतीतेः कथं भावनाख्यव्यापारवाचितास्तीत्याशङ्क्य * विनापीत्युक्तम् * यथा शुक्लत्वमित्यत्र भावप्रत्ययाद् गुणस्य निष्कर्षप्रतीतेर्द्रव्योपसर्जनत्वरूपाप्रतीतावपि गुणस्वरूपवाचित्वं न विहन्यते तथात्रापि घञादिप्रत्ययात् सिद्धरूपप्रतीतेः पूर्वापरीभूतत्वरूपानिष्पाद्यत्वाप्रतीतावपि भावनास्वरूपवाचित्वं न विहन्यतइति भावः । कथं शक्यमित्यपेक्षायामाह * तद्यथेति * णमुलन्तधातौ करोतिसामानाधिकरण्यं प्रदर्शयितुं प्रश्नार्थे किमिति प्रयोक्तव्ये अन्यथैवं कथमित्थंस्विनियोगिनि किम्युपपदे करोतेर्णमुल्प्रत्ययाविधानात् * कथङ्कारमित्युक्तम् * किं कृत्वा भक्षयन्त्यभिषुत्य हुत्वेति वक्तव्यं होमाभिषवयोः पौर्वापर्यसन्देहनिवृत्त्यर्थं जुहोतीत्यु-

१ अयं पा० १ पु० ना० ।

क्तं किङ्कर्त्रोः पुरा प्रवदितोरिति कृञ्वदिभ्यामेकसूत्रेण तोसुन्विधानात्सुज्ञातत्वान्न दर्शितम् किं कर्त्रेत्युच्यमाने कर्मविशेषप्रश्नाशङ्कापत्तेः क्रियाविशेषविषयत्वज्ञापनार्थं का क्रियास्येति विवक्षितत्वात् * किं क्रिय इत्युक्तम् * नन्वाख्यातेषु भावनायाः प्राधान्यप्रतीतेः प्रत्ययार्थत्वावधारणाच्च धातुवाच्यतेत्याशङ्क्याह * न चेति * प्रत्ययार्थस्यापि कर्तृसंख्यादेर्गुणत्वदर्शनात्प्रत्ययार्थस्य प्राधान्यस्मृतिरप्रमाणमित्याशयः । अतो यथा धातवो धात्वर्थे न व्यभिचरन्ति तथा भावनामपीत्युपसंहरति * तस्मादिति * भिन्नक्रमो ऽपिशब्दः सर्वधातूनां करोत्यर्थवाचित्वे ऽभियुक्तानां संमतिमाह * तथा चाहुरिति *

विभज्य सेनां परमार्थकर्मा सेनापतींश्चापि पुरन्दरोत्थः ।
नियोजयामास स शत्रुसैन्ये करोतिरर्थेष्विव सर्वधातून् ॥

नन्वाख्यातेषु सर्वधातुवाच्यत्वे भावनायाः प्राधान्यप्रतीतिः कथमित्याशङ्क्याह * यत्त्विति * गुणप्रधानभावस्यार्थाद्गम्यमानत्वेन प्रत्ययार्थत्वपक्षे ऽपि प्राधान्यस्य वाच्यत्वाभावात्प्रौढिमात्रेण वाच्यत्वाभिधानमिति सूचयितुम् * काममित्युक्तम् * अस्मिन्पक्षे यज्याद्यर्थश्चात इत्यतःशब्देन धातुमात्रपरामर्शात् धात्वर्थश्च धातोरवगम्यते भावयेदिति चेति भाष्यं व्याख्येयम्।नन्वेवं भावनायाः प्रत्ययवाच्यत्वाभावात्प्रत्ययस्य करोतिभावयतिभ्यां पौनरुक्त्याभावे ऽपि यागेनेति घञन्तेन धातुना धात्वर्थे कथ्यमाने भावनाया अपि तेनैव धातुनोपात्तत्वाद्भावयेदिति पुनरुक्तं स्यादित्याशङ्कते * नन्विति * ननु घञा भावनातो धात्वर्थस्य निष्कृष्टत्वात्कथं भावनोपादानमित्याशङ्क्यैकशब्दोपात्तयोः शुद्धाभिधानलक्षणनिष्कर्षायोगात्सिद्धरूपाभिधानलक्षणो निष्कर्षो वाच्यः । भावनाया अपि सिद्धरूपेणाभिधानोपपत्तेरपरिहार्यं पौनरुक्त्यमिति सूचयितुं व्याख्यायमानं इति वक्तव्ये निष्कृष्टमित्युक्तम् । तृतीयान्तेन करणात्मना धात्वर्थस्य निष्कृष्टत्वाद्भावनायाश्च क्रियात्वेन करणत्वायोगाद्धात्वर्थमात्रं धातुना विवक्षित्वा शब्दान्तरेण भावनारूपार्थव्याख्या युक्तेति परिहरति * नैष दोष इति * सामान्यविशेषशब्दयोरवच्छेद्यावच्छेदकपरत्वं विशेषणभावाच्च यागादयो भावनाविशेषा इत्यत्र स्वयमेव वक्ष्यते एवं प्रौढ्या धातुमात्रवाच्यत्वमुपपाद्य केवलयोर्धातुप्रत्यययोर्व्यभिचाराद्धात्वनुगृहीतेन प्रत्ययेन प्रत्ययानुगृहीतेन वा धातुना उभाभ्यां वा परस्परानुगृहीताभ्यां भावनोच्यत इत्यपि वक्तुं शक्यमिति यदुपक्रमे ऽभिहितं तदुपपादयति *अथ वेति* कर- ३४८।२

णांशस्य धात्वर्थस्य कर्तृसंख्यादीनां चैकवाच्यत्वे ऽपि भावनायाः समुदायवाच्यत्वाविरोध इत्याशयः । अस्मिन्पक्षे यज्याद्यर्थश्चात इत्यतःशब्देन धातुप्रत्ययसमुदायं परामृश्यातःसमुदायाद्यज्यादिधात्वंशस्य चार्थो ऽवगम्यते समुदायार्थश्च भावनेति भाष्यं व्याख्येयम् प्रकृतसूत्रपर्यालोचनयाप्येतत्पक्षद्वयं प्रतिभातीत्याह * तथा चेति* क्रियतइत्यस्मिन्नर्थे करोतेर्मनिन्प्रत्ययस्मृतेः कर्मशब्दस्यानुष्ठेयवाच्यत्वाद्धात्वर्थानवच्छिन्नायाश्च भावनाया अनुष्ठेयत्वाद्धात्वर्थस्यैवानुष्ठेयत्वेन कर्मशब्दवाच्यत्वात्कर्मशब्दशब्देन धातून् विवक्षित्वा तत्सामानाधिकरण्याद्भावार्थता तेषामेवाश्रितेत्यर्थः । समुदायवाच्यत्वपक्षे भावार्थानां धातुप्रत्ययसमुदायानां धात्वंशेन कर्म्मशब्दत्वात्सामानाधिकरण्यं प्रत्ययस्य तु भावार्थत्वेन कथं चित् सामानाधिकरण्यमित्याशयः । नन्वेवं सति सिद्धकर्तृक्रियावाचिन्याख्यातप्रत्यये सति इत्यादिना कस्मात्प्रत्ययवाच्यतोक्तेत्याशङ्क्याह * शास्त्रे त्विति * इहैव तावद्यज्याद्यर्थश्चातो यजेतेति पदादवगम्यते भावयेदिति चेति धातुवाच्यादर्थाद्भेदेन भावनावगमाभिधानाद्धातुमात्रस्य चानिर्दिष्टस्यातःशब्देन परामर्शानुपपत्तेस्तन्मात्रपरामर्शे च यागादिश्चातो ऽवगम्यते इति वक्तव्यत्वात्प्रत्ययार्थत्वाभिप्रायागवतेः शब्दान्तराधिकरणे च यजेतेत्यस्य पूर्वो भागो यजत्यर्थं ब्रवीति उत्तरो भागो भावयेदिति इत्यादिभाष्ये परो भागो भावनावचन इत्यत्र च स्पष्टप्रत्ययवाच्यत्वाभिधानात्सामानाधिकरण्यस्य चाख्यातपदरूपाः शब्दाः प्रत्ययांशेन भावार्थाः धात्वंशेन कर्मशब्दा इत्येव धातव एव भावनाविशेषणभूतस्वार्थवाचित्वेन भावनाप्रयोजनत्वाद्भावार्था इत्येवं वोपपत्तेः । प्रत्ययमात्रार्थता शास्त्रकाराणामभिप्रेतेत्याशयः । प्रत्ययार्थत्वमुपपादयितुमुपक्रमते * तत्रेति * भावप्रधानमाख्यातमिति नैरुक्तिकस्मृतेर्णिजन्ताद्भवतेरच्प्रत्यये कृते भावशब्दव्युत्पत्तेर्भावनाप्राधान्यविषयत्वावसायात्प्राधान्याभावे च कृदन्तवन्निरपेक्षस्य कारकान्वयायोगापत्तेराख्यातेभ्यश्च भावनाप्राधान्यावगतेः । सर्वस्य सम्वेद्यत्वान्न तावत्प्राधान्ये विप्रतिपत्तुं शक्यम् । प्रकृत्यर्थत्वे च सति विशेषणत्वापत्तेः प्राधान्याभावप्रसङ्गात्प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूतस्तयोः प्रत्ययार्थः प्राधान्येनेति प्रत्ययार्थप्राधान्यस्मृतेश्च कर्तृसंख्यादेः प्रत्ययार्थस्य प्राधान्याभावात्प्रत्ययार्थः प्रधानमेवेति नियमायोगे ऽपि प्रत्ययार्थ एव प्रधानमिति नियमोपपत्तेर्नामस्वपि च कृत्तद्धितान्तेषु कारकविभक्त्यन्तेषु च प्राधान्यस्य प्रत्ययार्थत्वाव्यभिचारात्सत्त्वप्रधानानि नामानि इति

स्मृतेश्च लिङ्गसंख्यासम्बन्धार्हत्वाविषयतया व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यपरत्वे ऽपि वा प्रतीत्यनुसारात्प्रथमान्तनामविषयतया व्याख्यानोपपत्तेः। प्रातिपदिकार्थप्राधान्यस्य प्रत्ययार्थत्वव्यभिचारानापादकत्वात्प्राधान्येन भावनायाः प्रत्ययार्थतावसीयतइत्याशयः। प्रकृत्यर्थस्य विशेषणत्वोपपादनार्थं पूर्वार्द्धे प्रत्ययार्थविशेषणीभूतस्यार्थाभिधानेन प्रकृतेः प्रत्ययार्थपरत्वस्य विवक्षितत्वात् श्लोकतात्पर्यं व्याचष्टे * यद्यपीति * तदागमन्यायेनापि भावनायाः प्रत्ययार्थतावसीयतइत्याह * तथेति * नन्वन्वयव्यतिरेकाभ्यां निष्कृष्टे ऽर्थे नियम्यतइत्यन्वयव्यतिरेकैकशरणत्वान्निष्कृष्टार्थविषयशक्तिनियमस्य धातुव्यतिरेकेण चाख्याताभावादिह तन्मात्रान्वयव्यतिरेकानुपपत्तेः कथं तन्मात्रवाच्यत्वनिर्णय इत्याशङ्क्याह * न केवलमिति * धात्वपरित्यागे ऽपि प्रत्ययश्रवणकाले धातुश्रवणाभावे ऽपि भावनाप्रतीतेर्धातुश्रवणकाले च प्रत्ययश्रवणाभावे तदप्रतीतेः शब्दवत्तूपलभ्यते न तदागमे हि तद् दृश्यते तस्य ज्ञानं यथान्येषामिति चातुर्थन्यायेन निर्णयो भविष्यतीत्याशयः। यत्तु कृदन्तधातुवदस्त्यादिपरस्य प्रत्ययस्यापि भावनाव्यभिचारात्तद्वाचित्वं न सम्भवतीत्युक्तं तदनुभाषणपूर्वकं परिहरति * यत्त्विति * अयमाशयः पचतीत्यादिषु प्रतीयमानायाः भावनायाः धात्वर्थेन स्वनिष्पादकतया लक्ष्यमाणत्वे गुणत्वापत्तेः प्राधान्यप्रतीतिविरोधापाताद्वाच्यत्वं तावदवश्याङ्गीकार्यं तच्च व्यभिचारात्प्रत्ययस्यावाचकत्वे धातुसमुदाययोरप्यवाचकत्वापत्तेर्विरुध्येत समुदायार्थत्वपक्षे ऽपि हि धातुमात्रस्याख्यातसाहित्यात्मकः समुदायो भावनावाची स्यात्पचत्यादिधातुविशेषस्य वा तत्र धातुविशेषस्य शुद्धस्यापि अव्यभिचारोपपत्तेर्द्वयोर्वाचकत्वकल्पनस्यान्याय्यत्वाच्छुद्धधातुवाच्यत्वस्य प्राधान्यविरोधादनभ्युपगमे प्राधान्यस्य शुद्धप्रत्ययार्थत्वेन कारकविभक्तिवाच्येषु कारकेषु व्याप्तेः। शुद्धप्रत्ययार्थत्वस्यैव न्याय्यत्वापत्तेर्धातुमात्राख्यातसमुदायार्थताभ्युपगन्तव्या सा च व्यभिचाराविशेषान्न युक्तेति पक्षत्रये ऽपि यत्र पचतीत्यादौ भावना प्रतीयते तत्रैव वाच्यताङ्गीकार्या तत्र चोक्तरीत्या प्रत्ययार्थतैव निश्चीयतइति। नन्वेवं सति भावनायाः सार्वत्रिकं प्रत्ययार्थत्वं न सिध्यतीत्याशङ्क्याह * अन्यत्र त्विति * प्रयोजकव्यापारस्य भावनात्वात् अस्त्याद्यर्थकर्त्तुश्चासिद्धत्वेन प्रयोजकत्वायोगात् भावनानुपपत्तेरसत्याश्च कस्य वाच्येति विचाराविषयत्वात्प्रत्ययस्य भावनावाचित्वाभावे ऽपि प्रकृ-

त्यनुग्रहार्थत्वेन कर्तृसंख्याद्यभिधानार्थत्वेन वा टाबादेरिव स्त्रीत्ववाचिनः खट्वादौ स्त्रीत्वाभावेन तद्वाचित्वाभावे ऽप्यर्थवत्त्वोपपत्तेरानर्थक्यपरिहारायापि वाच्यानाकाङ्क्षणाद्यत्र प्रतीयते तत्रैव प्रत्ययार्थत्वं विचार्यते तत्र च सार्वत्रिकतास्त्येवेत्याशयः। नन्वेवं सति व्यभिचारात्प्रत्ययस्य भावनावाचिता न युक्तेत्याशङ्क्याह * क्वचिदिति *

नान्वयव्यतिरेकाभ्यां त्वपूर्वो ऽर्थो ऽवगम्यते।
सङ्कीर्णो ऽवगते त्वर्थे ताभ्यां शक्तिर्नियम्यते ॥

तेनानेकात्मकाच्छब्दादनेकार्थावबोधने सिद्धे यदागमे यो ऽर्थः स तस्येत्यवधार्यते इत्यनेनानेकशब्दोच्चारणादनेकार्थप्रतीतौ कस्य शब्दस्य को ऽर्थ इति विवेकमात्रस्य तदागमन्यायात्मकान्वयव्यतिरेकाधीनत्वादस्त्यादौ च भावनाप्रतीत्यभावेन कस्यासावर्थ इति विवेकानाकाङ्क्षणात्कूपयूपसूपादिवद्व्यभिचारे ऽपि यत्रानेकार्थप्रतीतिस्तत्र तदागमन्यायाविघातान्न कश्चिद्दोष इत्युत्तरमुक्तमित्यर्थः। प्रौढ्या ऽस्त्यादिना परस्परप्रत्ययस्य भावनावाचित्वं वक्तुमुपक्रमते * अथ वेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * भाव्यं विना भावनानुपपत्तिमाशङ्क्य भाव्यान्तराभावे ऽपि कर्तैव भाव्यो भविष्यतीत्युक्ते कथमेकस्यैव कर्तृकर्मतेत्याशङ्कानिरासायांशशब्दः घटो भवतीत्युच्यमाने घटे प्रयोगात्तस्यां चावस्थायां पूर्वापरीभूतस्य घटस्य केन चिदंशेन सिद्धत्वात्केन चित्साध्यत्वात्सिद्धेः कर्त्तुर्घटस्यांशे समवेता भाव्यकर्त्रंशविषया भावनास्त्येवेत्यंशशब्दात्परां सप्तमीमधिकरणकर्मरूपविषयपरतयावश्यं व्याख्येयम्। नन्वेवं सति तत्र करोतिसामानाधिकरण्यं कस्मान्न भवतीत्याशङ्क्योत्तरार्द्धं सिद्धासिद्धानां घटावयवानामत्यन्तभेदाभावादन्यत्र कर्तृव्यतिरिक्ते भाव्ये शेषत्वाभावाद्व्यतिरिक्तभाव्यनिष्ठत्वाभावात्करोत्यर्थभावनारूपेण सा न प्रकाशते न प्रतिभातीत्यर्थः। केन चिदंशेन सिद्धो घटो ऽशान्तरं करोतीत्यपि विवक्षितुं शक्यत्वात्प्रत्युक्तम्। कथं चित्करोत्यर्थरूपप्रतीतावपि प्रकर्षेण न प्रतीयतइत्यर्थः।अनुपलब्धिविरोधाशङ्कानिरासार्थत्वेनोत्तरार्द्धव्याख्यानपूर्वकम् श्लोकं व्याचष्टे * यद्यपीति * प्रशब्दव्याख्यानाय * अतीवेत्युक्तम् * अंशांशिनोरत्यन्तभेदाभावात् * आत्मानमित्युक्तम्* अंशत्रयं विना भावनाया नैराकाङ्क्ष्याभावाद्भाव्यांशसूचितौ करणेतिकर्तव्यतांशौ दर्शयितुं निरन्तरपूर्वक्षणावयवोत्पत्तेः करणत्वं व्यवहितावयवोत्पत्तेश्चेतिकर्त्तव्यतात्वमु-

३४९।२

क्तम्। ननु घटो भवतीति वाक्ये कथमंशत्रयप्रतीतिरित्याशङ्क्य तत्र प्रयोगे त्रयो ऽप्यंशा धातूपात्तेन भवनेन * पूर्यन्तइत्युक्तम् * प्रत्ययोपात्ताया भावनाया भाव्यापेक्षायां घटस्य भवतिपदात् भवितृत्वावगतेर्भाव्यांशे निवेशार्हत्वाद्धातूपात्तस्य च भवनस्य धात्वर्थान्तरवत् करणेतिकर्त्तव्यतांशान्वयात् घटः स्वभवनेन करणेतिकर्त्तव्यतारूपेणात्मानं भवनं भावयतीत्यर्थो भवतीत्याशयः । ननु व्यापारान्तरासम्भवे ऽप्येकस्य भवनस्यानेकांशपूरकत्वं न युक्तमित्याशङ्क्य भवनकर्तृभूतावयवभेदेन भवनभेदं सूचयितुं केचिदवयवाः प्रयुज्यन्ते केचित्प्रयोजका इति श्लोकगतांशशब्दार्थे व्याख्याते के प्रयोज्याः के प्रयोजका इति व्यवस्थापेक्षायां भवनं कुर्वतामुत्तरावयवानां प्रयोज्यत्वोक्त्या भवनस्य प्रयोज्यव्यापारत्वेन भाव्यांशपूरकता सिद्धभवनानां च पूर्वावयवानां प्रयोजकत्वोक्त्या सिद्धत्वेन करणेतिकर्त्तव्यतांशपूरकतोपपादिता अवस्थाविशेषाभिप्रायौ चेमावंशावयवशब्दौ । घटादिर्हि मृत्पिण्डादेरुत्पद्यमानो घटादिशब्दवाच्यपृथुबुध्नोदराद्याकारात्मकावस्थाविशेषात्प्रागवस्थान्तराणि अनुभूय घटादिशब्दवाच्यावस्थाविशेषरूपेणोत्पत्तेः पूर्वावस्थाभिर्भाव्यः पूर्वावस्थायाश्च तत्साधनत्वाद्यथार्हं करणेतिकर्त्तव्यतात्वेन विवक्षितुं शक्यन्ते घटशब्दवाच्यस्य त्वस्यैवैकस्यावस्थाविशेषस्य प्रयोज्यत्वे वाच्ये ततः प्राचीनानामप्युत्तरोत्तरावस्थानां पूर्वपूर्वावस्थाहेतुकत्वं दृष्टान्तार्थे सूचयितुम् अवयवा इति बहुवचनम्। ननु सिद्धभवनानां पूर्वावयवानां प्रयोजकत्वेनाभिमतानामसिद्धभवनोत्तरावयवोत्पत्तौ हेतुभूतः को ऽसौ व्यापारो यो भावनेत्युच्यतइत्याशङ्क्य * सिद्धेत्युक्तम् * सिद्धभवनानां नियतपूर्वक्षणवर्त्तित्वेनासिद्धभवनोत्पादकत्वावगमात् व्यापारं च विनोत्पादकत्वायोगाद्भवनाख्यस्यानन्यनिष्ठत्वेनान्योत्पत्त्यननुकूलत्वादवश्यं सिद्धभवनप्रयोजकावयवव्यापारत्वात्तद्वृत्त्यसिद्धभवनप्रयोज्यावयवनिष्ठत्वाच्च तद्वृत्तिसर्वधात्वर्थानुरञ्जनसहत्वरूपं व्यापारसामान्यमभ्युपगन्तव्यम् । तच्च भाव्यनिष्ठभावकव्यापारत्वेन भाव्यभावकोभयसम्पर्काद्भावनेत्युच्यतइत्यर्थः । भवतिपराख्यातस्य भावनावाचित्वोपपादनेन तत्पर्यायजन्यादिपरस्य सिद्धमपि भावनावाचित्वं भूसत्तायामिति स्मृतेः सत्ताख्यद्वितीयभावविकारवाचित्वेन भवतेराद्यभावविकारवाचिजन्यादिपर्यायत्वं नास्तीति भ्रमप्रसङ्गात्तद्व्यावृत्त्यर्थं लोकप्रयोगानुसारात् भवतेराद्यभावविकारवाचित्वेन जन्यादिपर्यायत्वं सूच-

१ भवन्तमिति २ पु॰ पा॰ ।

यितुमतिदिशति * एतेनेति * आदिशब्देनोत्पद्यतिपराख्यातोपादानम् । ननु भवतेरुत्पत्त्याख्यप्रथमभावविकारवाचित्वेन निष्पन्ने वस्तुनि प्रयोगाद्भाव्यान्तरायोगे ऽपि आत्मनो[1] भाव्यत्वोपपत्तेर्भावनासम्भवे ऽपि अस्तेः सत्ताख्यद्वितीयभावविकारवाचित्वेन निष्पन्ने वस्तुनि प्रयोगादात्मनो भाव्यत्वानुपपत्तेः । स्वनिष्ठत्वेन च भाव्यान्तरायोगात्कथं तत्र भावनावाचित्वं स्यादित्याशङ्काय * अस्तिः पुनरिति * लभ्यमानसत्ताकत्वावस्थैवास्तेर्वाच्या न लब्धसत्ताकत्वावस्था तस्याविपरिणामादिभावविकारान्तरेष्वप्यनुवृत्तेर्द्वितीयभावविकारवाचित्वाभावापत्तेस्तस्यां चावस्थायामलब्धसत्ताकत्वाद्युक्तैवात्मनो भाव्यतेत्याशयसूचनाय * उपरितनीमित्युक्तम् * भवनानन्तरं भवितृत्वायोगात्कथं भाव्यतेत्याशङ्का * सत्तयेत्युक्तम् * सिद्धभवनस्य स्वद्रूपेणापि कथं भवितृतेत्याशङ्का करणाधिकरणयोश्चेत्याधिकरणे ल्युडुत्पत्तेः । भवनाश्रयवाचिना भवनशब्देन भवनविशिष्टत्वाभिधानादात्मना स्वरूपेण सिद्धभवनस्यापि सत्तारूपेण भवनकर्तृता * युक्तेत्युक्तम् * आत्मना भवनं यस्येति बहुव्रीहिणा वा भवनविशिष्टत्वाभिधानं करोतिकर्तव्यताकाङ्क्षाया धातूपात्तायाः सत्ताया एव करोतिकर्तव्यतांशपूरकत्वं वक्तुं सत्तयेत्यंवावर्त्तनीयम् । सत्तया भवदित्यनुपात्तभवनविशेषणत्वं सत्ताया न युक्तमित्याशङ्क्य भवनानन्तर्यात्सत्ताया एव भवनलक्षणार्थत्वसूचनायार्थलक्षणार्थो भवति प्रयुक्तः कथं भवतिवाच्यावस्थानन्तर्यमस्तिवाच्यायाः अवस्थाया इत्याशङ्कातिदेशसूचितं जन्यादिपर्यायत्वं विवृतम्। ननु घटाकारावस्थाविशेषोत्पत्तेरतदाकारावस्थान्तरोत्पत्तिसापेक्षत्वात्प्रयोज्यप्रयोजकव्यापारभेदकल्पना युक्ता सत्तायास्त्ववस्थान्तरानपेक्षत्वेन एवंविधभेदकल्पना न युक्तेत्याशङ्क्याह * तत्रापि त्विति * उत्पत्त्याख्याद्यभावविकारानन्तरभावित्वाद्द्वितीयभावविकाररूपायाः सत्तायास्तस्याश्चावस्थाकालभेदेन भेदात्तद्नुनिष्पादिसत्ताभेदस्यावश्यम्भावात्सिद्धसत्ताकाः पूर्वे ऽवयवाः प्रयोजकाः सत्ताभवनव्यावृताश्चासिद्धसत्ताका उत्तरे ऽवयवाः प्रयोज्याः । सिद्धसत्ताकासिद्धसत्ताकवर्त्तित्वसामान्यं भावनाख्यो व्यापार इति कल्पनानुसर्त्तव्येत्यर्थः । ननु वस्तुत्वसामान्यरूपायाः सत्तायाः स्वरूपेणैकत्वे ऽपि कालकृतो भेदो ऽनेनोक्त इति शङ्कनीयम्। तस्या धातुवाच्यत्वाभावान्निष्पन्ने वस्तुनि इदानीमस्तीति प्रयोगस्य कालसंसर्गविषयत्वेन वस्तुस्वरूपविषयत्वाभावात् पूर्वकाल-

---

१ भावनाभाव्यत्वेवि २ पु० पा० ।

सत्तासम्बन्धस्य चोत्तरकालसत्तासम्बन्धं प्रति हेतुत्वाभावेन प्रयोजकत्वव्यवस्थानुपयोगितया इह कालसंसर्गस्यावक्तव्यत्वात्कालकृतो भेदो येषां पूर्वोत्तरावयवानां तेषां या सत्ता या चोभयवर्त्तिनी सामान्यसत्ता तद्रूपेणेति विग्रहः । नन्वेवं सत्याग्नेयो ऽष्टाकपालो भवतीत्यादौ भवत्यर्थावच्छिन्नायाः पुरोडाशभावनाया विधेयत्वोपपत्तेः पुरुषव्यापारकल्पनानर्थिका स्यादित्याशङ्क्याह * सत्यामपि त्विति * निष्पन्नकर्तृविषयत्वोपपादनार्थं चेतनग्रहणम् । ननु भवत्याद्यर्थे ऽपि विधिदर्शनात्कथं तत्र विधिप्रतिषेधयोरसम्भव इत्याशङ्कते * स्यादेतदिति * स्वप्रयोजकसिद्धकर्तृव्यापारलक्षणार्थत्वेनात्र भवत्याद्यर्थस्य विधिविषयत्वं युक्तमिति परिहरति * सत्यामिति * भवतिनास्तिरप्युपलक्षितः नन्वृत्विक्त्वस्यासिद्धत्वेन तद्भवनस्य सिद्धपुरुषव्यापारलक्षणार्थतास्तु रथन्तरादेस्तु सिद्धत्वात्तद्भवनस्य विधिविषयत्वोपपत्तेः पुरुषव्यापारलक्षणार्थत्वं न सम्भवतीत्याशङ्क्याह * तथेति * भवतीति श्रुत्या भवनस्य विधिसम्बन्धे प्रतीयमाने ऽप्यचेतनव्यापारे विध्यसम्भवाद्विधेये भावना लक्षणेत्याशयः । ननु चेतनगतस्य तर्हि भवनस्य विधिविषयत्वं भविष्यतीत्याशङ्क्याह * यत्र त्विति * तिष्ठत्यर्थवाचित्वात्स्मृतावपि इह भवेदिति देशविशेषाश्रितसत्ताभिधानेन गतिनिवृत्त्याख्यातिष्ठत्यर्थवाचित्वसम्पत्तेरेवमुक्तमिहामुकः स्यादिति प्रयोगे ऽस्तेरपि तिष्ठत्यर्थवाचितैवमूहितव्या नन्वृत्विजा भवितव्यमित्यादावृत्विक्त्वादिभवितृव्यतिरिक्तभावयितृपुरुषव्यापाररूपभावनासद्भावे भवितृव्यापारस्य भावनाभ्युपगमो व्यर्थः स्यादित्याशङ्क्याह * तेनेति * विध्यादिशब्दोपात्ते च प्रैषादौ निषेधे च भवितृव्यापारव्यतिरिक्ताख्यातवाच्यभावनासद्भावे ऽपि भूताद्युपदेशेष्वभावान्न भवितृव्यापारस्य भावनात्वाभ्युपगमस्य वैयर्थ्यापत्तिरित्याशयः । ननु श्रुताद्युपदेशे ऽपि आत्मानमभावयद्भावयति भावयिष्यतीति वा व्यवहारादर्शनाद्व्यर्थो भवितृव्यापारस्य भावनात्वाभ्युपगमः स्यादित्याशङ्क्य *अपारमार्थिकमित्युक्तम * व्यवहाराननुपात्यापि भवितृव्यापारस्य भावनात्वमाख्यातार्थत्वाय तत्राभ्युपगतमित्याशयः । एतच्च सिद्धभवनानामवयवानां भावनाख्यो व्यापारो भवतिपदेन भवनं करोतीत्यभिधानादुच्यते ऽसिद्धभवनावयवव्यापारस्तु धातुमात्रेणोच्यतइत्यङ्गीकृत्य प्रयोज्यनिष्ठप्रयोजकव्यापाररूपभावनावाचित्वमाख्यातस्योक्तम् । यदा प्रतीत्यनुसारात्समस्तस्य भ्रमच्चक्रोपस्थानप्रभृतेर्घटाकारनिष्पत्तिपर्यन्तस्य व्यापारस्य

३५०।१

वाचको धातुरिष्यते तदा प्रयोज्यप्रयोजकव्यापारभेदाभावाद्धातु-मात्रोक्तव्यापारस्य च कर्त्तुरेकत्वेन प्रयोज्यप्रयोजकत्वभेदायोगादसि-द्धत्वेन च घटस्य प्रयोजकत्वायोगादवयवलक्षणायां च कारणा-भावात्प्रयोजकव्यापाररूपभावनानुपपत्तेर्भूताद्युपदेशे ऽपि कर्तृसंख्या-दिमात्रमाख्यातेनोच्यते न भावनेत्याह * भूतादीति * अस्तेर्लक्ष्य-मानसत्ताकत्वावस्थावाचित्वात्तस्याश्चोत्पत्तिवदतदाकारावस्थान्त-रानपेक्षत्वेनावयवशब्दाभिलप्यावस्थाभेदायोगे ऽप्युत्पत्त्यनन्तरकाल-त्वेनोत्पत्त्यवस्थाकालभेदेन भेदावश्यम्भावापत्तिसूचनार्थं कालग्रह-णम् । यथा प्रतीत्यनारूढत्वादवयवकालव्यतिरिक्तार्थान्तरकृतस्य भेद-स्यानाश्रयणं तथावयवकालकृतस्यापीत्यादिशब्देन सूचितम् । भेदाभावे-चैकस्यैव प्रयोज्यव्यापारता प्रयोजकव्यापारता च विरुद्धेत्यर्थः । एवं तर्हि व्यभिचारो दुर्वारः स्यादित्याशङ्क्याह * न चेति * यत्तु धातूनां भावनावाचित्वमुक्तं तदनुभाषणपूर्वकं दूषयति * यत्त्विति * धात्वश्रवणे ऽप्योदने पच्यमाने दृष्टे पक्तृव्यापाररूपभावना-प्रतीतेर्धातुश्रवणे ऽपि च मानसादपचाराद्धात्वर्थाप्रतीतावप्रतीतेः धात्वर्थाव्यभिचारद्वारा धातूनामव्यभिचारो न स्वत इत्यर्थः । धा-त्वर्थाव्यभिचारे च सति तत एव प्रतीत्युपपत्तेः । सत्यपि धात्वव्य-भिचारे तद्वाच्यत्वकल्पना न युक्तेत्याह * तैरेव त्विति * चशब्दार्थे ऽनुशब्दः यदि चाख्यातवत् स्वप्राधान्येन कृदन्तेषु भावनावगम्ये-त ततो धात्वर्थप्रतीतिनिरपेक्षभावनाप्रतीत्युपपत्तेर्वाच्यत्वं कल्प्येत धात्वर्थनिष्पादकत्वेन तु तद्गुणत्वप्रतीतेर्धात्वर्थप्रतीतिसापेक्षत्वा-न्न साक्षाद्वाच्यत्वकल्पना युक्तेत्याह * तथा हीति * देवदत्तेनेत्या-दिकारकविभक्तिश्रवणे यथाकारकसिद्ध्यर्थत्वेन तद्गुणतया ऽप्यव-गम्यमानाया भावनाया न कारकविभक्तिवाच्यत्वं कल्पितं तथा धा-त्वर्थसिद्ध्यर्थत्वेनाप्यवगम्यमानाया न धातुवाच्यत्वं कल्पनीयमिति दृष्टान्तार्थं कारकग्रहणम् । एतदेव कर्त्रधिकरणसिद्धदृष्टान्तपूर्वकं वि-वृणोति *यथैवेति* नन्वर्थादवगम्यमानाया भावनाया अशाब्दत्वा-त्करोतिसामानाधिकरण्यं पदान्तरोपात्तकारकान्वयश्च न स्यादि-त्याशङ्क्याह * गम्यमानेति * पक्तव्यमित्यादेर्भावनानपेक्षत्वे किं कर्त्तव्यमित्यादिप्रश्नानुरूप्यायोगादुरवायामोदनस्य काष्ठैर्देवदत्तेन पाक इत्यादौ च क्रियतइत्याद्याख्यातानपेक्षत्वे पाकभावनेत्यप्युक्ते ऽन्वयाप्रतीतेः । निष्पाद्यरूपभावनावगतिसापेक्षत्वादन्वयस्य भाव-नायां तात्पर्यावगतेरवाच्यत्वे ऽपि भावनायास्तात्पर्यवृत्त्या शाब्द-त्वाद्युक्तं सामानाधिकरण्यादीत्याशयः । गम्यमानाया अपि भावना-

यास्तद्वाचिनश्चाख्यातस्यापेक्षया तात्पर्यावगतिरिति तात्पर्यसूचनायापेक्षोक्ता गम्यमानस्यापि तात्पर्यवृत्त्या शाब्दत्वात्सामानाधिकरण्योपपत्तौ कर्त्रधिकरणसिद्धदृष्टान्ताभिधानं तथाभूतयेत्यपेक्ष्यमाणत्वेन तात्पर्यवृत्त्या शाब्दीभूतयेत्यर्थः भावनया कारकाणामन्वयायोगे ऽपि धात्वर्थेनैव गम्यमानभावनान्वयापादितसाध्यभावेनान्वयो भविष्यतीति प्रौढ्या परिहारान्तरमाह * अथ वेति * धात्वर्थस्य साध्यत्वसिद्ध्यर्थभावनायास्तन्निष्पादकत्वेनोपसर्जनतोक्ता। ननु धात्वर्थस्याक्रियारूपत्वात्कथं कारकान्वयो ऽत आह * स एव हीति * क्रियाया अपि निष्पन्नायाः कारकानपेक्षत्वात् साध्यत्वप्रयुक्तकारकापेक्षावगतेरक्रियारूपस्यापि च धात्वर्थस्य क्रियान्वयेन साध्यत्वापत्तेर्युक्तः कारकान्वय इत्याशयः। नन्वाख्यातश्रवणे तर्हि कथं भावनान्वयाभ्युपगमो ऽत आह * भावनापि चेति * गुणस्येव द्रव्यपरिच्छेदं विना कारकाणां धात्वर्थनिष्पादनं विना भावनान्वयायोगाद्धात्वर्थसिद्ध्यर्थत्वेनैव भावनया ग्रहणादाख्याताश्रवणे भावनान्वयाभावे ऽपि धात्वर्थान्वयो गौररुणेत्यत्र गुणस्य द्रव्यवदविरुद्ध इत्याशयः। कारकान्वयान्यथानुपपत्त्या कृदन्तानां भावनानभिधायित्वे ऽपि सर्वेषां भावनापरतोक्ता तद्विशेषाणां तु कृत्यानां प्रैषवाचित्वान्यथानुपपत्त्यापि भावनापरतावगम्यत इत्याह * कृत्यानां त्विति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * प्रैषाणां पुंव्यापारविषयत्वे ऽपि धात्वर्थस्यैव पुंव्यापारत्वोपपत्तेः किं भावनयेत्याशङ्क्य * तस्य चेत्युक्तम् * पुंसः को व्यापार इत्यपेक्षायां भावनेति वाच्यमित्यर्थः। एवमपि प्राधान्याप्रतीतेः साध्यसाधनेतिकर्तव्यतांशत्रयवशीकारासामर्थ्यात्कथमंशत्रयपरिपूर्णतेत्याशङ्क्यांशत्रयात्मिकेत्युक्तम्। अंशत्रयावच्छेदं विना ऽनुष्ठेयत्वाभावादेतादृश्या एवाक्षेपात्तद्बलेनैव प्राधान्यमपि कथं चिद्भविष्यतीत्याशयः। प्रैषाणां पुंव्यापारविषयत्वोपपादनपूर्वकम् श्लोकं व्याचष्टे * न हीति * प्रैषाणां भावनाविषयत्वोपपादनस्य प्रकृतभावनातात्पर्योपयोगितामाह * ते यदीति * ननु वैदिकानां कृत्यानां पुरुषाशयविशेषप्रैषवाचित्वायोगाद्विधौ चास्मृतेरनुष्ठापकत्वाभावात् कथं भावनापेक्षेत्याशङ्क्याह * यावांश्चेति * प्राप्तविषयत्वप्रवर्तकत्वसमुदायात्मकप्रैषवाचिनां कृत्यानां ब्राह्मणे प्राप्तविषयत्वाभावात् समुदायासम्भवे ऽपि प्रवर्तनात्मकत्वे तदेकदेशे ऽपि लक्षणया प्रयोगोपपत्तेरप्राप्तविषयप्रवर्तनस्य च विधित्वादस्मृतमपि विधायकत्वं सेत्स्यतीत्याशयः। मन्त्रगतेषु कृत्येषु प्राप्तविषयत्वोपपत्तेर्ब्राह्मण- ३५१।१

ग्रहणम्। ननु प्रणतं नीचं प्रत्येषणं स्वाभिमतसाधने प्रवर्त्तनार्थं गमनं प्रैषणमधिकं वोच्चं प्रत्येषणं अध्येषणम् गत्यर्थेष्यतिधात्वनुसारात्प्रसिद्धं तयोश्च मदभिमतसाधनमनेनानुष्ठेयमित्येवं विधोच्चनीचपुरुषाशयविशेषात्मकत्वेनापौरुषेये वेदे क्व चिदप्ययोगात् ब्राह्मणविशेषणं व्यर्थमित्याशङ्क्याह * अयमेव चेति * अग्नीदग्नीन्विहरेत्यादिमन्त्रेष्वध्येतॄणां प्रैषसमाख्यानात् भृत्यादिवच्चाग्नीधो ऽप्यग्नीत्कर्त्तृकपदार्थानुष्ठानार्थं वृतत्वेन पदार्थानुष्ठाने प्रणतत्वात्तं प्रति प्रवर्त्तनार्थगमनोपलक्षितस्य प्रवर्त्तनस्य प्रैषशब्दवाच्यत्वोपपत्तेर्नाव्यापकं पुरुषाशयत्वं प्रैषलक्षणान्तःपातीतिभावः। प्रेषणं प्रवर्त्तनं भावनायाः प्रत्ययार्थत्वमुपपादितमुपसंहरतिः * तस्मादिति * ननु भावनाया धात्वर्थाद्भेदे सत्युक्तेन न्यायेनास्तु प्रत्ययवाच्यत्वं न त्वसौ धात्वर्थाद्भिन्नास्तीति शङ्कते * ननु चेति * अयमाशयः प्रयोजकव्यापारत्वविशेषणेन प्रयोज्यव्यापाररूपाद्विक्लेदनादिधात्वर्थाद्भेदे सत्यप्यधिश्रयणादेः प्रयोजकव्यापाररूपाद्भेदो नोपलभ्यते स्थाल्यधिश्रयणोदकासेचनतण्डुलावापादिप्रयोजकव्यापारसमूहो हि विक्लेदनफलावधिः पचिनोच्यते कः पच्यर्थो येयं तण्डुलानां विक्लित्तिरिति तु महाभाष्यकारीयं विक्लित्त्यर्थत्वाभिधानं फलाभिप्रायं विक्लेदनाख्यप्रयोज्यव्यापारवाचित्वे देवदत्तः पचतीति सामानाधिकरण्यायोगापत्तेर्येनापि देवतोद्देशपूर्वकं द्रव्यत्यागाख्यसङ्कल्पः प्रयोजकव्यापार एवोच्यते अतो धात्वर्थादभिन्नत्वान्न प्रत्ययार्थो भावनेति। पचौ प्रतीयमानान्यधिश्रयणादीनि यजौ च प्रतीयमानः सङ्कल्पः प्रयोजकव्यापार इति कृत्वैवमादीनां भावनात्वमित्यर्थः। ननु स्थाल्यादीनां चुल्ल्यादिसंयोगस्याधिश्रयणादिशब्दवाच्यस्याव्यापारत्वान्न भावनात्वापत्तिरित्याशङ्क्य * अत एव चेत्युक्तम् * अधिश्रयणादीनां पचिवाच्यस्य पचावधिश्रयणादीनीत्यनेनैव सिद्धत्वात् प्रयोजकव्यापारत्वावधारणायैवकारः प्रयोजकव्यापाररूपा एवाधिश्रयणादयः पच्यादिधात्वर्था न संयोगरूपा इत्यर्थः * अयमाशयः * संयोगमात्रं वा ऽधिश्रयणशब्दवाच्यं स्यात् स्थालीचुल्लीसंयोगो वा। तत्राद्ये कल्पे सर्वधातूनां पर्यायत्वम्। द्वितीये स्थालीचुल्ल्योरप्यभिधानापत्तेर्गौरवं दोषः। संयोगवाचित्वे चाधिश्रयतेरुदासीने ऽपि पक्तरि संयोगसद्भावो ऽधिश्रयणे वर्त्तत इति प्रत्ययापत्तिः। क्रियमाणसंयोगवाचित्वे वा प्रत्ययवाच्यायाः प्रक्रियायाः प्रागप्रतीतेर्विशेषणत्वायोगाद्धातुनैव क्रियाविशिष्टसंयोगाभिधानापत्तेर्दुर्वारं प्रयोजकक्रियाधातुवाच्यत्वम् अनेनैव न्यायेन गम्यादेः सं-

योगविभागवाचित्वं निरसनीयम् । संयोगविभागविशेषलाभाय च संयोगिनोर्विभागिनोश्चाभिधानापत्तेरतिगौरवं यज्यादेश्च संयोगविभागवाचित्वायोगात् संयोगविभागात्मकधात्वर्थवचनमव्यापकं स्यात्तत्ववियोगात्मकस्वस्वामिविभागयज्यर्थाभ्युपगमे ऽपि जानात्यादौ कथं चित्संयोगविभागानिरूपणादव्याप्त्यपरिहारः भवति करोत्योः शक्तिभेदात्तु विक्लिदिपचत्योरिव नियतं प्रयोज्यप्रयोजकव्यापारवचनत्वमिति वार्त्तिकाद्व्यापारस्यैव धात्वर्थतावसीयते धातुमात्रनिर्देशाच्च न प्रत्ययविषयतयातद्वार्त्तिकं व्याख्यातुं शक्यम् प्रत्ययस्य च णयन्तत्वाभावात्प्रयोज्यकर्तृकैकान्तव्यापारप्रतिपादकाः ण्यन्ता एवेति न युज्येत संयोगविभागात्मकत्वे च धात्वर्थस्याव्यापाररूपत्वाद् गोदोहनादिभिराश्रयत्वेन ग्रहणं न युज्यते धात्वर्थावच्छिन्नाया भावनाया एवाश्रयत्वाभ्युपगमे गुणफलसम्बन्धविधौ वाक्यभेदभयेन प्रकृताश्रयापेक्षणाद्भावनाभेदमुपपत्तेर्गुणकामेष्वाश्रयैः सह सामानासामानविध्यविचारः संस्थाधिकरणे करिष्यमाणो न युज्यते व्यापाररूपत्वे ऽपि करोत्यर्थक्रियारूपत्वाभावाक्रियारूपायां भावनायां कारकत्वाविरोधः ।

व्यापाररूपधात्वर्थादतो भेदमपश्यताम् ॥
संयोगरूपधात्वर्थवर्णनं भेदतृष्णया ॥ १ ॥
व्यापाररूपधात्वर्थात् सान्या स्पन्दात्मिका हि किम् ॥
प्रयत्नात्मा द्विरूपा वा सर्वथापि न युज्यते ॥ २ ॥
प्रयत्नो भावना चेत् स्यान्न रथो गच्छतीति हि ॥
प्रयोगः स्यात्प्रयत्नो हि चेतनेष्वेव सम्भवेत् ॥ ३ ॥
स्पन्दस्य भावनात्वे तु यजेतेति न चेतने ॥
द्विःसाधारणरूपत्वे शब्दो वक्तीत्यसम्भवः ॥ ४ ॥
न शब्दे स्पन्दयत्नौ हि विभुत्वाच्चेतनत्वतः ॥
एवं चैं सतिधात्वर्थसामान्यं भावना पतेत् ॥ ५ ॥
अथानयोर्हेतुभूतमन्यत्तन्नोपलभ्यते ॥
अभूतोत्पादनं चान्यद्धात्वर्थान्नैव दृश्यते ॥ ६ ॥
अन्योत्पादानुकूलत्वे भावनैकं च तद्यदा ॥
तदा न भावनाभेदो भवेद्धात्वर्थभेदतः ॥ ७ ॥
प्रतिधात्वर्थमन्यत्वं न च तस्यावधार्यते ॥
धात्वर्थभेदमात्रेण फलभेदप्रसिद्धितः ॥ ८ ॥
अथ धर्मेण येन स्याद्धात्वर्थः फलसाधनम् ॥
स धर्मो भावनान्यश्च प्रतिधात्वर्थमिष्यते ॥ ९ ॥

तस्य धात्वर्थधर्मत्वे पुम्धर्मत्वं विरुध्यते ॥
पुम्धर्मस्तु प्रयत्नः स्यात् स च पूर्वं निराकृतः ॥ १० ॥
किं च धात्वर्थनिर्वृत्तिपर्यन्तत्वात् सभावना ॥
कथं धात्वर्थसाध्या हि सेष्यते फलसाधनम् ॥ ११ ॥
अथ धात्वर्थजन्यो ऽपि शक्त्यात्मा पुरुषाश्रितः ॥
प्रतिधात्वर्थमन्यो ऽसौ नापूर्वादतिरिच्यते ॥ १२ ॥
तस्याव्यापाररूपत्वाद्भावनात्वं न चेष्यते ॥
व्यापारत्वे ऽपि करणव्यापारत्वान्न भावना ॥ १३ ॥
तत्कर्तृव्यापृतिः सा हि प्रत्ययार्थश्च नत्वदः ॥

अतो धात्वर्थातिरिक्तभावनानुपपत्तेः प्रत्ययार्थता न युक्तेति तात्पर्यार्थः । परिहरति * नैष इति * व्यापारत्वाविशेषाद्धात्वर्थभावनयोर्भेदानवभासे ऽपि पाकं करोति यागं करोतीति भिन्नेषु धात्वर्थेषु करोत्यर्थानुवृत्तेर्धात्वर्थाद्भेदो ऽध्यवसीयतइत्यर्थः । श्लोकं व्याचष्टे * सर्वत्र हीति * सर्वधात्वर्थसाधारणस्य व्यापाररूपस्य करोत्यर्थस्याख्यातपदांशप्रत्ययवेलायां प्रतीतिसूचनायांशशब्दः विक्लेदनोद्देशेन क्रियमाणस्याधिश्रयणादेः पचिवाच्यत्वं वक्तुं विक्लित्तिग्रहणे समासस्थायाः षष्ठ्याः सम्बन्धमात्रोत्पन्नाया अपि तादर्थ्यलक्षणसम्बन्धविशेषनिष्ठत्वाद्विक्लित्त्यर्था अधिश्रयणादय इति समासार्थः । आदिशब्दोपात्तस्य वा विक्लिदेर्विक्लित्तिर्वाच्या धात्वर्थानां नियतकर्तृस्थभावनातो वैलक्षण्यं वक्तुं केषां चित्कर्मस्थत्वप्रदर्शनायोक्ता को ऽसावधिश्रयणादिकर्तृस्थव्यापारातिरिक्तसामान्यरूपो व्यापार इत्यपेक्षायामाह * तत्रेति * औदासीन्यमकुर्वत् रूपत्वावस्था ततः प्रच्युतिः कुर्वद्रूपत्वं करोतिप्रत्ययवेद्यमन्योत्पादानुकूलत्वं तेन रूपेण यन्निरूप्यते सा भावना इत्यर्थः । संयोगविभागादिहेतोः स्पन्दादेर्धात्वर्थाद्वैलक्षण्यप्रदर्शनार्थो मात्रशब्दः अकर्मकधातुवाच्यध्वननादिधात्वर्थानन्तरं नियमेनान्योत्पादादर्शनात्सकर्मकधातुवाच्येभ्यश्च गमनादिभ्यो ऽनन्तरमेव संयोगविभागाद्युत्पत्तेरुत्पाद्यानाकाङ्क्षणाद्भाव्याकाङ्क्षालक्षणभाव्यनिष्ठत्वापरपर्यायान्योत्पादानुकूलत्वरहिताद्धात्वर्थादकुर्वद्रूपत्वलक्षणौदासीन्यप्रच्युत्यात्मकत्वेनान्योत्पादनरूपत्वादनन्तरं च फलानुत्पत्तेर्भाव्यनिष्ठत्वापरपर्यायान्योत्पादाकाङ्क्षालक्षणान्योत्पादानुकूलत्वात् भावनाया वैलक्षण्यमित्याशयः । ततश्च यथा प्रयोज्यापरपर्यायकर्मस्थस्य विक्लेदनादेर्व्यापारत्वे सत्यपि प्रयोजकापरपर्यायकर्तृव्यापारत्वाभावात् न भावनात्वं तथाधिश्रयणादेः प्रयोजकव्यापारत्वे सत्यपि

भाव्यनिष्ठत्वाभावान्न भावनात्वमित्याशङ्कापरिहारः सूचितो भवति नन्वधिश्रयणादेः परिस्पन्दात्मकात्प्रयोजकव्यापारादन्यो भाव्यनिष्ठः प्रयोजकव्यापारश्चेदस्ति किमिति तद्व्यतिरेकेण नोपलभ्यतइत्याशङ्क्य *परिस्पन्दरूपमित्युक्तम्* भावनाया धात्वर्थेन विषयभूतेन ज्ञानस्येव ज्ञेयेन निरूपिताया अवच्छिन्नायाः कार्यभूतेन वा धात्वर्थेन करणतया निरूपितायाः कल्पितायाः निरूप्यत्वाद्धात्वर्थं विनानुपलब्धिर्युक्तेति भावः । भावनावच्छेदकधात्वर्थमात्रोपलक्षणार्थः परिस्पन्दशब्दः रूपशब्दस्य करणव्युत्पत्तौ परिस्पन्दो रूपमस्येति विग्रहः। कर्मव्युत्पत्तौ वा परिस्पन्देन निरूप्यमाणमिति विग्रहः। स्वशरीरस्य स्पन्दस्य ह्यात्मप्रयत्नहेतुकत्वव्याप्तेः। परशरीरे स्पन्ददर्शनात्प्रयत्नो ऽनुमीयते स्वप्रयत्नश्च मानसप्रत्यक्षवेद्यो ऽपि गमने ऽहम्प्रयते पाके ऽहम्प्रयते इति गमनादिना स्पन्देन यागे ऽहम्प्रयते ध्याने ऽहम्प्रयतइति वा चलनात्मकेन यागादिना धात्वर्थेनावच्छिन्न एव च भाव्यनिष्ठप्रयोजकव्यापारत्वात्मकभावनालक्षणयोगादर्थिपुरुषव्यापारत्वाच्चार्थयतइति कर्तृव्युत्पत्तिद्वारा ऽर्थयितृपुरुषव्यापारवाच्यर्थभावनाशब्दव्याच्यः सर्वेषु लङाद्याख्यातेषु गम्यते । यत्त्वस्मिन्पक्षे रथो गच्छतीत्यचेतने नाख्यातं प्रयुज्यते इत्युक्तं । तत्रैवं वाच्यं किमाख्यातप्रयोगान्यथानुपपत्त्या रथादौ भावना कल्प्यते। प्रतीतिबलाद्वाभ्युपगम्यते न तावत् स्पन्दातिरिक्ता भावना प्रत्यक्षेण प्रतीयते नापि कादाचित्कत्वं स्पन्दाख्यकार्यदर्शनात्कल्प्यते इति रथवोढ्रश्वादिप्रयत्नात् स्पन्दमानाश्वादिशरीरसंयोगात्तदभावे ऽपि वा पतनप्रतिबन्धकाधारसंयोगाभावसहकृताद् गुरुत्वाद्रथस्पन्दोपपत्तेः वायुसंयोगादिसद्भावभावितया च दृष्टस्य पर्णादिपतनस्य न कारणत्वकल्पना युक्ता वायोस्तु स्वाभाविकस्पन्दो न शक्नोत्येव स्वकारणत्वेन व्यापारान्तरं कल्पयितुं स्पन्दस्य च वायुरथादेः स्पन्दनं चलनं गमनं वर्त्ततइति आख्याताश्रवणे ऽपि धातुमात्रात्प्रतीतेराख्यातार्थत्वं भाव्यनिष्ठत्वाभावाच्च भावनात्वं नाभ्युपगन्तुं युक्तं स्पन्दतिचलत्योश्चाकर्मकत्वात्तद्वाच्यस्य स्पन्दस्य भाव्यनिष्ठत्वमनाशङ्क्यमेव ततश्च वायुरथादौ स्पन्दस्य भावनात्वायोगात्तदतिरिक्तव्यापारानुपलब्धेश्च प्रयत्नात्मकभावनानभ्युपगमे आख्यातस्य भावनाव्यभिचारो दुष्परिहरः स्पन्दस्य भावनात्वाभ्युपगमे ऽपि स्पन्दत्यादिधातुनैव तदभिधानसिद्धेस्तत्परस्याख्यातस्य व्यभिचारस्तद्वस्थ एव स्पन्दत्यादिपराख्यातवच्च पचत्यादिपराख्यातस्यापि स्पन्दवाचित्वं न युक्तं न हि पचतीत्यस्य पाके स्पन्दतइत्यर्थं के

चिद्व्याचक्षते तथा यज्याद्यर्थश्चातो ऽवगम्यते भावयेदिति चेत्युक्ते कीदृशी पुनराख्याताद्भावनावगम्यते इत्यपेक्षायां तथा यतेत यथा किंचिद्भवतीति प्रयत्नवाचिताख्यातस्य भाष्यकृता विवृता दर्शेन्द्रियकामाधिकरणे च जुहुयादिति शब्दस्यैतत्सामर्थ्यं यद्धोमविशिष्टं प्रयत्नमाहेत्यभिधानात् जुहुयादित्यस्य होमे यतेतेत्यर्थः सूचितो भवति। प्रयत्नस्य चेच्छायोनित्वान्निष्फले चेच्छायोगाद्भाव्यनिष्ठत्वायतेर्धात्वर्थनिष्पत्तिमात्रेण च फलवत्त्वासिद्धेस्तन्निष्पत्तिमात्रेण पर्यवसानायोगेन धात्वर्थकरणकस्य प्रयत्नस्य फलसाधनत्वाविघातात्प्रयत्नस्य भावनात्वे न कश्चिद्दोषः। प्रयत्नाभावे च वातरोगादिना देवदत्ते स्पन्दमाने नायं स्पन्दं करोति किं तु वातादिवशादस्य स्पन्दो भवतीति व्यवहारदर्शनात्प्रयत्न एव करोत्यर्थो ऽवगम्यते रथादावपि न रथः स्वयं गमनं करोति किं त्वश्वादिनास्य गमनं क्रियते इति व्यवहारदर्शनाद्धातुवाच्यस्पन्दातिरिक्तकरोत्यर्थभावनाप्रतीत्यभावः सिद्धः । आख्यातप्रयोगान्यथानुपपत्त्या तु रथादौ भावनाकल्पने रथो भवतीत्यत्रापि सर्वदा भावनाकल्पनापत्तेः भूतादिकथने ऽप्यवयवादिकृतभेदानाश्रयणे धात्वर्थमात्रं कर्तृसंख्यादयश्चाख्यातपदार्थत्वेनावधार्यन्ते न भावना न च भावनाव्यभिचारेण दोष इति वार्त्तिकं विरुध्यते अवयवादिकृतभेदाविवक्षायामस्त्यादौ भावनाभ्युपगमः पूर्वोत्तरवार्त्तिकपर्यालोचयया प्रौढिमात्रेणेत्युक्तम् अथ वा सो ऽपि प्रयत्नाभिप्रायेण व्याख्यातुं शक्यते नित्यस्यात्मनः शरीरशरीरिणोरभेदविवक्षया शरीरानिष्पत्तावनिष्पत्तिव्यपदेशोपपत्तेः पञ्चधातून् स्वयं षष्ठ आदत्ते युगपत्प्रभुरित्यादिस्मृतिपर्यालोचनया चात्मनः शरीरोत्पादनप्रयत्नावगमात् सिद्धभवनशरीरावयवाधिष्ठानेनात्मनासिद्धभवनान् शरीरावयवान्प्रति प्रयोजकस्य प्रयत्नात्मिका भावना न विरुध्यते। एवं च सिद्धकर्तृक्रियावाचिनीत्यपि चेतनाभिप्रायं व्याख्यातुं शक्यम् । यद्वा अर्थभावनायाश्चेतनमात्राश्रयत्वे ऽपि शब्दभावनायाश्चेतनाश्रयत्वायोगादुभयव्याप्त्यर्थं सिद्धमात्रग्रहणं नित्यस्यापि शब्दस्याभिव्यक्तिः सिद्धिरभिप्रेता भाव्यनिष्ठप्रयोजकव्यापारत्वलक्षणयोगाच्च शब्दव्यापारस्याप्यविरुद्धं भावनात्वं। यथैव हि इच्छायोनिप्रयत्नस्येच्छामात्रसाध्यं विनाफललाभायोगाद्भाव्यनिष्ठत्वं तथा लिङादिव्यापारस्यापि प्रेरणाख्यस्य प्रवृत्त्याख्यभाव्यकल्पत्वेन तन्निष्ठतावसीयते ।न च यथा स्पन्दानन्तरमेव संयोगविभागोत्पत्तेराकाङ्क्षातः प्रागेवाकाङ्क्षणीयलाभे लब्धव्यालाभनिमित्ताकाङ्क्षानुपपत्तेरन्यथा च कदाचिन्नैराकाङ्क्ष्यानु-

पपत्तिप्रसङ्गात् स्पन्दस्य भाव्याकाङ्क्षालक्षणं भाव्यनिष्ठत्वं नास्ति तथा प्रेषणाया भाव्यनिष्ठत्वाभावः पुरुषप्रवृत्तेः साध्यसाधनेतिकर्त्तव्यतापर्यालोचना सापेक्षत्वेन प्रेरणानन्तरमनुत्पत्तेः अनेनैव न्यायेन सर्वशब्दगतस्याभिधानलक्षणस्यापि व्यापारस्यार्थप्रतिपत्त्याख्य भाव्यकल्पितस्य भावनात्वमनुसन्धेयं तस्या अनभिहिताया एव कार्योपयोगित्वाल्लिङादियुक्तेषु वाक्येषु द्वे भावने प्रतीयेते इत्यादौ भावनाद्वयोपन्यासाविरोधः ॥

स्पन्दप्रयत्नयोरेव भावनात्वमिति भ्रमम् ।
अपनेतुं प्रसक्तानुप्रसक्त्यैतदुदीरितम् ॥
प्रयत्नव्यतिरिक्तार्थभावना तु न शक्यते ।
वक्तुमाख्यातवाच्येह प्रस्तुतेत्युपरम्यते ॥ २ ॥
स्त्रीत्वाभावे ऽपि खट्वादौ टाबादिप्रत्ययो यथा ।
प्रयुज्यते तथाख्यातं यत्नाभावे ऽप्यचेतने ॥
स्त्रीत्वादेः प्रत्ययार्थत्वं चतुर्थे वक्ष्यते स्फुटम् ।
तथा च लिङ्गमित्यत्र प्रयत्नस्य तथा भवेत् ॥
धातोरनुग्रहार्थं वा वाच्यन्तरभिधेयेथ वा ।
प्रत्ययो ऽवश्यवक्तव्यस्तावता न त्ववाच्यता ॥
वोढृश्वादिगतं यत्नं रथादावुपचर्य वा ।
उपपाद्यः प्रयोगो ऽत्र मुख्यार्थानुपपत्तितः ॥
तिङ्वाच्यो हि करोत्यर्थः सामानाधिकरण्यतः ।
प्रयत्नश्च करोत्यर्थस्तदन्यानुपलम्भनात् ॥
न चौलूक्यैः प्रयत्नस्य गुणत्वपरिभाषणात् ।
अकरोत्यर्थता शङ्क्या सिद्धरूपा प्रतीतितः ॥
बुद्धीच्छाद्वेषयत्नानां शब्दज्ञैः कर्मतेष्यते ।
इत्याचार्यैश्च यत्नस्य व्यापारत्वाभिधानतः ॥
चेतनप्रेरकत्वं च विधेस्तद्विषयत्वतः ।
काष्ठाद्यप्यन्यथाकस्मान्न प्रेरयति वायुवत् ॥
विध्यर्थाज्ञानतो प्रेर्यं चेत्काष्ठादि ततः कथम् ।
सौधन्वननिषादादेरप्रेर्यस्याधिकारिताम् ॥
विधिस्त्वाप्रेरयत्यत्रेत्यप्रेर्यो ज्ञाप्यते कथम् ।
विद्वद्भिर्ज्ञापनादेव प्रेर्यत्वे ऽन्योन्यसंश्रयम् ॥
धात्वर्थव्यतिरिक्तातः प्रयत्नाख्यार्थभावना ।
यजत्यादिपदाख्यातवाच्यतेत्यसङ्कुलम् ॥

ननु धात्वर्थभावनयोर्द्वयोर्व्यापाररूपत्वे समत्वेनान्योन्य-

समन्वयो न स्यादित्याशङ्क्याह * ये त्विति * व्यापारत्वसाम्ये ऽपि भावनाया एव भाव्यनिष्ठत्वेन करोत्यर्थरूपक्रियात्वाद्धात्वर्थस्य च भाव्यनिष्ठत्वाभावेन क्रियारूपत्वाद्यथायोग्यं सन्निकर्षविप्रकर्षापेक्षया करणत्वेनेतिकर्त्तव्यतात्वेन वा भावनान्वयः सम्भवतीत्याशयः। यथा कर्मगतस्य विक्लेदनादेः प्रयोज्यव्यापारस्य विक्लिद्यतस्तण्डुलान् पचतीत्यादिप्रयोगदर्शनात् व्यापारत्वसाम्ये ऽपि भावनान्वयो न विरुध्यते तथा कर्तृगतस्य पाकादेः प्रयोजकव्यापारत्वसाम्ये ऽपीत्यर्थः। एवं च तर्हि यस्य कस्य चिद्धात्वर्थस्य यया कया चिद्भावनयान्वयः कस्मान्न स्यादित्याशङ्कानिरासायानुरञ्जकत्वविशेषणम्। ननु धात्वर्थविशेषाणां भावनानुरञ्जकत्वाभ्युपगमे गौः शाबलेय इतिवत् सामान्यविशेषयोरैकवस्तुत्वापत्तेः क्रियाकरणविभागो न स्यात् इत्याशङ्कते * एवं तर्हीति * भावनायाः प्रयत्नात्मकत्वात् धात्वर्थस्य च स्पन्दात्मकत्वादेकवस्त्वात्मकत्वाभावे ऽपि भावनाया भाव्यनिष्ठत्वाद्धात्वर्थे च विना भाव्यासिद्धेः स्वरूपेण धात्वर्थसाधनत्वे ऽपि भाव्यावच्छिन्नरूपेण धात्वर्थविशेषसाध्यत्वात् सामान्यरूपतोपपन्नेति परिहरति *सत्यमिति * एतदेव प्रश्नपूर्वकमुपपादयति * कथमिति * अयमाशयः द्वैधीभावाद्युद्देशप्रवृत्तोद्यमनादिकर्तृव्यापारव्याप्यस्य परश्वादेः करणत्वदर्शनात् भाव्योद्देशप्रवृत्तभावनाव्याप्यत्वेनाख्याते धात्वर्थः करणतयावसीयते णिजन्ताद्धि भवतेरचो यदिति कर्मणि कृत्प्रत्यये कृते भाव्यशब्दव्युत्पत्तेरीप्सिततमस्य च कर्मत्वाद्भावयितुमिष्टतमं यदुद्दिश्य भावना प्रवर्त्तते तद्भाव्यं ततश्च यथा गामानयायं दण्ड इत्युक्ते तृतीयां विनापि दण्डस्यान्यथान्वयायोगात्करणत्वं प्रतीयते तथा किञ्चिदीप्सितं भाव्यं भावयतीत्युक्ते भाव्यान्तरोद्देशेन प्रवृत्तया भावनया धात्वर्थस्य भाव्यत्वेनान्वयायोगात्करणत्वं प्रतीयते तस्माद्यागादौ साध्यात्मकभावनासामान्याविरुद्धकरणात्मकधात्वर्थसामान्यसद्भावात् भावनासामान्यं न समवेतमिति करणान्वयस्य भावनासामान्याविरोधप्रदर्शनायोत्तरार्द्धम्। ननु निर्विशेषभावनासामान्यायोगाद् बलाद्धात्वर्थेषु विशेषेषु समवायापत्तिरित्याशङ्क्याह * भावनाया हीति * ज्ञेयैक्ये ऽपि ज्ञानस्येव धात्वर्थैक्ये ऽपीषत्प्रयते ऽहमतिशयेन प्रयते ऽहमिति सातिशयानतिशयादिभेदेन प्रयत्नरूपभावनाभेदावगतेरनौपाधिकभेदद्योतनायैवकारः भावना चेन्न धात्वर्थसामान्यं किं तदित्यपेक्षायामाह * तथेति * यथा यद्भावनासामान्यं तद्धात्वर्थेन समवैति तथा यद्धात्वर्थसमवेतं तद्भावनासा-

मान्यं न भवतीति सूचनार्थस्तथाशब्दः कथं यागादेर्भावनाकरणतेत्याशङ्क्य भावनायाः केनेति करणांशेनापेक्षाहेतुत्वेनोक्ता धात्वर्थभावनयोर्भेदस्य सूत्रकृत्सूचितत्वं द्योतयितुं यद्भावार्थाः कर्मशब्दा इत्यनेन कर्मशब्देनाभिधीयतइत्युक्तम्। नन्वेवं सति कृभ्वस्तयः क्रियासान्यवचनाः क्रियाविशेषवचनाः पचत्यादय इत्यादियागादिधात्वर्थानां क्रियाख्यभावनाविशेषस्मरणं न युज्यते इत्याशङ्क्याह * विशेषणेति * भुवो णिजन्तस्य क्रियासामान्यवचनताभिप्रेता ३५२।१ अस्तेरप्यार्द्धधातुके णिचि कृते ऽस्तेर्भूरिति भ्वादेशस्मृतेर्भावनाख्यक्रियासामान्यवाचित्वोपपत्तिः। ननु क्रियाशब्दो यथा तद्भूतानां क्रियार्थेन समाम्नायः। आम्नायस्य क्रियार्थत्वात्तेभ्यः क्रिया प्रतीयते क्रियायां पुरुषश्रुतिः। प्रतिषेधेषु कर्मत्वात् क्रिया स्यात् क्रिया स्याद्धर्ममात्राणामित्यत्र भावनायां प्रयुज्यते तथा आकृतिस्तु क्रियार्थत्वात् क्रियाणामाश्रितत्वात्क्रियाया ह्यस्तिसम्बन्धः क्रियातो व्यपदिश्येरन् तस्य क्रियाग्रहणार्थोक्तं क्रियाभिधानमित्यत्र धात्वर्थे ऽपि तथा तुल्यत्वात्क्रिययोर्न क्रियार्थानां संस्कारे तु क्रियान्तरमित्यत्रोभयोः कर्मशब्दश्च यथा फलस्य कर्मनिष्पत्तेः भावार्थाः कर्मशब्दास्तद्भेदात्कर्मणो ऽभ्यासः संख्यायाः कर्मभेदः स्यात् फलश्रुतेस्तु कर्म स्यात् फलस्य कर्मयोगित्वात् समेषु कर्मयुक्तं स्यात्संस्कारश्चाप्रकरणे कर्मशब्दत्वात्कर्मणः श्रुतिमूलत्वात् एतेषां कर्मसम्बन्धात्केवले कर्मशेषः स्यात्कर्माण्यपि जैमिनिः कर्तृगुणेषु कर्मसमवायात् अचोदितं कर्म भेदात् कर्मणो चोदितत्वात् कर्मणो व्यवस्था स्यात् द्रव्याणां कर्मसंयोगे कर्मतो ह्यभिसम्बन्धः तस्मात्कर्मोपदेशः स्यात् । अपि तु कर्मशब्दः स्यात् ॥ कर्मणः पृष्ठशब्दः स्याद्धविर्भेदात्कर्मणो ऽभ्यास इत्यत्र धात्वर्थेषु प्रयुज्यते तथा कर्मैके तत्र दर्शनादित्यत्र तच्छब्दपरामृष्टः कर्मविषयः कर्मशब्दः कर्मणः सम्बन्धात् शब्दान्तरे कर्मभेदस्तदुत्सर्गे कर्माणीत्यत्र भावनायामपि एकस्यैवमित्यत्र चैवं शब्देनानुकृष्टः कर्मशब्दः फलं वा कर्मणामविभागात्तु कर्मणः कर्मधर्मः प्रकरणादित्यत्र चोभयोस्तेनैव व्यतिकरदर्शनाद्धात्वर्थभावनयोरभेदो ऽध्यवसीयते इत्याशङ्क्याह * शास्त्रेति * भावनावाचिनः क्रियाशब्दस्य धात्वर्थवाचिनश्च कर्मशब्दस्य लक्षणयेतरत्र प्रयोगोपपत्तिरित्याशयः । भावनाधात्वर्थस्वरूपवाचिनामपदाभावाच्च लाक्षणिको ऽपि प्रयोगो न दोषायेति न स्वरूपाभिधानेनेत्यनेन सूचितम्। एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्याचष्टे * भावनाशब्दो हीति * एकास्मिन् क्षणे भावनायाः समस्तो-

पसंहृतरूपाप्रतीतेः । कथं निष्पन्नरूपतेत्याशङ्क्य वस्तुतो निष्पन्नरूपत्वे ऽपि नामपदसामर्थ्यात् सत्त्वस्य द्रव्यस्य यदेकत्रोपसंहृतत्वं रूपं तदापन्नामारोपितासिद्धरूपामित्युक्तं कथं नामपदसामर्थ्याद् द्रव्यरूपत्वारोप इत्याशङ्क्य नामपदोक्तो लिङ्गादियोगः कारणत्वेनोक्तः द्रव्यधर्मलिङ्गादियोगात् भास्वरत्वादिनेव शुक्तौ रजतत्वारोपो युक्त इत्याशयः । न केवलं नामपदेनाख्यातसदृशी भावना नोच्यते किं तु करोत्यादिधातुनापी त्याह * तथेति * अनन्यशब्दवाच्यत्वोपपादनस्यासाधारण्येनाख्यातस्य भावनार्थत्वसिद्धिप्रयोजनत्वं सूचयितुम् उपसंहरति * इतीति* नन्वाख्यातप्रत्ययस्य भावनार्थत्वे ऽपि स्वर्गस्य द्वितीयाभावेन भाव्यत्वाप्रतीतेः स्वर्गकामपदरूपसम्बन्धात् स्वर्गं भावयेदिति ब्रूयुरिति भाष्यमयुक्तमित्याशङ्क्य स्वर्गस्य भाव्यांशनिवेशमुपपादयितुमुपक्रमते * सा त्विति * साध्यत्वान्वयात् प्रागंशान्तरान्वये भावनास्वरूपस्य सङ्कल्पाख्येच्छाविशेषसाध्यत्वेन यागादेस्तत्साधनत्वायोगात्तत्सिद्ध्यर्थं साध्यनिष्ठत्वाभावे भावनात्वस्यैव बाधापत्तेः साध्यांशस्य प्राधान्यात् साधनेतिकर्त्तव्यतांशवच्चापेक्षान्तराधीनत्वाभावात्प्राथम्यमुक्तम् । नन्वेकप्रत्ययोपादानात् भावनामात्रस्य विधेयत्वावगतेः साध्याद्यन्वयः प्रतीतो ऽपि विध्यसंस्पर्शादविवक्षितः स्यादित्याशङ्क्याह * तत्रेति * उपसर्गे घोः किरिति विपूर्वस्य दधातेः किप्रत्यये कृते विधिशब्दव्युत्पत्तेः कृदन्तत्वाद्भावप्रत्ययेन विधिसम्बन्धाभिधानम् । नन्वेवमप्येकपदोपादानेन प्रत्यासत्तेर्धात्वर्थस्यैव भाव्यत्वं कस्मान्न भवतीत्याशङ्क्याह * विधिस्त्विति * कमियोगादपि स्वर्गस्य साध्यत्वावगतिर्न च पुरुषार्थ इत्यनेनोक्ता ।

यस्य येनार्थसम्बन्धो दूरस्थस्यापि तेन सः ।
अर्थतो ह्यसमर्थानामानन्तर्यमकारणम् ॥

इति श्लोको ऽपि चाम्नानसामर्थ्याच्चोदनार्थेन गम्येतार्थानाम् ह्यर्थवत्त्वेन वचनानि प्रतीयन्ते ऽर्थतो ह्यसमर्थानामानन्तर्ये ऽप्यसम्बन्धः तस्माच्छ्रुत्येकदेशः स इति विश्वजिदधिकरणसिद्धान्तसूत्रगतस्यार्थानां ह्यर्थवत्वेनेत्पाद्यवयवस्य योग्यतानुरोधेन व्यवहितान्वयप्रतिपादनपरतया व्याख्यानात्तत्रैव पूर्वाचार्यैर्वक्ष्यतइत्यौचित्यालोचनया प्रतिभाति पदश्रुत्या धात्वर्थस्य साध्यत्वावगमे ऽप्येकाभिधानश्रुत्या पुरुषार्थसाध्यत्वावगमाद् बाध इति सकलस्य तात्पर्यं, यद्वा विरोध एव नास्तीत्याह * किं चेति * श्लोकं व्याचष्टे * सम्ब-
२३५।४ न्धेति * एवं भावनाया भाव्यापेक्षायां धात्वर्थस्य भाव्यत्वसम्भवे

ऽपि विध्यन्वयबलात् पुरुषार्थस्य भाव्यतोक्ता अधुना इच्छायोनित्वेन भावनायाः समीहितभाव्यनिष्ठत्वावधारणात् भावनास्वरूपालोचनयैव पुरुषार्थस्य भाव्यतामाह * किं चेति * श्लोकं व्याचष्टे * यत्र हीति * ननु भावनास्वरूपालोचनयैव समीहितसाध्यत्वावगमे स्वर्गकामादिपदं व्यर्थं स्यादित्याशङ्क्याह * तत्रेति * नन्वेवमपि स्वर्गादिपुरुषार्थविशेषलाभस्य शास्त्राधीनत्वात् सर्वथा साध्यांशनिवेशस्य विधिविषयत्वानिरासो न युक्त इत्याशङ्क्याह * तदपि चेति * साध्यशब्दस्य इष्टतमत्वलक्षणकर्मवाचिकृत्यप्रत्ययान्तत्वेन साधयितुमिष्टमित्येवमर्थत्वात् स्वर्गादेश्चेष्टतमत्वस्य स्वसम्वेद्यत्वेन शास्त्रानधीनत्वान्न साध्यत्वेन विशेषः शास्त्रादपेक्ष्यते अपि तु स्वर्गादीनां साध्यानां मध्ये ऽस्या भावनायाः को विषय इत्येवं विधेयभावनाविषयत्वेनेत्यर्थः। साध्यांशस्य विधेयत्वनिरासप्रयोजनमुपसंहरति *ततश्चेति*एवकारो धात्वर्थनिवृत्त्यर्थः अश्रुतपश्वादिनिवृत्त्यर्थः कृतास्पदशब्दः कृतं कर्मिपदेनास्पदं साध्यांशनिवेशार्हत्वरूपं यस्येत्यर्थः। ननु स्वर्गादेः साध्यस्याशास्त्रीयत्वेन सन्निकर्षविप्रकर्षानपेक्षत्वे ऽपि भावनाविशेषान्वयस्य शास्त्रीयत्वेन तदपेक्षत्वात्सन्निकृष्टेन धात्वर्थस्य भावनान्वयेन बाधः स्यादित्याशङ्क्याह * धात्वर्थेति * धात्वर्थस्यायोग्यत्वेन साध्यांशनिवेशितयानपेक्षितत्वान्नान्वयः सम्भवतीत्याशयः । न केवलमनपेक्षितत्वाद्धात्वर्थस्य साध्यांशेन नान्वयः किं तु विधिश्रुतिबाधापत्तेरपीत्याह * विधीति * धातुश्रुतेः प्रत्यासत्तिमात्रबाधात्तरामित्युक्तं न केवलं स्वर्गादेरिष्टतमत्वाद्भाव्यत्वं किं तु भवितृतयोपादानादपीत्याह * किं चेति * ननु धात्वर्थस्यापि निष्पाद्यत्वाद्भवितृतास्तीत्याशङ्क्याह * न चेति* अशाब्दं भवितृत्वं शाब्दे व्यवहारे ऽनुपयोगीति भावः। स्वर्गादेः कथं भवितृतयोपादानमित्याशङ्क्याह * स्वर्गादीनां त्विति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * भवेदेतदित्येवंरूपस्यैवाशयस्येच्छात्वादिच्छाविषयत्वोपपादनादेवान्यथानुपपत्त्या भवितृत्वावगतिरिति भावः। स्वर्गाख्यदेशविशेषस्य सिद्धत्वात् भवितृत्वाभावमाशङ्क्य स्वसम्बन्धित्वेन भवितृत्वं भेदशब्देनोक्तं भवितृतयोपादानस्य भाव्यंशान्वयोपयोगित्वे भावनापेक्षाकारणमाह * तेनेति* नन्वेवमप्येकशब्दोपात्तस्य धात्वर्थस्य यागादिनेति भाष्येण पश्चादन्वयाभिधानं न युक्तमित्याशङ्क्याह * तत इति* धात्वर्थस्य करणांशे निवेशासिद्धावाद्भावनास्वरूपस्य च निर्ज्ञातसङ्कल्पाख्येच्छाविशेषकरणकत्वेन करणानाकाङ्क्षत्वात्फलान्वितरूपस्य करणाकाङ्क्षयाः फला-

३५४।१

न्वयोत्तरकालं प्रवृत्तेर्युक्तं पश्चाद्धात्वर्थान्वयाभिधानम् इत्याशयः । नन्वेवमपि नामार्थस्य सिद्धत्वेन योग्यत्वात्करणांशान्वये वाच्ये धात्वर्थस्यासिद्धत्वेनायोग्यत्वात्करणांशान्वयाभिधानमयुक्तमित्याशङ्क्याह * तत्रेति * आदिशब्देन नामार्थस्य करणांशानिवेशहेतुर्विप्रकर्षो ऽभिप्रेतः।ननु सन्निधिवद्योग्यत्वस्याप्यन्वयहेतुत्वान्नामार्थस्य सिद्धत्वेन योग्यत्वात् करणांशनिवेशो युक्तो न धात्वर्थस्यासिद्धत्वेनायोग्यत्वादित्याशङ्क्य प्रमाणान्तराच्चेत्युक्तं सिद्धस्यापि मृदादेः पटादावयोग्यत्वेन सिद्धत्वमात्रायोग्यतानवगतेरदृष्टार्थेषु च कार्यगम्यविशेषयोग्यत्वस्य प्रमाणान्तरेण ज्ञातुमशक्यत्वात् सामान्यतश्च धात्वर्थस्यापि भोजनादेस्तृप्त्यादिफलसाधनत्वदर्शनेन ज्ञातुं शक्यत्वान्नायोग्यत्वेन धात्वर्थस्य करणांशात्प्रच्युतिर्युक्तेत्याशयः । न च साध्यांशवत्करणांशनिवेशे विधिविरोधो ऽस्तीति विध्यविरोधाच्चेत्यनेनोक्तं ततश्चायोग्यत्वविरोधलक्षणस्य साध्यांशे धात्वर्थातिक्रमकारणद्वयस्यात्राभावात् यागेनेत्येवमन्वयो विज्ञायतइत्यर्थः । प्रत्युत नामार्थस्यैव धात्वर्थनिरपेक्षस्य क्व चित्करणत्वानुपलब्धेरयोग्यतातिक्रमणकारणमस्तीति सर्वेत्यनेनोक्तम् । यत्त्वनिष्पन्नत्वेनायोग्यत्वं पूर्वपक्षिणोक्तं तन्निरस्यति * यद्यपि चेति * नन्वेवं सति स्वनिष्पत्त्यपेक्षणाद्विलम्बः स्यादित्याशङ्क्य नामार्थस्यापि नित्यसिद्ध्यभावात् साम्यमाह * सर्वमेव चेति*न च प्राक्सिद्धस्यैव शास्त्रेण करणत्वं वाच्यमिति नियमे हेतुरस्तीत्याह * न चेति * किं चातीतस्यापि ग्रहोपसर्गादेः शुभाशुभोत्पत्तौ वर्त्तमानस्य च ज्ञानस्यार्थप्रकाशे भविष्यन्त्याश्च वृष्टेर्मत्स्यविकारहेतुत्वदर्शनान्न प्रागसिद्धिमात्रेण साधनांशनिवेशायोग्यतेत्याह * प्रमाणेति*उपसंहरति* तस्मादिति * यस्य चेति भाष्यं सङ्क्षेपेण व्याचष्टे * तच्चेति * यदा च यागादिधात्वर्थरूपकर्मवाचिभ्यो धातुशब्देभ्यो ऽपूर्वप्रतीतिस्तदा प्रयोजनवाच्यर्थशब्दाभ्युपगमेन प्रकृतिप्रत्ययौ प्रत्ययार्थं सह ब्रूत इति स्मृत्यनुसाराद्धातोरपि भावार्थत्वोपपत्तेः सामानाधिकरण्येन व्याख्यासम्भवात् नावश्यं प्रत्ययांशेन भावार्थाः धात्वंशेन च कर्मशब्दाः पदरूपाः शब्दा इत्येवं व्याख्येयमित्याह * ततश्चेति * ननु यदि भावनाया भाव्यनिष्ठत्वादीप्सिततमस्य च कर्मणो भाव्यत्वादनीप्सितधात्वर्थातिक्रमेणेप्सिततमस्य स्वर्गादेर्भावनाकर्मत्वं धात्वर्थस्य च भाव्यान्वितभावनारूपे करणत्वं ततो ऽकर्मकेषु धातुषु कर्माभावाद्भावना न स्याद्भावनाभ्युपगमे वा तेषामपि सकर्मकत्वापत्तिरित्याशङ्कते * ननु चेति * भावनावगतिहेतुत्वाद्वा सकर्मकधातु-

थुक्तमेव सर्वमाख्यातं प्राप्नोतीत्यर्थादुक्तं शङ्काभिप्रायं व्याचष्टे * तथा हीति * येन कारणेनेप्सिततमैः स्वर्गादिभिः पदार्थैर्भावनायाः किमित्यंशो ऽवरुध्यते धात्वर्थश्चेप्सिततमभावावरुद्धकिमित्यंशभावनायोगी तेन कारणेन न कश्चिद्धातुः अकर्मकः स्यादकर्मको वा यः कश्चिद्धातुः स सर्वो न भावनायोगी स्यादिति द्वेधा योज्यम्। द्वेधा श्लोकं व्याचष्टे * यदि वेति * भावनाकर्मणैव धातोः सकर्मकत्वे स्यादथ दोषः न त्वेतदस्ति धात्वर्थसाध्यकर्मनिबन्धनत्वाद्धातोः सकर्मकत्वस्येति परिहरति * नैष दोष इति * धात्वर्थसाध्यस्य कर्मणो ऽकर्मकेष्वभावान्न सर्वेषां सकर्मकत्वापत्तिरिति पूर्वार्द्धेनाद्यशङ्कापरिहारः भावनानिबन्धनस्य कर्मणः सर्वत्र भावान्नाकर्मकेभ्य भावनानुपपत्तिरित्युत्तरार्द्धेन द्वितीतीयशङ्काभिप्रायपरिहारः धात्वर्थभावनाकर्मणोरभेदे भावाभावव्यवस्थानुपपत्तेस्तत्सिद्धये ऽन्यत्वाभिधानं धात्वर्थसाध्यमिति वाक्ये भावनाकर्मणो व्यवहितसिद्धेर्धात्वर्थकर्मणो ऽनन्तरसिद्धत्वेनान्यत्वोपपादनार्थम् * प्राप्यमित्युक्तम् * कर्मद्वयस्याधिष्ठानान्यत्वानियमाभावे ऽपि यदेव धात्वर्थं प्रति कर्मत्वं तदेव भावनां प्रति न भवतीति कर्मत्वरूपान्यतोक्ता यद्धि यथाकथञ्चिदपि धात्वर्थसिद्धौ सत्यामनन्तरं नियमेनोत्पद्यते तद्धात्वर्थस्वरूपप्रयुक्तत्वाद्धात्वर्थकर्म यत्त्वन्यप्रेरितेन पुंसानुष्ठितकर्मणि कदा चिदुत्पद्यते कुतश्चिद्वाकारणान्न कदा चिदुत्पद्यते तन्नियोगप्रयुक्तत्वान्नियोगस्य च भावनाविषयत्वात् भावनाकर्म। उदाहरणनिष्ठं श्लोकं व्याचष्टे * ओदनमिति * पाकसमाप्त्यनन्तरमेवौदनाख्यं कर्मोत्पद्यते गमनसमाप्त्यनन्तरं च ग्रामप्राप्त्याख्यं नान्यत्किं चिदपेक्षितमिति द्योतनायापवर्गशब्दः अधिष्ठानान्यत्वानियमो ऽनेनोक्त इति शङ्कानिवृत्त्यर्थं तत्रेत्याद्युक्तं धात्वर्थसमाप्त्यनन्तरं नियमेनोत्पद्यमानत्वादोदनस्य धात्वर्थकर्मत्वे ऽप्युद्देश्यत्वलक्षणेप्सिततमत्वस्य प्रयत्नाख्यभावनैकगोचरत्वादोदनमात्रोद्देशेन यदा प्रवर्त्तते तदैकस्यैवोभे प्रति कर्मता यदा त्वोदनादिकर्मविशिष्टेन धात्वर्थेनावच्छिन्ना भावनान्यद्वेतनलाभादीप्सितमप्युद्दिश्य प्रवर्त्तेत तदा कर्माधिष्ठानमपि भिद्यतइत्याशयः ननूभयनिष्पत्त्युत्तरकालभाविना वेतनलाभादेः कथं निष्कृष्य भावनाकर्मत्वावधारणेत्याशङ्क्याह * ततश्चेति * विप्रकर्षार्थः परशब्दः। धात्वर्थाद्विप्रकृष्टकालत्वेन धात्वर्थान्तरैश्च व्यवधानेन पाकादिधात्वर्थकर्मत्वावधारणाशक्तेर्भावनाकर्मत्वावधारणेत्युक्तं ननु भावनाकर्मत्वावधारणाप्यस्मादेव हेतुद्वयादशक्येत्याशङ्क्य तदवा-

३५५।२

प्य * मात्रत्वेनेत्युक्तम् * धात्वर्थफलस्य स्वरूपप्रयुक्तत्वात् स्वरूपव्यवधाने न शक्यो जन्यजनकभावो ऽवसातुं भावनाफलस्य तु नियोगप्रयुक्तत्वात्तस्य च लोके नियोक्तू राजादेः सन्तोषादिपूर्वकफलदानप्रवृत्त्या व्यवधानदर्शनात् वेदे ऽपि योगसिद्ध्यधिकरणन्यायेनानन्तर्यनियमाभावादनन्तरजन्यत्वानपेक्षभावनाव्याप्यमात्रत्वेन नियोगवशाद् गम्यमानत्वात् भावनाकर्मत्वावधारणेत्याशयः । तस्य चाकर्मकधातुयुक्तेष्वप्याख्यातेषु भावाद्भावनावगतिः सम्भवतीति सर्वत्रेत्यनेन सूचितम् । नन्वकर्मकेषु धात्वर्थकर्मभावे ऽपि भावनाकर्माभ्युपगमे स्वास्थ्यं शयीतेति द्वितीया कस्मान्न प्रयुज्यतइत्याशङ्क्याह * तच्चेति * भावनाया भाव्यनिष्ठत्वाद्भवितुरेव भाव्यत्वात् द्वितीयायाश्च प्राधान्यापरपर्यायेप्सिततमत्वमात्रवाचित्वेन भवितृत्वानभिधायित्वादेवं कामशब्दात्विदं भवेदिति भवितृत्वप्रतीतेस्तेनैव भावनाकर्मत्वप्रतीतिः । अग्निमादधीतेत्यादौ तु भावनाकर्मत्वान्यथानुपपत्त्या भवितृत्वकल्पनया क्लेशेन भावनाकर्मत्वनिर्वाह इत्यर्थः । धात्वर्थभावनाकर्मणोरन्यत्वाभिधानस्याशङ्कानिरासप्रयोजनत्वं पूर्वसूचितं प्रकटयितुमाह * सत्यपीति * प्रकटयति * तेनेति * नन्वग्निमादधीतेत्यादौ द्वितीयानिर्दिष्टस्यैव प्रायेण भावनाकर्मत्वदर्शनादेवं कामशब्दहेतुकत्वस्य प्रायिकत्वाभिधानमयुक्तं स्यादित्याशङ्क्याह * यजेरपि त्विति * विष्णुं यजतीत्यादौ द्वितीयानिर्दिष्टामपि देवतां कामशब्दोपबन्धाभावाद्भावनाकर्मत्वेन त्यक्त्वा कामशब्दोपबद्धस्य स्वर्गादेरेव भावनाकर्मत्वाङ्गीकरणादुक्ता कामशब्दोपबन्धहेतुकत्वस्य प्रायिकतेत्याशयः । द्वितीयोक्तस्य कर्मत्वस्य निर्विशेषत्वाशङ्कानिरासार्थं यजिधात्वर्थकर्मतोक्ता यागे ऽपि देवतायाः स्वरूपेणासमवायात् कर्मत्वायोगमाशङ्क्यानभिमतमपि पूज्यत्वं त्यज्यमानद्रव्योद्देश्यत्वलक्षणत्वाद्देवतात्वस्य त्यज्यमानद्रव्योद्देश्यस्य च गुर्वादेर्लोके पूज्यत्वदर्शनादुपचारेणोक्तं शङ्कानिरासमुपसंहरति * तस्मादिति * नन्वेवमपि भावनाकर्मणैव तद्विशेषणभूतस्यासनशयनादेरपि धात्वर्थस्य सकर्मकत्वे सकर्मकाकर्मकविभागो न युज्यतइत्याशङ्कते * कस्तर्हीति * भावनाविशेषणत्वसाम्ये ऽपि विभागहेतुमाह * उच्यतइति व्यवहितस्याप्यङ्कुरादिरूपतया बीजादिपरिणतस्य बीजावापादिधात्वर्थकर्मत्वदर्शनात् साक्षाच्छब्देन क्वचिन्नैरन्तर्यं क्वचिन्नियतरूपत्वमभिप्रेतं यदुप्तं बीजं तदेवाङ्कुररूपेण परिणतमिति नियतरूपेण प्रतीतेः। पारम्पर्यशब्देन साक्षात् शब्दोक्तनैरन्तर्याभाववाचिना तदुक्तस्यैव नियतरूपत्वस्याव्यभिचारशब्दोक्त-

स्य च नियमस्याभाव उपलक्षितः । भावनाकर्माभिधानस्य धात्वर्था-
कर्मकत्वोपपादने तात्पर्यं सूचयितुं व्युत्क्रमेण श्लोकं व्याचष्टे *
आसनेति * श्रान्तस्यासीनस्य सुखीभावाच्छयानस्य स्वास्थ्याभावा-
द्व्यभिचारोपलब्धेः कदा चित्प्रबुद्धस्य चिरेणान्नपचनादिना धातु-
साम्यलक्षणस्वास्थ्यासद्भावे ऽप्यानन्तर्याभावाच्छयानस्यासीनस्य चै-
तत्फलमिति नियतरूपानिरूपणाद्वा साक्षादनुपपत्तेर्धात्वर्थकर्मत्वा-
योगात्स्वादेरकर्मत्वं पच्यादीनां तु धात्वर्थानां विक्लिद्यता त-
ण्डुलादिना तच्छब्देन परामृष्टगमिधात्वर्थलक्षितं गन्तृसंयुक्तकालेन
च ग्रामादिना साक्षादानन्तर्येणेदं तदिति वा नियतरूपतया धात्व-
र्थस्य स्वविक्लित्त्योदनरूपापत्त्या प्राप्यमाणत्वेन वा कर्मत्वेन कर्मणा
व्यभिचाराभावात्पच्यादीनां धातूनां सकर्मकत्वमिति पचिगम्या-
दीनामिति धात्वर्थपरतया स्वरूपपरतया चावर्त्त्य योज्यम् । साध्यसा-
धनान्वयाभिधानमात्रेण सूत्रव्याख्यानसिद्धेः । किं केन कथमित्या-
काङ्क्षात्रयाभिधानमनर्थकमित्याशङ्क्याह * सेयमिति * कथं यथा
सन्निकर्षं शास्त्रानुसारेण कल्प्यते कथं वा तदभावाद्यथा कथं चि-
दुपस्थाप्यमानेत्यपेक्षायां * श्रुत्यादीत्युक्तम् * अतिदेशस्योपकारद्वार-
त्वाद् * अत्यन्तेत्युक्तम् * भावनायास्त्र्यंशापेक्षत्वे ऽपि स्ववाक्योपात्त- ३५।६।१
साधनमात्रान्वये विधिपर्यवसानभ्रान्तिं निवर्त्तयितुमाह * तत इति *
ननु विशेषणविधिं विना विशिष्टविधिर्न सम्भवतीत्याह * तद्विधा-
नाच्चेति * तस्मादित्युपसंहारभाष्यमधिकरणार्थोपसंहारार्थमिति
शङ्कां निवर्त्तयितुं सूत्रार्थमात्रोपसंहारार्थत्वेन व्याचष्टे * इतीति *
कर्मशब्दत्वभावार्थत्वयोरेकैकेनाख्यातोपलक्षणसिद्धेरुभयोपादानान-
र्थक्यमथेति भाष्येणाशङ्क्योच्यतइत्यनेन भावार्थत्वविशेषणप्रयो-
जनमुक्तं तत्र श्येनादिशब्दानां कर्मनामधेयत्वस्य यजिसामाना-
धिकरण्याधीनत्वाद्यागादिस्वतन्त्रकर्मशब्दत्यागेनोदाहरणमयुक्तमि-
त्याशङ्क्याह * भवन्तीति * ननु श्येनादिशब्दवद्यागा-
दिशब्दानामपि धात्वर्थाख्यकर्मवाचित्वाद्भावार्थता नास्तीत्याशङ्क्याह
* यागादयो हीति * धातोराख्यातप्रत्ययोपात्तभावनोपश्लिष्टस्वा-
र्थवाचित्वोपलम्भादिहापि भावनोपश्लिष्टस्वार्थवाचित्वं कथं नानु-
मीयतइत्याशयः । कर्मशब्दत्वविशेषणप्रयोजनाभिधानार्थं केचिदि-
ति भाष्यं तत्रोदाहरणमाक्षिपति * केचिदिति * ननु णिजन्ता-
द्भवतेरच्प्रत्ययोत्पादनेन भावनावाचितया भावशब्दस्य व्युत्पादित-
त्वात्कथमनुदाहरणतेत्याशङ्क्याह * तत्रेति * भवनाख्यप्रयोज्य-
व्यापारविशिष्टप्रयोजकव्यापारवाचिभावशब्दार्थैकदेशप्रयोज्यव्यापा-

त्वावाचित्वात् लक्षणयेतरयोरपि भावार्थतोपपत्तस्तदिति परिहरति * तावपि त्विति * यदा तु भावनाप्रयोजनत्वाभिप्रायो भावार्थशब्दो व्याख्यायते तदा भावनैकदेशभूतभवनवाचित्वेनैषां भावनाप्रयोजनत्वायुक्तैव भावार्थतेति परिहारान्तरमाह * अथ वेति * ननु भावादिशब्दानां लक्षणया भावनाप्रयोजनत्वाद्वा भावार्थत्वे कर्माख्यानुष्ठेयव्यापारवाचित्वेन कर्मशब्दत्वान्नानेन विशेषणेन व्यावृत्तिरित्याशङ्कते * कथं पुनरिति * क्रियतइत्यस्मिन्नर्थे करोतेरौणादिके मनिन्प्रत्ययस्मृतेः । कर्मशब्दस्यानुष्ठेयव्यापारवाचित्वाद्भावनादेश्चासिद्धकर्तृव्यापारत्वेनानुष्ठेयत्वात्तद्वाचिनो भवत्यादेर्धातोः कर्मशब्दत्वायोगादुत्तरवार्त्तिकानुसाराच्चानुष्ठेयव्यापारवाचिसर्वधात्वभिप्रायो धातुमात्रशब्दः धात्वर्थविशेषानवच्छिन्नायाः भावनाया अनुष्ठातुमशक्यत्वात्तद्वाचिनो धातोरपि कर्मशब्दत्वं नास्तीति परिहरति *निर्विशेषस्येति* ननु भवनाख्यधात्वर्थविशेषावच्छिन्नाया भावनायास्तर्ह्यनुष्ठेयत्वात् भावादिशब्दानां कर्मशब्दतोपपत्तस्तदित्याशङ्कयाह * अत इति * भवनस्यासिद्धकर्तृव्यापारत्वात् भावनाविशेषणत्वं नास्तीत्याशयः । किं पुनरित्यादिभाष्येणोदाहरणं प्रश्नपूर्वकं विचारस्वरूपं स्पष्टयित्वा स्थितइत्युक्तम् । तच्छङ्कोत्तरत्वेनावतारयति * यदीति * नन्वेवं सति नामधेयचिन्तोपोद्घातत्वेन

३५७।२ ततः प्रागेवेदं कार्यमिति शङ्कते * कस्मादिति*सत्यप्युपोद्घातत्वेन भेदचिन्तयेव नामधेयचिन्तयापि सम्बन्धेऽर्थचिन्तात्मकत्वात्प्रमाणलक्षणासङ्गतेस्तत्र न कृतमिति परिहरति * प्रमाणेति * एवं तर्ह्याख्यातपदस्य फलपदान्वयान्नामपदस्य तदन्वयेऽस्मिन्नधिकरणे निरस्ते तदेतरत्तदर्थमित्याख्यातान्वयप्राप्तौ गुणविधित्वेनाख्यातान्वयो नामधेयत्वेन वेति इहापि प्रसङ्गात् सङ्गत्युपपत्तेः । कस्मान्नामधेयचिन्तापीहैव न कृतेति शङ्कते * अथेति * प्रासङ्गिकत्वेनानन्तरसङ्गतौ सम्भवन्त्यामपि लक्षणासङ्गतेर्नेह कृतेति परिहरति * भेदेति * शङ्काद्वयनिरासमुपसंहरति * तस्मादिति * तथेत्यादिभाष्यं स्पष्टत्वादव्याख्याय न चेति भाष्यं स्वर्गं भावयेदिति फलान्वयस्य प्रागुक्तत्वात्किं केन कथमिति साध्याद्याकाङ्क्षाया एवोपायस्योक्तत्वात्तद्विरुद्धपुरुषान्वयाभिधानादयुक्तमाशङ्क्य व्याचष्टे * न चेति * अर्थवाचिनः कामिपदस्य लक्षणयाऽर्थिशब्देनाभिधानात्तस्य चैकादशाद्यभाष्ये फलपरत्वस्य वक्ष्यमाणत्वादविरोध इति भावः । श्येनेनाभिचरन्निति व्यधिकरणविभक्तित्वलक्षणस्य विभक्तित्वस्य साध्यसाधनान्वयापादकत्वेन विपरीतसा-

धनत्वाद्हेतुत्वमाशङ्क्य वीत्युपसर्गौ विगमार्थौ विशेषार्थौ वेति द्वेधा व्याचष्टे * विसक्तित्वादिति * तस्मादित्युपसंहारभाष्यं फलस्य क्रियेति फलभावनान्वयोपक्रमाच्च द्रव्यगुणशब्दाः फलान्वयद्वारापूर्वस्याक्षेपका इत्येवमर्थमिति सूचयन्व्याचष्टे * तस्मादिति * एनमेव सिद्धान्तं वृद्धवचनेन द्रढयति * आह चेति *

सर्वेषां भावो ऽर्थ इति चेत् ॥ २ ॥

नन्वाख्यातपदादेव भावनाप्रतीतेः। सर्वेषां भावनार्थत्वाभिधानमयुक्तमित्याशङ्क्याह * न तावदिति * अयमाशयः धात्वर्थस्य करणत्वं वक्तुं धातोः फलपदान्वयद्वारेणापूर्वाक्षेपकत्वं यदुक्तं तदाक्षेपायेदं सूत्रम्। न च भावनावाचिनः प्रत्ययस्य फलपदान्वयद्वारापूर्वाक्षेपकत्वं सिद्धान्तिनो ऽपीष्टं धातोरपि स्वतः प्रत्ययनिरपेक्षस्य भावनावाचित्वाभावेन फलपदान्वयायोगान्नापूर्वाक्षेपकत्वमिष्टं किं तु परतः प्रत्ययान्वयद्वाराभावनानुरञ्जकत्वलक्षणया भावार्थत्ववशात्तच्च नाम्नो ऽपि श्येनेन कुर्यादिति प्रत्ययान्वयेन भावार्थत्वोपपत्तेः सममिति श्लोकं व्याचष्टे *यदीति* भावनावचनस्यैवेत्येवकारेण कारणवाचिशब्दानपेक्षोक्ता भावनावाचित्वेन तु फलपदद्वारा प्रत्ययस्यापूर्वाक्षेपकतोभयवादिसमानत्वान्न विचार्यत्वेनेष्टेत्याशयः। नामपदस्यापीत्यपिशब्देन श्लोकस्थो वा शब्दार्थो ऽप्यर्थे व्याख्यातः।

येषामुत्पत्तौ स्वे प्रयोगे रूपोपलब्धिस्तानि नामानि तस्मात्तेभ्यः पराकाङ्क्षाभूतत्वात् स्वेप्रयोगे ॥ ३ ॥

ननु भावार्थत्वाविशेषाद्धातुवन्नाम्नो ऽपि फलपदान्वयसम्भवान्नियमानुपपत्तौ शङ्कितायां नामाख्यातयोः स्वरूपकथनमसम्बद्धमित्याशङ्क्याह *यदुक्तमिति* अयमर्थः धात्वर्थानपेक्षस्य नामार्थस्य भावनानुरञ्जनाशक्तेर्न तावद्धातुतुल्यं भावार्थत्वं नाम्नो ऽस्ति तदभावे ऽपि दध्नेन्द्रियकामस्येत्यादौ नाम्नः फलपदान्वयदर्शनाद्यथाकथं चित्तु भावार्थत्वमात्रस्य फलपदान्वयोपयोगित्वमाशङ्कावाद्यभिमतमभ्युपगम्य धातुनाम्नोर्विशेषं वक्तुमेतत् सूत्रद्वयं तत्र यदेकस्मादिति भाष्येण सर्वेषां फलपदान्वये बह्वदृष्टकल्पनापत्तिरेकस्य तु तदन्वये ऽल्पकल्पनेति यदुक्तं तत्रैकान्वये ऽपि नाम्नो ऽन्वयबहुकल्पना धातोस्त्वन्वये ऽल्पकल्पनेति विशेषः सार्द्धेन सूत्रे- ३५८।१

णोक्तः आश्रितत्वात्प्रयोगस्येति सूत्रावयवेन श्रुतिवाक्यकृतइति अयं च सिद्धसाध्यत्वकृतो विशेषो न श्रुतिवाक्यकृतविशेषवच्छब्द- मात्रनिमित्तः किं तु वास्तवो ऽपीति वस्तुधर्मेणेत्यनेनोक्तं कीदृशो ऽसौ विशेष इति प्रश्नपूर्वं विवरीतुमाह * कथमिति * प्रतिपदुप- कारित्वोपपादनस्यानिष्टापत्त्यभिधानार्थत्वेन प्रस्तुतोपयोगं वक्तु- माह * कस्मादिति * कथं नाम्नः फलपदान्वये बह्वदृष्टप्रसङ्गापरि- हार इत्याशङ्क्याह * नाम्नश्चेति * ननु सिद्धरूपस्यापि नामार्थ- स्याश्रयत्वेन निष्पाद्यो धात्वर्थो दृष्टेनोपकरिष्यतीत्याशङ्क्याह * न हीति * विधीयमानस्य धात्वर्थस्य किं चित् समीहितं प्रति साध- नत्वं विना विधेरपर्यवसानान्नामार्थं प्रति साधनत्वायोगात्तादर्थ्ये- न विध्यनुपपत्तेरन्यार्थत्वेनैव विहितस्याश्रयत्वेन ग्रहणात् नत्वन्या- श्रयत्वे कश्चिददृष्टो नामार्थस्योपकारो धात्वर्थसाध्यो ऽस्मिन्पक्षे कल्प्यः स्यादित्याशयः । आश्रयत्वेन धात्वर्थं गृह्णन्नपि नामार्थः सा- धनत्वेन नापेक्षते येन नामार्थस्य फलान्वये धात्वर्थस्तस्य दृष्टेनोप- कुर्यादित्यर्थः । उच्चारणोत्पत्ताविति भाष्यावयवेनोत्पत्तिशब्दमुच्चा- रणार्थत्वेन व्याख्याय स्वे ऽर्थइत्यनेन प्रयोगशब्दो वाच्यार्थत्वेन व्याख्यातः । तत्र प्रयुज्यमानशब्दात्कर्मव्युत्पत्तिरुक्तेत्यायाति तत्स्वा- र्थस्योच्चार्यत्वाख्यप्रयोज्यत्वाभावादयुक्तमाशङ्क्याधिकरणव्युत्पत्ति- माह * प्रयुज्यतइति * प्रयुज्यमानशब्दविषयभूते ऽर्थे रूपोपलब्धि- रिति व्याख्यानेन सूचिता प्रयुज्यमानशब्दविषयत्वाल्लक्षणयार्थस्य प्रयुज्यमानतोक्तेत्याशयः । सूत्रान्त्यप्रयोगशब्दवत् अयमप्युच्चार- णार्थतया प्रसिद्धः प्रयोगशब्दो वाच्यार्थतया कस्माद्व्याख्यायतइ- त्याशङ्क्य प्रयोगस्य सप्तम्या रूपोपलब्ध्या ऽऽधारत्वोक्तेर्वाच्याश्रितत्वा- च्च तस्या इत्याह * तदाधारैव हीति * उच्चारणे ऽपि निष्पाद्य- रूपोपलब्धेर्निष्पन्नरूपतेह विवक्षितेति निष्पन्नशब्देनोक्तं यत्सकृदिति भाष्येण रूपोपलब्धिपदं स्थायिरूपाभिप्रायेणान्वयमुखेन व्याख्याय क्रियावैधर्म्याभिधानेन व्यतिरेकमुखेन व्याख्यातं तदुभयमपि ना- मार्थस्य साधनानपेक्षत्वाय निष्पन्नत्वस्य वक्तव्यत्वाद्धात्वर्थस्य साध- नापेक्षत्वायानिष्पन्नत्वस्य वक्तव्यत्वादयुक्तमाशङ्क्याह *अनुत्पन्नत्व- इति* निष्पन्नत्वे नामार्थस्य वक्तव्ये स्थायित्वप्रदर्शनमित्यर्थाद्युक्तं कर्म- नामधेयत्वेन नाम्नः फलपदान्वयस्यानाशङ्क्यत्वात्तन्निरासार्थसिद्धरू- पार्थत्वाभिधानानर्थक्यापत्तेः द्रव्यगुणशब्दत्वाभ्युपगमे ऽनाशङ्केति सूचयितुं द्रव्यगुणशब्दा इति व्याख्याते किमर्थं तर्हि नामानीत्युक्तम् इत्याशङ्क्य सत्वप्रधानानि नामानीति स्मृत्या सिद्धार्थत्वोपपादनार्थ-

त्वं पर्यायत्वाभिधानेन सूचितं, तत्स्पष्टत्वाद्व्याख्याय तस्मात्तेभ्यः पराकाङ्क्षेति सूत्रावयवव्याख्यानार्थं यत एषामिति भाष्यं सूत्रे नञ-भावादयुक्तमाशङ्क्याध्याहारार्थत्वेन व्याचष्टे * तेभ्य इति * स्वयमन्यवाचित्वेन परशब्दं व्याख्याय प्रधानवाचित्वं भाष्योक्तं व्याख्यातुम् *निष्पाद्यत्वेन वेत्युक्तम्* निष्पाद्यत्वेन प्रधानस्य सतो या साधनाकाङ्क्षा सा न विद्यते निष्पाद्यत्वाभावादित्यर्थः । दूरवाचिना वा परशब्देनैव नञर्थो लभ्यतइत्यन्यथा व्याचष्टे * अथ वेति * भूतत्वादित्यादिसूत्रावयवं नैराकाङ्क्ष्योपपादनार्थत्वेन व्याचष्टे *कुत इति पौनरुक्त्यं परिहरति * स्वरूपेति *

येषा तूत्पत्तावर्थे स्वे प्रयोगो न विद्यते तान्याख्यातानि तस्मात्तेभ्यः प्रतीयेताश्रितत्वात्प्रयोगस्य ॥४॥

आख्यातस्वरूपकथनस्य प्रयोजनमाह * आख्यातेति * श्लोकं व्याचष्टे * धात्वर्थस्तावदिति * व्यापारात्मकत्वाद्धात्वर्थस्य व्यापारस्य चानुपसंहृतरूपत्वाख्यानिष्पन्नरूपत्वात्स्वभावेनैव साध्यात्मकतेत्याशयः । ननु नामधेयत्वे नाम्नोऽपि साध्यार्थत्वान्निष्पन्नस्य चानुष्ठेयत्वाख्यसाध्यत्वायोगात्फलपदान्वयः प्रसज्येतेत्याशङ्क्ते *नन्विति * नामधेयत्वस्य धातुसामानाधिकरणाभिधानत्वात्फलपदान्वये च सामानाधिकरण्याभावान्नामधेयत्वं न स्यादिति परिहरति * नेति * अन्योत्पादानुकूलार्थाभिधायित्वेन साध्यसाधनेतिकर्त्तव्यताकाङ्क्षोत्थानसूचनार्थं ते भावशब्दा इति वक्तव्ये तान्याख्यातानीत्यभिधानात् सूचितम् । परिहारान्तरमाह *अपि चेति* श्लोकं व्याचष्टे * यद्यपीति * ननु सिद्धत्वरूपतयाभिधानेऽपि वस्तुतः साध्यत्वात् साधनाकाङ्क्षानुष्ठेयत्वनिर्वाहार्थं च फलाकाङ्क्षा भविष्यतीत्याशङ्क्याह * अभिधानेति * यागादिशब्दोच्चारणेऽपि साध्यत्वानुरक्ताकाङ्क्षानुपलब्धेरभिधानकृतैवाकाङ्क्षेत्याशयः । तस्मात्तेभ्यः प्रतीयेतेति तस्माच्छब्देन साध्यत्वोपपादितसाधनाकाङ्क्षावशान्नामार्थस्य धात्वर्थान्वये दृष्टार्थत्वं हेतुत्वेन परामृष्टमिति सूचयितुमुपसंहरति * तस्मादिति * अनेन च भव्यार्थास्त इति भाष्यमपि तात्पर्यतो व्याख्यातम् । उच्चारणाख्यप्रयोगकाले स्वार्थे प्रयोगो न विद्यतइत्युक्ते प्रयोगकाले प्रयोगनिषेधायोगाद्विशेषणभूतेऽर्थे निषेधावतारात्प्रयोगकालेऽर्थो न विद्यतइत्यर्थप्र-

३५९।२

---

१ सामानाधिकरण्याधीनत्वादिति २ पु० पा० ।

तीतेः स्पष्टत्वात्तद्व्याख्यानार्थं भाष्यं न व्याख्यातम् । अदृष्टकल्पनाल्पत्वबहुत्वकृतेन विशेषेण धात्वर्थफलवत्त्वसिद्धेराश्रितत्वादिति हेत्वानर्थक्यमाशङ्क्य किं चेति भाष्येण हेत्वन्तरसमुच्चयार्थत्वेन व्याख्यातम् । पूर्वोक्ताद्विशेषादेतदुक्तस्य विशेषस्य विवेकमाह * किं चेति * एक पदोपादानाद्धात्वर्थस्य प्रत्यासत्तिलक्षणया श्रुत्या भावनान्वयः नामार्थस्य वाक्येनेत्यर्थः । धात्वर्थानपेक्षस्य नामार्थस्य भावनाननुरञ्जकत्वाद्वस्तुतो ऽपि धात्वर्थस्यैव प्रत्यासत्तेर्न शब्दग्रहणाद्वास्तवत्वनिवृत्तिः । अत्र भाष्यकृतौ तेषामाख्यातानां प्रयुज्यते ऽस्मिन्निति व्युत्पत्त्या प्रयोगशब्दवाच्यः प्रतिपाद्यो ऽर्थो धात्वर्थानुरक्तभावनाख्यः पुरुषेणाश्रित इति सूत्रावयवस्वरूपं व्याख्याय तदुपपादनार्थं पुरुषान्वितभावनाख्यातैरुच्यतइत्युक्तेन व्याख्यातेषु पुरुषानुपादानात्कथं तदन्वयावगतिरित्याशङ्क्य पुरुषस्याख्यातैर्भावनायां नियोगादर्थाक्षेपलभ्यत्वमुक्त्वा तथापि धात्वर्थस्य फलपदान्वयः कथमित्याशङ्क्यार्थाक्षिप्तस्य पुरुषस्य फलपदाद्विशेषप्रतीतेराख्यातोपात्तस्य धात्वर्थस्य भावनाद्वारा पुरुषान्वयः प्रतीयते न तु द्रव्यादेर्नामार्थस्येत्युक्ते तस्यापि भावनाद्वारान्वयो भविष्यतीति सर्वेषां भावो ऽर्थ इति सूत्रोक्तं चोद्यमनुभाष्य श्रुतिवाक्यविशेषाभिधानेन परिहृतं तत्सङ्क्षेपतो व्याचष्टे * पुरुषेति * भावनायां पुरुषस्य नियोज्यत्वोपपादनार्थं तद्व्यापारतोक्ता धात्वर्थावच्छिन्नभावनानुष्ठानाशक्तेस्तदुपश्लेषो भावनायाः पुरुषेणापेक्षितइत्युक्तम् । दर्शपूर्णमासाभ्यामिति नाम्नः फलपदान्वये दर्शकालः पौर्णमासकालश्चेति भाष्ये कालवाचित्वाभिधानान्नामधेयविचारे ऽनुदाहृतत्त्वाद्धात्वर्थस्यापि फलान्वये गुणविधित्वाशङ्काप्रसक्तेस्तन्निरासार्थं दर्शपूर्णमासकालान्वितस्यैवाग्नेयादियागस्य विहितत्वात्तत्प्रख्यन्यायेन लक्षणाया यागनामधेयत्वाभिधायकं यदा यागेनेति भाष्यं स्पष्टत्वान्न व्याख्यातम् ।

॥ अथ अपूर्वस्यास्तिताधिकरणम् ॥ २ ॥

चोदनापुनरारम्भः ॥ ५ ॥

कथं पुनरित्यादिभाष्येण शङ्कानिरासार्थत्वेनेतत्सूत्रमवतारितमिति दर्शयितुमाह * सूत्रासिद्धामिति * अपूर्वाभावे कुतो ऽपूर्वं प्रतीयते इति प्रतिपत्त्युपायविशेषविचारायोगात्तत्प्रतिपादनापेक्षायां सूत्रकृदाहेति भाष्यतात्पर्यमित्यर्थः चोदनेनेत्यपूर्वं ब्रूम इत्यादिभाष्योक्तं सूत्रार्थं तात्पर्यतो व्याचष्टे * फलायेति * चतुर्थ्युक्तफलार्थत्वं तच्छब्देन परामृष्टं श्लोकं व्याचष्टे * वेदवाक्येति * वृत्त्यन्त-

त्करैरपूर्वाभावे ऽपि कर्मफलसम्बन्धोपपत्तेरपूर्वस्य निष्प्रमाणकत्वा-द्भावार्थाधिकरणस्य च कोऽर्थः फलोत्पादावगतिरित्येतावति पर्यव-सानोपपत्तेः सूत्रस्य चारम्भकं प्रवर्त्तकं वाक्यं चोदनेति चोदनास्व-रूपकथनार्थतयापि व्याख्यातुं शक्यत्वान्नेदं सूत्रमपूर्वसद्भावाभिधा-नार्थमित्युक्तं तद् दूषयितुमुपन्यस्यति * अत्रेति * केन चित्प्रमाणे-नानवगतपूर्वकत्वादेवयथार्थमनुगतमस्य नामेति बहुव्रीहिरुपहासार्थः श्लोकं व्याचष्टे * वस्त्विति * प्रत्यक्षाप्रवृत्तिं तावदुपपादयति * त-त्रेति * आदिशब्देन लोकसिद्धेन्द्रियविषयमात्रग्रहणम्। अनुमाना-प्रवृत्तिमुपपादयति * नापीति * प्रत्यक्षसूत्रे सत्ता च नानुमानेन कस्य चित्सम्प्रतीयतइत्यत्रोक्तं शब्दाप्रवृत्तिमुपपादयति * पदेति * श्लोकं व्याचष्टे * आगमिकत्वमिति * उपमानाप्रवृत्तिमुपपादयति * न चेति * प्रत्युतासत्त्वएवोपमानं प्रवर्त्तते इत्युपहासार्थमाह ३६१।१ * क्वामामिति * अर्थापत्त्यप्रवृत्तिमुपपादयति * अर्थापत्त्यापीति * सिद्धान्ताभिमतश्रुतार्थापत्तिनिरासार्थम् * फलेत्युक्तम् * श्लोकं व्याचष्टे * दृष्टार्थापत्तिरिति * शब्दप्रामाण्यानादरेण दृष्टार्थाप-त्त्यवतारास्तथा चेश्वरेच्छादेरपि वैचित्र्यहेतोः पराभिमतस्यापि श-ब्देनोपादानम्। ननु श्रुतायाः फलयागादिसङ्गतेरपूर्वं विना ऽनुपपत्तेः श्रुतार्थापत्तिर्निराकर्तुमशक्येत्याशङ्क्याह * श्रुतार्थापत्तिरिति * अ-पूर्वं तु न कदा चित्फलसाधनत्वेन सम्भाव्यतइति व्यतिरिक्ताभि-धानात् सम्भवित्वाभिधानायान्यथानुपपत्तेः कथं चित्परिहारा-सम्भवः दार्ढ्यवाचिना प्रत्यक्षशब्देनोक्तमिति न कथं चिदपीत्यनेन व्याख्यातं। न केवलमन्यथानुपपत्तेः कथंचित्परिहारासम्भवादेव द्रव-विषयत्वस्य सम्भवित्वं किं तु सामान्यतः प्राप्तत्वादपीत्यपि चेत्यनेनो-क्तम्। द्रवेष्वप्यवदानप्रसक्तेरित्यर्थः। द्रवाख्यविशेषे ऽप्यवदेयसामान्य-वृत्तेः श्रुतहान्यभावः सामान्येन च विशेषाक्षेपादश्रुतापत्त्यभावः। सम्भाव्यमानस्याविरोधिनश्च श्रुतार्थापत्तिविषयत्वात् श्रुतार्थापत्ते-रप्यपूर्वो न प्रवर्त्ततइति भावः। तत्रापूर्वाभावे ऽपि श्रुतसाध्यसा-धनसम्बन्धानुपपत्तिपरिहारं कथं विनष्टं साधयतीत्यादिनाशङ्कापूर्व-मुपपादयिष्यमाणमभिप्रेत्यापूर्वस्यासम्भावित्वं तावदाह * अपूर्वं त्वि-ति * अनेनैव ग्रन्थेन पाक्षिकप्रसक्तेरपि निरस्तत्वात्परिशेषसिद्धिरू-पा तावदर्थापत्तिरनाशङ्क्यैवेति यतो ऽन्येत्यनेनोक्तम्। ननु प्रसक्त्यभावे ऽप्यन्यनिवृत्तिमात्रेण परिशेषः कस्मान्न सिद्ध्येदित्याशङ्क्याह * य-दीति * श्लोकं व्याचष्टे * न हीति * श्रुतसाधनसम्बन्धविरो-

१ व्यतिरेकाभिधानादिति २ पु० पा०।

धि चापूर्वमित्याह * अपि चेति * न च साध्यसाधनत्वाकाररहितं
२६२।२ तत्कल्पयितुं शक्यं प्रमाणाभावादित्याह * न चेति * कथं तर्हि
श्रुतसाध्यसाधनसम्बन्धसिद्धिरित्याशङ्क्याह * तेनेति * एतदे-
वाशङ्कापूर्वकमुपपादयति * कथमिति * न च स्थायित्वं फलसा-
धकत्वे प्रयोजकमाकाशादिष्वपि प्रसङ्गादित्याह * अपि चेति *
एतदेव विवृणोति * यदि चेति * ननु शास्त्रेण यागादेः फल-
साधनत्वावसायाद्विनष्टत्वेन च तस्य साक्षात् साधनत्वायोगात् स्था-
यिसम्बन्धिद्वारा साधनत्वसिद्धये ऽपूर्वकल्पनेति स्वयमेवाशङ्क्य
निरस्यति * अथेति * तदेव व्याचष्टे * यदीति * अतिक्रान्तो
ऽतीतो विनष्टो यागो यस्येति विग्रहः । नन्वात्मनः स्वरूपेणावैचि-
त्र्याद्यागादेश्चातिक्रान्तस्यासत्त्वेनावच्छेदकत्वायोगात् फलवैचित्र्य-
हेतुत्वं न स्यादित्याशङ्क्य यागादिविनाशस्य तर्हि प्रतियोगियागा-
दिनिरूपणाधीननिरूपणत्वादसत एव घटादेर्विनाशप्रतियोगित्वद-
र्शनात्तद्भेदापादितवैचित्र्यस्य फले ऽपि वैचित्र्यहेतुत्वोपपत्तेः स्थायि-
नः सम्बन्धिनश्च साधनत्वं भविष्यतीति पक्षान्तरमाह * यद्वेति *
श्लोकं व्याचष्टे * विनाशिनीति * ननु विनाशोत्तरकालीनस्यापि
फलस्य कथं तज्जन्यत्वावधारणेत्याशङ्क्य यश्च यत् प्रतीत्य प्रतिगम्य
प्राप्य यस्मिन्सतीत्युक्तम् । ननु कर्मविनाशान्वितस्यात्मनः साधनत्वस्य
न चातिक्रान्तयागेभ्यः पुरुषेभ्यः फलोद्गतिरित्यादिना निवेद्यमा-
नत्वात् स्वतन्त्रस्याभावस्य क्वचित्साधनत्वादर्शनाच्चेह साधनत्वक-
ल्पनेति स्वयमेवाशङ्क्य निरस्यति * स्यादेतदिति * श्लोके यत् तृ-
प्त्यादिफलोत्पत्तिनिमित्तस्य भोजनादेः क्रियात्वं धर्मो दृष्टस्तदतिक्र-
मस्योभयपक्षसाम्यात् तत्कल्पनत्वाविशेषेणाभावस्यैव तन्निमित्तत्व-
कल्पनोचितेत्यर्थः । विनष्टस्य कर्मणः साधनत्वायोगे कालान्तर-
भाविफलसाधनत्वस्यापूर्वकल्पकस्य शास्त्रार्थत्वानवधारणात्कथम-
२६३।१ पूर्वकल्पनेत्याह * किं चेति * श्लोकं व्याचष्टे * क्रियेति * न-
न्वनन्तरफलानुपलब्धेः शास्त्रप्रामाण्याच्चावश्यं फलोत्पत्त्यवसाया-
त्कालान्तरभाविफलसाधनत्वं भविष्यतीत्याशङ्कते * तत्रेति * अ-
नुष्ठानात्प्रागनन्तरानुत्पत्तेर्ज्ञातुमशक्यत्वादुत्तरकालं च शास्त्राव्या-
पाराच्छास्त्रान्तर्गतिर्नापूर्वस्य सम्भवतीति परिहरति * तदिति *
श्लोकं व्याचष्टे * न हीति * ननु योग्यत्वावधारणाधीनत्वाद्वा-
क्यार्थप्रतीतेरननुष्ठितस्य च योग्यतायाः प्रमातुमशक्यत्वात्कस्मान्ना-
नुष्ठानोत्तरकालं शास्त्रार्थावधारणेत्याशङ्क्य ज्ञाते वा वचनं न ह्यवि-
ज्ञाते विहितो ऽस्तीति तार्त्तीयसूत्रावयवेनानुष्ठानोत्तरकालं शास्त्रार्था-

वधारणे सत्यन्योन्याश्रयापत्तिः सूचिता कर्मफलकालयोर्वियोगो विप्रकर्षः प्राक्चापूर्वानपेक्षस्य कर्मणः साधनत्वे निश्चिते पश्चात्तदन्तर्भावना शास्त्रविरुद्धेति सूचयितुम् * यच्चेत्युक्तम् *वैगुण्यकल्पनयापि वानन्तरानुत्पत्तिसम्भवान्न शास्त्राविरुद्धार्थापूर्वकल्पना युक्तेत्याह *अपि चेति* सर्वाङ्गप्रधानसाध्यत्वात्फलस्य कस्मिंश्चित् विगुणे सति इतरसादगुण्ये ऽप्यनुत्पत्तिसम्भवं वक्तुं सर्वशब्दः।बहुपुरुषसाध्यत्वाच्चैकाशक्तावपि वैगुण्यापत्तिः कर्तृष्वितिबहुवचनेनोक्ता। सर्वेषु पदार्थेषु बहवः कर्तारस्तेषु मध्ये क्व चित्पदार्थे क्व चित्कर्तर्यशक्तेरपरिहार्यत्वादित्यर्थः। श्लोकं व्याचष्टे * दृश्यतइति* प्रायेण तावद्वैगुण्यं दृश्यते यत्रापि न दृश्यते तत्रापि शास्त्राविरोधात्तदेव कल्पनीयमित्यर्थः। ननु स्वर्गनरकयोरामुष्मिकत्वेनानन्तर्यायोगात्प्रागप्यनुष्ठानादपूर्वद्वारैव तदुत्पत्त्यवधारणं भविष्यतीत्याशङ्क्याह * न चेति * एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * निरतिशयसुखदुःखात्मकयोस्तादृशसुखदुःखोपभोगयोग्ययोर्देशविशेषयोर्वा स्वर्गनरकवाच्यत्वात्तयोश्चानेन शरीरेण प्राप्त्यसम्भवाच्चानन्तर्यानुपपत्तिरित्याशङ्क्यालौकिकयोः सम्बन्धग्रहणासम्भवेन वाच्यत्वायोगात्सूक्ष्माणि वासांसि स्वर्गः चन्दनं स्वर्ग इति च सुखहेतौ द्रव्ये स्वर्गशब्दप्रयोगेणाकृतिन्यायाद्विशेषणभूतस्य लौकिकस्य सुखस्य स्वर्गशब्दवाच्यत्वावगतेर्दुःखहेतौ च दारिद्र्ये नरकापरपर्यायदुर्गतिशब्दप्रयोगाद्विष्ठायां च दुःखहेतौ नरकशब्दप्रयोगदर्शनादाकृतिन्यायेनैव लौकिकदुःखवाचित्वावगतेरानन्तर्योपपत्तिरिति सुखदुःखात्मकत्वेनेत्यनेनेन सूचितम्। श्लोकं व्याचष्टे * न हीति *ततश्च स्वर्गनरकयोरप्यानन्तर्योपपत्तेर्न ग्रामादिभ्यो विशेषो ऽस्तीत्युपसंहरति* इतीति * शास्त्रीयक्रियाजन्यत्वेनापूर्वस्य चेष्टत्वान्निषेधाधिकारे च निषेध्यस्य हननादेर्लोकसिद्धत्वेनाशास्त्रीयत्वात् शास्त्रीयायाश्च तन्निवृत्तेः फलाभावेनापूर्वानपेक्षत्वान्न तत्कल्पना युक्तेत्याह * किं चेति* श्लोकं व्याचष्टे * ब्राह्मण इति*एवं चापूर्वस्य श्रुतसाध्यसाधनसम्बन्धविरोधित्वाद्विनष्टस्यापि च कर्मणस्तत्सम्बन्धिनः पुरुषस्य वा विनाशस्यैव वा साधनत्वोपपत्तेः कालान्तरभाविफलत्वानवसायाद्वापूर्वस्यासम्भवित्वात्कल्पनानुपपत्तिमुक्त्वा इदानीं श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वादपि कल्पनानुपपत्तिमाह * कल्पितमिति * यागादेर्हि व्यापारात्मकत्वात् जन्मनैव कार्यारम्भकत्वं युक्तम् अपूर्वस्य त्वव्यापारात्मकत्वान्निर्व्यापारस्य कार्यारम्भकत्वानुपपत्तेः। श्रुतसाध्यसाधनसम्बन्धानुपपादकत्वाद्व्यर्था कल्पनेत्याशयः।

३६४।१

स्वर्गनरकोपभोगाय देशान्तरे शरीरस्य प्राप्तिर्लोभोत्पत्त्यपरपर्यायापे-
क्षिता य चादिशब्दात्पुत्रादेः प्राप्तिरपेक्षिता तत्साधनेनापूर्वं समर्थमि-
त्यर्थः। स्थाय्याश्रयाभावेन चापूर्वस्य स्थायित्वायोगाच्छ्रुतसाध्यसाध-
नसम्बन्धोपपादकत्वं नास्तीत्याह *न चेति * प्रक्षेपान्तस्य यागस्या-
पूर्वारम्भकत्वेनेष्टत्वात्प्रक्षेपस्य च द्रव्यवदानाश्रितत्वाद् द्रव्यवदानव्य-
तिरिक्ते यजमाने ऽपूर्वारम्भकत्वानुपपत्तेर्द्रव्यावदानस्य च विनष्टत्वा-
न्नापूर्वाश्रयः स्थायी सम्भवतीत्याशयः । वार्त्तिककृन्मते यागस्य पुरो-
डाशसाध्यत्वे ऽपि सङ्कल्पात्मकत्वेनात्माश्रितत्वाद् द्रव्यवदानप्रक्षेपा-
दीनां हि सर्वेषामिति सिद्धान्तवार्त्तिकदर्शनाच्च पुरोडाशादादीय-
मानत्वात्पुरोडाशादिशब्देन द्रव्यवदानमेवोक्तम्। अङ्गापूर्वाणामप्येवं न
स्थाय्याश्रयः सम्भवतीत्यतिदिशति * एवमिति * अङ्गापूर्वं च
प्रधानापूर्वेण सम्बद्धं न वा असम्बद्धत्वे तावन्नोपकारित्वं सम्भव-
तीत्याह *किं चेति * आराच्छब्देन क्रियासाधनासमवायो ऽभिप्रेतः
प्रधानाश्रयात्माश्रितत्वात्प्रधानाश्रयत्वे त्वारादुपकारित्वं विरुध्येते-
त्याशयः। श्लोकार्थमुपपादयति * न हीति * सम्बन्धस्तु संयोगा-
द्यभावादाश्रयाश्रयिभावो वाच्यः अङ्गानां च प्रधानापूर्वसम्बन्धा-
भावेन तत्समवेतापूर्वोत्पादकत्वायोगात्पारिशेष्यात्पतनप्रबन्धलक्षण
एवाश्रयाश्रयिभावः परिशिष्यते। न चामूर्त्तस्य पतनप्रतिबन्धकता-
स्तीत्याह *न चेति * नन्वारादुपकार्यङ्गानां प्रधानापूर्वसम्बन्धाभा-
वेन तत्समवेतापूर्वोत्पादकतायोगे ऽपि सन्निपत्त्योपकार्यङ्गानां प्र-
धानापूर्वसाधनाश्रयत्वेन तत्सम्बन्धसद्भावात्तत्समवेतापूर्वोत्पाद-
कत्वं भविष्यतीत्याशङ्क्याह * यदपि चेति * लक्षणार्थत्वेनोपशब्दस्य
व्रीह्यादिद्रव्यमात्रक्षये तत्समवायिनो ऽपूर्वस्य क्षयादित्यर्थलाभः
व्रीह्याश्रितस्याप्यपूर्वस्यावघातेन व्रीहिनाशे ऽन्यत्र तण्डुलादावसञ्चा-
राच्च तद् द्वाराप्रधानापूर्वोपकारित्वं स्यादित्यर्थः। सन्निपात्यङ्गानां
प्रत्यात्मिकापूर्वमात्रपर्यवसायित्वस्य वक्ष्यमाणत्वात्फलसाधनस्य प्र-
धानस्य साध्यं यदपूर्वं तस्येति व्यधिकरणे षष्ठ्यौ व्याख्येये। नन्व-
ङ्गापूर्वाणां प्रधानापूर्वसमवाये ऽपि प्रधानापूर्वाश्रयात्माश्रितत्वेनै-
कार्थसमवायात्प्रधानापूर्वोपकारकत्वं भविष्यति फलसाधनत्वयो-
ग्यतासाधनार्थत्वेन च क्रियासाधनांशानिवेशाभावात् सन्निपत्त्योप-
कारित्वानापत्तेरारादुपकारकत्वाविरोध इत्याशयेनाशङ्कते * अथ
३६५।१ त्विति *प्रधानापूर्वाणामप्यात्माश्रितत्वसूचनायापिशब्दः आत्माश्रित-
त्वे सत्यपूर्वस्य योग्यतालक्षणत्वात्फलभोगयोग्यत्वस्यैवात्मनापेक्षणा-
त्पुरुषार्थतापद्येतेति दूषणमाह*एवं सतीति* विधिस्थैकश्रुतित्वादि-

त्यत्र चान्योन्यसापेक्षाणामङ्गापूर्वाणामुपकारकत्वस्य वक्ष्यमाणत्वा-
दसम्बन्धानां चान्योन्यसापेक्षैककार्यारम्भकत्वलक्षणयौगपद्यायोगा-
न्नोपकारकत्वं सम्भवतीत्याह*अपि चेति * एकोखासंयोगादिलक्ष-
णान्योन्यसम्बन्धसम्बद्धानामेव ग्रावादीनामेकोखाख्यैव धारणाख्य
एककार्यारम्भदर्शनात् सम्बन्धं विनान्योन्यस्वापेक्षैककार्यारम्भक-
त्वलक्षणं यौगपद्यं न सम्भवतीत्याशयः। प्रधानापूर्वाणामप्यन्यो-
न्यापेक्षाणामेकफलसाधनत्वलक्षणं फले यौगपद्यमेकादशाद्ये वक्ष्य-
माणमन्योन्यसम्बन्धभावादेवायुक्तमित्यतिदिशति * एतेनेति *
अतो ऽपूर्वस्यासम्भवित्वाद्विरोधित्वादनुपपादकत्वाच्च कल्पनानुप-
पत्तेस्तन्निरपेक्षाणामेव प्रधानानां पुरुषार्थसाधनत्वमङ्गानां च प्रधा-
नोपकारसाधनत्वमित्युपसंहरति * तस्मादिति * कृतत्वमात्र-
शब्देन विनष्टस्य कर्मणो ऽतिक्रान्तयागस्य वा पुरुषस्य कर्मविनाश-
स्यैव वा फलसाधनतेति पक्षत्रयमपि संगृहीतं, किं चापूर्वं यागादि-
भिरुत्पाद्यते ऽभिव्यज्यते च नोभयथापि सम्भवतीत्याह * न चे-
ति * उत्पत्त्यसम्भवे तावत्प्रश्नपूर्वकं विकल्प्य हेतुमाह * कुत
इति * अङ्गकर्मजन्यस्योपकारापूर्वस्य प्रधानकर्मजन्यस्य च फला-
पूर्वस्यानवयवत्वात्क्रमशो ऽपि तज्जन्मसम्भवित्वं न प्रतीयतइत्यर्थः।
एतदेवोपसंहरति * एवं तावदिति * ननु यथा स्फोटवादिभिर्नि-
रवयवस्यापि स्फोटस्य क्रमवर्त्तिभिर्नादैरस्फुटस्फुटस्फुटतरत्वेनाभि-
व्यक्तिरिष्यते तथापूर्वस्य निरवयवस्याप्याग्नेयादिभिः क्रमप्रवर्त्ति-
भिरस्फुटस्फुटस्फुटतरत्वेनाभिव्यक्तिर्भविष्यतीति द्वितीयकल्पमा-
शङ्क्य दूषयति * न चेति * एतदेव प्रश्नपूर्वमुपपादयति * क-
थमिति * प्रत्यक्षग्राह्यस्यैवार्थस्य लोके ऽभिव्यक्त्यपेक्षादर्शनात्त-
स्याश्चेन्द्रियविषयद्वयान्यतमसंस्कारद्वारदर्शनादप्रत्यक्षत्वाच्चापूर्वे
तदनुपपत्तेर्नाभिव्यक्तिः सम्भवतीत्याशयः। ननु कुलालादिव्यापा-
रेणोत्पत्तिविलक्षणाप्यभिव्यक्तिः घटादेः सांख्यैरिष्टेत्याशङ्क्य नो लौकि-
कानां * दर्शनइत्युक्तम् * श्लोकं व्याचष्टे * सर्वेति * अपूर्वापे-
क्षयान्तरशब्दः घटादेश्चालोकानन्तरमुपलम्भात् प्रत्यभिज्ञया च प्राक्
सत्त्वावसायात्तदभिव्यङ्क्तेष्यते ऽपूर्वस्य तु यागाद्यनन्तरमप्यनुपल-
म्भात्प्राक् सत्त्वे च प्रमाणासत्त्वान्न द्वयमप्यभिव्यङ्ग्यत्वकारणमस्ती-
त्याह * यदि चेति * अपरेषां निपुणं मन्यानां मतमुपन्यस्तमुपसं-
हरति * इतीति * असम्भाव्यमानत्वाद्विरोधित्वादनुपपादकत्वा-
दुत्पत्त्यभिव्यक्त्योश्चाभावादिति सर्वथाशब्देनोक्तं न केवलमपूर्वास-
म्भवादस्य सूत्रस्यापूर्वसद्भावप्रतिपादनार्थत्वं ते नेच्छन्ति किं त्ववा-

च्यकत्वादपीत्याह * न चेति * भाष्यकृद्व्याख्यादूषणमुपसंहरति * इतीति * प्राभाकरवत्कार्यनियोगापरपर्यायस्वतन्त्रापूर्वाभ्युपगमे परोक्ता दोषाः स्युर्नास्मदभिमतशक्तिरूपाभ्युपगम इति भाष्यकृद्व्याख्यानमभिधातुमुपक्रमते * अत्रेति * विग्रहवादिवेति शरीरगतं स्वातन्त्र्येण कार्यारम्भकत्वमुपमानेनोपलक्षितम्। अङ्गकर्मभ्यः प्राक् फलोत्पादनायोग्यस्य प्रधानकर्मणः फलोत्पादनयोग्यता प्रधानकर्मभ्यः प्राक् फलोपभोक्तृत्वायोग्यस्य पुरुषस्य फलभोक्तृत्वयोग्यतेत्यर्थः । कर्मजन्यत्वं वक्तुं कर्मभ्यः परेत्युक्तं लौकिकर्मजन्याया योग्यताया अपूर्वत्वनिवृत्त्यर्थम् * शास्त्रेत्युक्तम् * श्लोकं व्याचष्टे * प्रधानेति * सदुपलम्भकप्रमाणाभावेनापूर्वस्यासत्त्वं यदुक्तं त-

३६६।५ दनुभाषणपूर्वकं निरस्यति * यत्त्विति * सर्वप्रमाणाभावे सत्यभावः स्यान्न कतिपयप्रमाणाभावमात्रेणेत्याशयः । न तु प्रत्यक्षाद्यप्रवृत्तौ शशशृङ्गवदभावनिश्चयात्तद्विरोधेन श्रुतार्थापत्तेरप्यप्रवृत्त्युपपत्तेः कथमन्याप्रवृत्तिरदोष इति स्वयमेवाशङ्क्याह * किमिति * प्रमाणान्तरायोग्यत्वादप्रवृत्त्या नाभावनिश्चय इत्याशयः । नन्वेवं सत्यपूर्वस्यानागमिकत्वात्तद्द्वारस्य श्रेयः साधनत्वस्यागमिकत्वं न स्यादित्याशङ्क्याह *शब्देति * श्रुतशब्दैकदेशभूतशब्दकल्पकत्वेन शब्दैकदेशभावाच्छ्रुतार्थापत्तिरप्यागम एवेत्यर्थः । विवक्षितविशिष्टवाक्यार्थप्रतिपादनाशक्तेः श्रुतशब्दमात्रस्यापरिपूर्णत्वसूचनार्थः स्वार्थशब्दः । शब्दैकदेशत्वमेवोपपादयितुमुपक्रमते * येनेति * ननु विनष्टाविनष्टकारणसाधारणी शक्तिः कार्यकारणनियमासिद्ध्यर्थं कल्प्यमानापि क्रियाजन्यत्वाभावान्नापूर्वशब्दाभिधेयेत्याशङ्क्याह * नियोगतश्चेति * शक्तिकल्पनावश्यकत्वं वक्तुमेतदुक्तं वस्तुतस्त्वत्र कर्मफलसम्बन्धचोदनायामतीतानामेव कर्मणां जन्या शक्तिरेष्टव्येत्यर्थः अनन्तरफलोत्पत्तावप्यावश्यकत्वं नियोगतश्चेत्यनेनोक्तम्। एतदेव प्रश्नपूर्वकमुपपादयति * कुत इति * श्लोकं व्याचष्टे * यदेव हीति * केवलस्यापि दर्शस्यानेककर्मात्मकत्वाच्छ-

३६७।१ क्तिं विना साहित्यासम्पत्तेः * तदन्त्यं वेत्युक्तम * यदा च शक्तिं विना भूयसां यौगपद्यं न सम्भवति तदानन्तरफलोत्पत्तावपि सर्वकर्मान्ते फलोत्पत्तेरभ्युपगन्तव्यत्वाच्छक्त्यनङ्गीकरणे चानन्तर्यविशेषेणैकस्यैव साधनत्वापत्तेः शक्तिद्वारा यौगपद्यं सर्वकर्मणां साधनत्वव्यवहारायाङ्गीकार्यमित्याह * नियोगतश्चेति * सर्वमेतद्वृद्धवाक्येन द्रढयति * तथा चाहेति * सर्वपदार्थानां कार्यारम्भाख्यव्यवहाराङ्गतत्त्वस्य शक्तिद्वारत्वात्प्रोक्षणादिपदार्थस्वरूपे द्रव्या-

श्रितत्वादन्यदेशे विनष्टत्वाच्चान्यकाले ऽपि सञ्चारिस्थायिशक्तिद्वारा व्यवहारः सिद्ध्यतीत्यर्थः। नन्वविनष्टस्य कर्मणः शक्तिरलौकिकीत्याह * लौकिकं चापीति * कालान्तरे यस्योद्गतिरिति विग्रहः श्लोकं व्याचष्टे * यान्यपि चेति * क्रियाजन्यकार्योत्पत्त्यनुकूलादृष्टातिशयात्मकत्वात् संस्काररूपतापूर्वस्य संस्कारशब्देन सूचिता ननु लोके प्रमाणान्तरानुसारात्संस्कारात्मकशक्तिकल्पनं युक्तं वेदे तु शास्त्रैकसमधिगम्यत्वात्तस्य चानुष्ठानात्प्रागेव प्रवृत्तेस्तदा च फलस्य कालान्तरीयत्वानिश्चयान्नापूर्वाख्यसंस्कारात्मकशक्तिकल्पना युक्तेत्याशङ्कां निरस्यन् श्रुतार्थापत्तिप्रमाणकत्वमपूर्वस्योपसंहरति * तेनेति * फलस्यानेकाङ्गप्रधानसाध्यत्वात्तेषां च क्षणिकत्वेन स्वरूपसाहित्यायोगात्फलस्यानन्तरोत्पत्तावपि साहित्यसिद्ध्यर्थं शक्तिकल्पनानुष्ठानात्प्रागप्युपपन्नेत्याशयः। एवं स्वपक्षसाधनमुक्त्वा इदानीं परोक्तानि दूषणानि परिहरिष्यन्नपि च यदि तावदित्यनेनोक्तं श्रुतसाध्यसाधनसम्बन्धविरोधं तावदनुभाषणपूर्वकं परिहरति * यत्त्विति * श्लोकं व्याचष्टे * यदि हीति ननूदकाहरणसाधनघटसाधनस्यापि कुलालस्योदकाहरणसाधनत्वाप्रसिद्धेः । कथं यागोत्पादितया शक्त्या साधीतस्य फलस्य यागः साधनमित्याशङ्कानिरासार्थत्वेन द्वारशब्दं व्याख्यातुम् * सर्वेत्युक्तम * यथा काष्ठादेर्ज्वलनाद्यवान्तरव्यापाररूपद्वारापेक्षत्वे ऽपि पाकादौ साधनत्वाविघातस्तथासंस्कारात्मकद्वारापेक्षत्वे ऽपि साधनत्वाविघात इति सूचयितुं व्यापारशब्दः। नन्वपूर्वस्य व्यापारात्मकतानेनोक्ता व्यापारत्वे ऽस्य स्थायित्वानुपपत्तेः। शक्तिसंस्कारत्वोक्तिविरोधापत्तेश्च कार्योत्पत्त्यनुकूलो ह्यदृष्टो ऽतिशयः सिद्धरूपः शक्तिशब्दवाच्यः सामान्यतः प्रसिद्धस्तद्विशेषस्त्वागन्तुकः संस्कारशब्दवाच्यः प्रसिद्धो न व्यापारात्मकः साध्योद्देशप्रवृत्तकर्तृव्यापारव्याप्यत्वाद्व्यवहितस्यापि यागस्य साधनत्वाविघात इत्याशयः। अथ वेत्यनेन सर्वस्य द्ध्यादेरवस्थान्तरापत्त्यपेक्षत्वे ऽपि साध्यत्वाविघातदर्शनात् स्वर्गादेः शक्त्याख्यापूर्वात्मकावस्थान्तरापत्त्यपेक्षित्वे ऽपि साध्यत्वाविघाताभिधानार्थत्वेनोत्तरार्द्धं व्याख्यातम्। उपभोग्यानुपभोग्यावस्थे स्थूलसूक्ष्मशब्दाभ्यामभिप्रेते यदा च स्थाय्यपूर्वं शक्त्यात्मकत्वात्कर्मफलाभ्यामनत्यन्तभिन्नं तदा फलं भवद्भावयेदनेनेत्थमिति त्रयाणामपि भावनांशानां यौगपद्याभिधानमपि कर्मफलकालयोरविच्छेदादुपपन्नं भवतीति सूचयितुमाह * एतावानिति * परिहारद्वये ऽपि वृद्धसम्मतिमाह *आह चेति * ज्वलनक्रियाद्वारा पक्तव्यमिति द्वार-

३६८॥१

निर्देशोक्तिः सर्वसाधनानां द्वारापेक्षाप्रदर्शनार्थां साध्यस्यावस्थान्त-
रापेक्षायामुत्तरार्द्धेन दृष्टान्तोऽभिहितः । यच्चापूर्वं विनापि कर्मफल-
योः साध्यसाधनसम्बन्धानुपपत्तिपरिहारोपपत्तेर्नापूर्वं कदा चि-
त्फलसाधनत्वेन सम्भाव्यत इत्युक्तं तदनुभाषणपूर्वकं निरसितुमुप-
क्रमते * यत्त्विति * यदि शास्त्रादेवावगम्यते किं भवतो विरुध्यत
इत्यनेन विनष्टस्यापि कर्मणस्साधनत्वोपपादनेनानुपपत्तिपरिहारमु-
क्तम् तावत्प्रश्नपूर्वं निरस्यति * कुत इति * न सम्भावितं
सामर्थ्यरूपेण स्थायित्वं यस्येति विग्रहः । श्लोकं व्याचष्टे *नूनमि-
ति * एतदेवोपसंहरति * तस्मादिति * अवधारणादपूर्वस्यानुष्ठा-
नात्प्रागेव सिद्धा किमुत सम्भावनेत्यर्थः । यदपि यष्टुरेवात्मनो
३ यागैः संस्कृतस्येत्यनेनातिक्रान्तयागस्य साधनत्वोपपत्तेरपूर्वस्यासम्भ-
वित्वमुपपादितं तदपि निरस्यति * न वेति * श्लोकं व्याचष्टे
* यदि हीति * अतिक्रान्तानतिक्रान्तयागयोरिति बहुव्रीहिणा
अतिक्रान्तानतिक्रान्तयागपुरुषविशेष इति मध्यमपदलोपिसमासो
व्याख्यातः । अविशेषेणोपपादयति * आत्मत्वमिति * नन्वा-
त्मत्वाविशेषेऽपि विनष्टयागे पुरुष स एष यज्ञायुधी यजमान इ-
त्यादिप्रयोगदर्शनेन यजमानत्वस्य भावादकृतयागे चाभावाद्विशेषो
ऽस्तीत्याशङ्क्याह * यागत्वमपीति * अयं भावः यागान्वितं वा
रूपं यजमानत्वेनाभिमतं यागविषयं कर्तृत्वमात्रं वा तत्राद्ये कल्पे
यागरूपस्य विनष्टानुत्पन्नत्वेनोभयत्रासत्त्वरूपतया तुल्यत्वादविशेष
इति स्वरूपनिष्कर्षार्थभावप्रत्ययान्तेन यागशब्देनोक्तम् । यजमानशब्द-
प्रयोगस्तु भूतगत्या भविष्यतीति द्वितीयं कल्पं निरस्यति *न चेति*
यथा क्रियारहितस्यानुत्पन्नक्रियस्य निर्व्यापारत्वात्कर्तृत्वं नास्ति तथै-
वासीन्द्वाख्यमवस्थान्तरं प्राप्तस्य विनष्टक्रियस्यापीत्यर्थः । कर्तृश-
क्तिस्तु सर्वदा सद्भावान्न विशेषादिकेति स्वयमेवाशङ्क्याह * क-
३६९।१ र्त्रिति * उक्तेन च प्रकारेणातिक्रान्तानतिक्रान्तयागयोः पुरुषयोर्वि-
शेषाभावे शुद्धस्य पुरुषस्य साधनत्वापत्तेस्तस्य चावैलक्षण्यात्फलवै-
३ लक्षण्यं न स्यादित्याह * अपि चेति * ननु विशेषान्तराभावेऽप्य-
तिक्रान्तयागत्वमेव विशेषो भविष्यतीत्याशङ्क्याह * तथेति *
अतिक्रमस्य विनाशस्य कार्यानुपयोगित्वेनोपलक्षणमात्रार्थत्वाद्यागा-
न्तरातिक्रमे चोपलक्ष्ये पुरुषे विशेषाप्रतीतेः फलविशेषासिद्धिरित्या-
शयः । एकयागगतप्रयोगाल्पत्वबहुत्वेऽप्येतं दोषमतिदिशति * एते-
नैवेति * फलविशेषाभाक्त्वेन निरस्ता इत्यर्थः । कर्तृत्वाख्यातवा-
च्यत्वे सति प्रकृत्यर्थस्य यागस्य तद्विशेषणत्वप्रतीतेर्विनष्टस्य च का-

विज्ञप्तिः ।

१ अस्यां चौखम्बा-संस्कृतग्रन्थमालायां प्रतिमासं पृष्ठशतके सुन्दरैः सीसकाक्षरैरुत्तमेषु पत्रेषु एकः स्तबको मुद्रयित्वा प्रकाश्यते ।

२ एकस्मिन् स्तबके एक एव ग्रन्थो मुद्यते ।

३ प्राचीना दुर्लभाश्चाऽमुद्रिता मीमांसावेदान्तादिदर्शन, व्याकरण धर्मशास्त्र साहित्य, पुराणादिग्रन्था एवात्र सुपरिष्कृत्य मुद्यन्ते ।

४ काशिकराजकीयप्रधानसंस्कृतपाठालयाऽध्यापकाः पण्डिता अन्येच शास्त्रदृष्ट्यो विद्वांसः एतत्परिशोधनादिकार्यकारिणो भवन्ति ।

५ भारतवर्षीयैः ब्रह्मदेशीयैः, सिंहलद्वीपवासिभिश्च एतद्ग्राहकैर्देयं वार्षिकमग्रिमं मूल्यम् मुद्राः ७ आणकाः ८

६ कालान्तरे प्रतिस्तबकं " " १ " ०

७ प्रापणव्ययः पृथग् नास्ति ।

८ साम्प्रतं मुद्यमाणा ग्रन्थाः- मुद्रिताः स्तबकाः

(१) संस्काररत्नमाला । गोपीनाथभट्टकृता (संस्कारः) २

(२) शब्दकौस्तुभः । भट्टोजिदीक्षितकृतः (व्याकरणम्) १०

(३) श्लोकवार्तिकम् । भट्टकुमारिलविरचितम् पार्थसारथिमिश्रकृत-न्यायरत्नाकराख्यया व्याख्यया सहितम् सम्पूर्णम् । (मीमांसा) १०

(४) भाष्योपबृंहितं तत्त्वत्रयम् विशिष्टाद्वैतदर्शन प्रकरणम् श्रीमल्लोकाचार्य्यप्रणीतम् । श्रीनारायणतीर्थ विरचित भाट्टभाषा प्रकाश सहितम् । (वेदान्तः) २

(५) करणप्रकाशः । श्रीब्रह्मदेवविरचितः सम्पूर्णः (ज्योतिषं) १

(६) भाट्टचिन्तामणिः महामहोपाध्याय-श्रीगागाभट्ट विरचितः । तर्कपादः (मीमांसा) २

(७) न्यायरत्नमाला-श्रीपार्थसारथिमिश्रविरचिता सम्पूर्णा । (मीमांसा) २

(८) ब्रह्मसूत्र भाष्यम्-बादरायण प्रणीत वेदान्त सूत्रस्य यतीन्द्र श्रीमद्विज्ञानभिक्षु कृत व्याख्यानम् । (वेदान्त) ६

(९) स्याद्वादमञ्जरी-मल्लिषेणनिर्मिता । (जैनदर्शनम्) २

(१०) सिद्धित्रयम्-विशिष्टाद्वैत-ब्रह्मनिरूपणपरम्-श्रीभाष्यकृतां परमगुरुभिः श्री ६ यामुनमुनिभिर्विरचितम् । (वेदान्त) १

(११) न्यायमकरन्दः । श्रीमदानन्दबोधभट्टारकाचार्यसंगृहीतः आचार्यचित्सुखमुनिविरचित व्याख्योपेतः (वेदान्तः) १

(१२) विभक्त्यर्थनिर्णयः न्यायानुसारिप्रथमादिसप्तविभक्ति-विस्तृतविचाररूपः म०म० श्रीगिरिधरोपाध्यायविरचितः । (न्यायः) ४

(१३) विधिरसायनम् श्रीअप्पयदीक्षितकृतम् (मीमांसा) २

(१४) न्यायसुधा (तन्त्रवार्तिकटीका) भट्टसोमेश्वरविरचिता । (मीमांसा) ६

(१५) शिवस्तोत्रावली । उत्पलदेवविरचिता । श्रीक्षेमराजविरचितवृत्तिसमेता । (वेदान्त) १

पत्रादिप्रेषणस्थानम् } हरिदासगुप्तः,
चौखम्बा-संस्कृतपुस्तकालय
बनारस सिटी ।